CC-0. In Public Domain. Digitization by eGangotri

ISSN : 2795-1960

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता, अनुसन्धानात्मिका पत्रिका)

BrahmaPrajna

(A Peer-Reviewed Journal)

वर्षम् ४ पूर्णाङ्कः ५ वि.सं. २०८१

वेदान्तविभागः

वाल्मीकि-विद्यापीठम्
नेपाल-संस्कृत-विश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता अनुसन्धानात्मिका पत्रिका)

BrahmaPrajna

(A Peer-Reviewed Journal)

वर्षम् : ४ पूर्णाङ्कः ५ वि.सं. २०८१

सम्पादकौ

प्रा.डा. मुकुन्दप्रसाद-लामिछाने

प्रा.डा. नारायण-चालिसे

वेदान्तविभागः

वाल्मीकि-विद्यापीठम्

नेपाल-संस्कृत-विश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता अनुसन्धानात्मिका पत्रिका)

Brahma-Prajna

(A Peer-Reviewed Journal)

वर्षम् ४ पूर्णाङ्कः ५ वि.सं. २०८१

अस्यां पत्रिकायां प्रकाशिता निबन्धा लेखकानां स्वाध्ययनानुसन्धानाधारेण लिखिता इति तत्राभिव्यक्तानां विषयाणामुत्तरदायित्वमपि लेखकेष्वेव भविष्यति।

प्रकाशकः—

वेदान्तविभागः

वाल्मीकिविद्यापीठम्

नेपाल-संस्कृत-विश्वविद्यालयः

vedantavibhag@gmail.com

प्रकाशनतिथिः : २०८१।१२।०७ विषुवद्दिनम्

ISSN : 2795-1960

मूल्यम् : ३५०।-

मुद्रकः : कञ्चनप्रेसमुद्रणालयः, बागबजारः

☎ ०१-५३३००९७, ५३५३४२७

kanchanpress1989@gmail.com

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुतिनिर्देशः। भवाटवीभ्रमणभ्रान्तिभाजां तापत्रय-दावाग्निदग्धानां मानुषाणामात्मसाक्षात्कारमन्तरा निःश्रेयसाधिगमस्य न वीक्ष्यते विकल्पान्तरम्। तदर्थमेवात्मचिन्तनमनननिदिध्यासनानि। ब्रह्मसूत्रोपनिषद्गीतादिशास्त्रोक्त आत्मसाक्षात्कारश्च ब्रह्मबोधोपायं विहायोपायान्तरैर्नितरामसाध्यः। अतश्चात्मा वा अरे द्रष्टव्य इति श्रुतिर्मुमुक्षूणां बाढमनुसरणीया। कश्चायमात्मेति चेदयमात्मा ब्रह्मेति श्रुतिरेव प्रमाणम्। **प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्मे**ति चतुर्णामेव वेदानां महावाक्यानि सर्वांशतस्तुरीयं ब्रह्म एव गमयन्ति। ब्रह्मप्रज्ञेति पत्रिका च नाम्नैव सोद्देश्यं तस्यैव ब्रह्मतत्त्वस्याभिव्यञ्जिका।

प्रकर्षेण ज्ञायते अनया इति प्रज्ञा, ब्रह्मविषयिणी प्रज्ञा ब्रह्मप्रज्ञा इति व्युत्पत्तिर्भवितुमर्हति विशेष्यतया ब्रह्मप्रज्ञापदस्य। पत्रिकाविशेषस्य विशेषणतया तु ब्रह्मविषयिणी प्रज्ञा यस्यां सेति व्युत्पत्तिर्भवितुमर्हत्येवास्य पदस्य। प्रकृष्टं ज्ञानं यस्यां सेति व्युत्पत्तौ क्रियमाणायाञ्च प्रज्ञापदं व्युत्पद्यते। व्युत्पत्तिरियं प्रज्ञानं ब्रह्मेति महावाक्येन सहान्तःसंवादिनी सादृश्यमती वा विभाव्यते। अस्यां स्थितौ ब्रह्मप्रज्ञापदयोः परस्परं पर्यायभावो दृश्यते। तत्र च पुनरितरथा व्युत्पत्तयः सम्भवन्ति- प्रज्ञा ब्रह्म इव यस्यां सा, ब्रह्म इव प्रज्ञा यस्यां सा, ब्रह्म चासौ प्रज्ञा ब्रह्मप्रज्ञा, ब्रह्म चासौ प्रज्ञा ब्रह्मप्रज्ञा ब्रह्मप्रज्ञा अस्ति यस्यां सा ब्रह्मप्रज्ञेत्यादिरूपाः। परमार्थतस्तात्पर्यतश्च प्रकृते यथासम्भवं ब्रह्मतत्त्वं प्रकाशयन्ती या प्रज्ञा भवति विदुषां, तस्याः प्रकाशिकेयं पत्रिका। ब्रह्मविद्याविभागेन प्रकाश्यमाना पत्रिकेयं नाम्नैवान्वर्थनामा च।

ब्रह्मतत्त्वापरपर्यायत्वेन व्यपदेष्टुमर्हाणि तत्तद्दर्शननिहितानि शास्त्रान्तरप्रतिपादितानि च निगूढतत्त्वानि सादृश्यात् समवायात् सारूप्याच्च ब्रह्मप्रज्ञायामन्तर्विशन्तीति वक्तुं शक्यते। अतश्च समाधिजन्यकैवल्यदशायाः प्रतिपादकं योगशास्त्रम्, षोडशपदार्थज्ञानजन्यनिःश्रेयसाधिगमसन्दर्शकं न्यायदर्शनम्, द्रव्यगुणकर्मादि-सप्तपदार्थानां साधर्म्यवैधर्म्यज्ञानजन्यमोक्षस्य पन्थानं दर्शयद् वैशेषिकं दर्शनम्, पञ्चविंशतितत्त्वज्ञानसम्भाव्यां मुक्तिदशां निदर्शयत् साङ्ख्यदर्शनम्, यागादिकर्मणामनुष्ठानेन स्वर्गादिप्राप्तिं सिद्धान्तयदथ चात्मज्ञानेन सञ्चितकर्मणां विनाशद्वारा मोक्षपथं च प्रदर्शयद् मीमांसादर्शनम्, मोक्षापरपदव्यपदेश्यमहापरिनिर्वाणप्रतिपादकं बौद्धदर्शनम्, तत्त्वज्ञानपूर्विकायाः कृत्स्नकर्मविनाशस्वरूपिण्या मुक्तेः सरणिं सन्दर्शयज्जैनदर्शनञ्च प्रकारान्तरेण भाषान्तरेण भावान्तरेण च ब्रह्मप्रज्ञामेव प्रतिपादयन्ति। एवमेव ब्रह्मानन्दसहोदररससिद्धान्तप्रतिपादकस्य साहित्य-शास्त्रस्य, अनादिनिधनशब्दब्रह्मणः प्रतिपादकस्य व्याकरणशास्त्रस्य, ब्रह्मविवर्तभूतब्रह्माण्डभाण्डवर्तिग्रहनक्षत्रादि-स्थितिफलबलादिसिद्धान्तसन्देहमन्देहं दूरीचिकीर्षोर्ज्योतिषशास्त्रस्य, अभ्युदयनिःश्रेयसादिप्रतिपादकस्य धर्मशास्त्रस्य, शिवशक्त्योः सामरस्यसिद्धान्तसमुल्लसितस्य तन्त्रशास्त्रस्य भाषान्तराणां शास्त्रान्तराणाञ्च नवनीतमिव क्षीरस्य निस्यन्दभूतं वस्तु ब्रह्मतत्त्वमेव। अस्याः पत्रिकाया अस्मिन्नप्यङ्के विविधशास्त्राणां विविध-तन्त्राणि समाहृत्य बीजभूतं वस्तु प्रस्तुतं विद्यते। तादृशं वस्तूपायनीकुर्वन्तोऽस्याः पत्रिकायास्तन्त्र-न्याय-मीमांसा-वेदान्त-ज्योतिष-धर्मशास्त्र-साहित्यार्थशास्त्र-गणित-विषयकास्त्रैभाषिका अनुसन्धानलेखाः सर्वेषामुपकाराय कल्पन्त इत्याशास्यते विश्वस्यते च।

तिथिः २०८१।१२।०५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

सम्पादकीयम्		ग
संस्कृतखण्डः		
तन्त्रशास्त्रोक्तरीत्या शक्तितत्त्वविमर्शः	सहप्रा.डा. माधवप्रसादलामिछाने	१
ग्रहभगणविमर्शः	सहप्रा. मुरलीधरदाहालः	१२
पौरस्त्यास्तिकदर्शनाभिमतजगत्तत्त्वविवेकः	उपप्रा.डा. उमेशप्रसादघिमिरे	१९
नान्दीमुखीश्राद्धविवेचना	उपप्रा.डा. प्रकाशढकालः	३९
भारविकालिदासयोः काव्यस्वरूपम्	उपप्रा. विष्णुप्रसादः पन्थी	४८
न्यायदर्शने प्रमेयनिरूपणम्	उपप्रा.डा. सीतारामः खतिवडा	५९
मीमांसादर्शनाधारे कर्ममोक्षयोः अनुशीलनम्	दामोदरः रेग्मी	६३
ब्रह्मसूत्रकारस्य वेदव्यासस्य परिचयः	नारायणप्रसादकोइराला	७१
धर्मशास्त्रदृष्ट्योपनयनसंस्कारविवेचनम्	विष्णुप्रसादः शर्मा	७७
नेपालीखण्ड		
नेपालको अर्थव्यवस्थाका विशेषताहरू	सहप्रा. चन्द्रप्रसाद पौडेल	८८
पाकयज्ञ विमर्श	सहप्रा. तेजप्रकाश पौडेल	९४
अकर्म र त्यसको महत्त्व	डा. चेतमणि न्यौपाने	१०५
संस्कृत काव्यशास्त्रमा प्रस्तुत काव्यदोषको विवेचना	उपप्रा. चिन्तामणि भट्टराई	११३
ज्योतिष शास्त्रको ऐतिहासिक परिशीलन	उपप्रा.डा. नारायणप्रसाद निरौला	१२०
धर्मशास्त्रीय न्यायपरम्परामा प्रमाण	चिरञ्जीवी ढकाल	१२९
रोल्पाको गजुलकोटमा दशैं मनाउने परम्परा	दामोदरप्रसाद सुवेदी (दामु मर्सिफुल)	१३६
अङ्ग्रेजीखण्ड		
The Evolution of Trigonometry: A Historical Perspective	Arjun Adhikari	१४३
Atharvana Medication : An Application Of Vedic Science	Bhaskar Mishra	१५१

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रशास्त्रोक्तरीत्या शक्तितत्त्वविमर्शः

सहप्रा.डा. माधवप्रसादलामिछाने

वाल्मीकिविद्यापीठम्

लेखसारः

अस्मिन् लेखे शक्तितत्त्वस्य व्युत्पत्तिं, तस्यार्थं च सम्यगुल्लिख्य शक्तितत्त्वस्य विकासक्रमो वर्णितः। विशेषतस्तन्त्रागमेषु शक्तितत्त्वस्योल्लेखः कीदृशरूपेण प्राप्यत इत्यनुसन्धानमेवास्यालेखस्य मूलोद्देश्यं वर्तते। तान्त्रिकाणां मते पराशक्तिरेव विज्ञानानन्दघनं ब्रह्म। निखिलं स्थूलसूक्ष्मकारणात्मकं जगत् शक्तेर्विकासमात्रम्। प्रकाशं विना यथा विमर्शस्य स्थितिर्नैव सम्भवति तथैव विमर्शं विनापि प्रकाशस्य स्थितिर्नैव जायते। शिवशक्तिस्वरूपयोः प्रकाशविमर्शयोः साम्यावस्थैव परमपदं पदवाच्यं भवति। अस्यां साम्यावस्थायां महाशक्तिस्वरूपानादिशक्तिः परमशिवेन सह सामरस्यभावापन्नरूपेणाद्वयरूपेण विराजते। एकैव सा पराशक्तिर्खेचरी, दिक्चरी, गोचरी, भूचरीत्यादिभिर्नामभिर्व्यवह्रियते। अनेन विवेचनेन शक्तितत्त्वसम्बद्धा तान्त्रिकी धारणा स्पष्टतया ज्ञायते।

शब्दकुञ्जी : *प्रकाशः, विमर्शः, महाकालः, तन्त्रागमः, कुण्डलिनी।*

१. विषयप्रवेशः

कारणवस्त्ववच्छिन्नं कार्योत्पादनोपयोगिभूतमपृथक्सिद्धं धर्मविशेषत्वं शक्तित्वम्। तान्त्रिकाणां मते पराशक्तिरेव विज्ञानानन्दघनो ब्रह्म। अखिलं स्थूलसूक्ष्मकारणात्मकं जगत् शक्तेर्विकासमात्रम्। विश्वस्य मूले या पूर्णसत्ता पारमार्थिकरूपेण विद्यमानास्ति सैव शक्तेः परमं रूपम्। अवाङ्मनसगोचरे परे तत्त्वे ब्रह्मणि वा अनन्तब्रह्माण्डसमुदायरूपतया प्रकटिता स्वाभाविकी शक्तिरेव शास्त्रेषु माया, प्रकृतिः, कालीत्यादिभिर्नामभिः सङ्केतिता वर्तते। सैव पराशक्तिः शास्त्रेषु विविधैर्नामभिर्विविधैश्च रूपैर्गीयते।

२. समस्याकथनम्

अस्मिँल्लेखे समुपस्थापिताः समस्या अधोलिखिता वर्तन्ते–

(क) शक्तितत्त्वस्य विकासक्रमः कः?

(ख) वैदिकवाङ्मये पौराणसाहित्ये च शक्तितत्त्वस्य स्थानं किम्?

(ग) तान्त्रिकसाहित्ये शक्तितत्त्वसम्बद्धा धारणा का वर्तते?

३. अध्ययनस्योद्देश्यम्

समस्याकथने समुपस्थितानां समस्यानां समाधानमेवास्य लेखस्य मुख्योद्देश्यं वर्तते। अत उपर्युक्तानां समस्यानां समाधानार्थमधोलिखितान्युद्देश्यानि निर्धारितानि वर्तन्ते–

(क) शक्तितत्त्वस्य विकासक्रमोपस्थापनम्,

(ख) वैदिकवाङ्मये पौराणसाहित्ये च शक्तितत्त्वस्य स्थाननिर्धारणम्,

(ग) तान्त्रिकसाहित्ये शक्तितत्त्वसम्बद्धानां धारणानां प्रकाशनम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. अध्ययनविधिः

इदमध्ययनकार्यं मूलतः पुस्तकालयीयविधिमनुसृत्य कृतमस्ति। वेदपुराणतन्त्रागमेभ्यः शक्तितत्त्वसम्बद्धान् विषयान् सङ्कलय्य प्राप्तसामग्रीणां विवेचनं च विधाय निष्कर्षः स्थापितो वर्तते। सामग्रीणां विवेचनक्रमे यथावश्यकमागमननिगमनात्मकविधेश्च प्रयोगो विहितः।

५. अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च

वैदिकवाङ्मये पौराणिकवाङ्मये च शक्तितत्त्वस्य स्थानोल्लेखनपुरस्सरं तान्त्रिकवाङ्मये शक्तितत्त्वसम्बद्धा का धारणा वर्तत इत्यात्मकमध्ययनमेवास्य लेखस्य विषयक्षेत्रं वर्तते। अत एव वेदसंहितायां, उपनिषत्सु, तन्त्रवाङ्मये च शक्तितत्त्वसम्बद्धा या धारणा वर्तते तासां विवेचनमस्य लेखस्य सीमा वर्तते।

६. शक्तिशब्दस्यार्थस्तात्पर्यश्च

'शक्लृ शक्तौ' इति धातोः 'क्तिन्' प्रत्ययस्य योगात् तथा 'शक्' आमर्षण इति धातोः क्तिन् प्रत्ययस्य योगाच्छक्तिशब्दो निष्पद्यते। 'श' इति ऐश्वर्यवाचकमस्ति, 'क्तीति' च पराक्रमवाचकमस्त्यत ऐश्वर्यपराक्रमस्वरूपा तयोर्दात्री च शक्तिरिति कथ्यते। उक्तञ्च–

ऐश्वर्यवचनः शश्च क्तिः पराक्रम एव च।
तत्स्वरूपा तयोर्दात्री सा शक्तिः परिकीर्तिता॥ (देवीभागवतम्, ९।२।१०)

तान्त्रिकाणां मते पराशक्तिरेव हि विज्ञानानन्दघनो ब्रह्म। निखिलं स्थूलसूक्ष्मकारणात्मकं जगत् शक्तेर्विकासमात्रम्। सैव शक्तिः स्वात्मानं यदा बहिरुल्लासयति तदा निखिलं जगदवभास्यते। यदा च सा पुनः सर्वं विश्वं स्वात्मन्येव लयं करोति तदान्तःसङ्कोचावस्थायां प्राप्नोति। तदा च सात्मा, बिन्दुरिति वा पदवाच्या भवति। विश्वस्य मूले या पूर्णसत्ता पारमार्थिकरूपेण विद्यमानास्ति सैव शक्तेः परमं रूपम्। तस्याञ्चावस्थायां प्रकाशविमर्शावविनाभावरूपेण स्थितौ वर्तेते। प्रकाशं विना यथा विमर्शस्य स्थितिर्नैव सम्भवति तथैव विमर्शं विनापि प्रकाशस्य स्थितिर्नैव जायते। शिवशक्तिस्वरूपयोः प्रकाशविमर्शयोर्वा साम्यावस्थैव परमपदवाच्या भवति। अस्यां साम्यावस्थायां महाशक्तिस्वरूपानादिशक्तिः परमशिवेन सह सामरस्यभावापन्नरूपेणाद्वयरूपेण विराजते। सा चाद्याशक्तिस्तत्त्वातीता तत्त्वमयी सर्वप्रपञ्चमयी चास्ति। सा नित्या, परमानन्दस्वरूपिणी भगवती चराचरजगतो बीजस्वरूपास्ति। सा च प्रकाशस्वरूपस्य शिवस्य स्वरूपज्ञानावबोधार्थं दर्पणस्वरूपा वर्तते। यथा च कश्चित् पुरुषः स्वाग्रे स्थिते निर्मले मुकुरे स्वप्रतिबिम्बं दृष्ट्वा तं च प्रतिबिम्बमहमिति जानाति तथैव परमेश्वरोऽपि स्वभित्तावेव प्रतिबिम्बितां स्वकीयां शक्तिं दृष्ट्वा स्वरूपलाभं करोति। अवाङ्मनसगोचरे परतत्त्वे ब्रह्मणि वानन्तब्रह्माण्डसमुदायरूपतया प्रकटिता स्वाभाविकी शक्तिरेव शास्त्रेषु माया, प्रकृतिः, कालीत्यादिभिर्नामभिः सङ्केतिता वर्तते।

७. शक्तितत्त्वविकासः

देवीं महाशक्तिं वा परब्रह्मस्थानीयोपास्यतया गृहीत्वा सा च पराशक्तिर्विश्वब्रह्माण्डस्य परमकारण–रूपास्तीति विचार्य तां च नित्यां सनातनीं शक्तिं ये उपासन्ते ते शाक्तमतावलम्बिन इति कथ्यन्ते। शक्त्युपासना–परम्पराऽतीव प्राचीना वर्तते। परिवारस्य समाजस्य चाविर्भावे तस्य सुगठने च नारीणां भूमिका सर्वोपरि वर्तते। अतो

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विश्वस्य विविधेषु समाजेषु मातृसत्तात्मकाः संस्था विनिर्मिताः। तस्यैव च परिणामतः शक्तिपूजायाः प्रचलनमारब्धमिति समाजशास्त्रिणः पुरातत्त्वविदश्च कथयन्ति। जेम्स जे. प्रिन्स्टनस्य मते देवीपूजायाः प्रमाणं त्रिंशत्सहस्रवर्षपूर्वं नवपाषाणकालेऽपि प्राप्यते (प्रिन्स्टन, १९४०, पृ. ६)। मध्ययुरोपमहादेशे पूर्वयुरोपमहादेशे च हस्तिदन्तैरस्थिभिश्च निर्मिता नारीमूर्तिणामवशेषा उपलभ्यन्ते। विंशतिसहस्रवर्षपूर्वादपि प्राक् पाषाणकालेन सह सम्बद्धास्ते चावशेषास्तात्कालिकसमय एव देवीपूजायाः प्रचलनमासीदिति प्रमाणं ददति। इरान-इराक-भूमध्यसागरीयक्षेत्र-पश्चिमएसिया-मोहनजोदडो-हडप्पाप्रभृतिषु स्थानेषूपलब्धेभ्यो नारीचित्रेभ्यो मूर्तिभ्योऽवशेषेभ्यश्च देव्युपासनापरम्परातीव प्राचीनास्तीति ज्ञायते।

७.१. वैदिकवाङ्मये शक्तितत्त्वम्

सर्वप्रथमं शक्तेरुल्लेखो ऋग्वेदे प्राप्यते। ऋग्वेदे देव्या अदितेरुल्लेखोऽशीतिवारं प्राप्यते। सा चादितिरखण्डिता, बन्धनरहिता, सर्वव्यापिनी, द्यौरन्तरिक्षरूपा, जननात्मिका, आद्याशक्तिः, चिन्मयज्योतिः स्वरूपास्तीत्युल्लेखः प्राप्यते (ऋग्वेदसंहिता, १।८९।१०)। वैदिकसंहितायामदिति, शची, उषा, पृथ्वी, वाक्, सरस्वती, रात्रिः, धिषणा, इला, सिनीवाली, मही, भारती, अरण्यानी, निर्ऋतिः, मेधा, पृश्नि, सरण्यू, राका सीताप्रभृतिदेवीनामुल्लेखः प्राप्यते। अदिति रुद्रस्य मातास्ति, सा वसूनां दुहितास्ति, सा चादित्यानां भगिन्यस्ति, साऽमृतस्य नाभिरस्ति (ऋग्वेदसंहिता, ८।१०१।१५)। ऋग्वेदस्य देवीसूक्ते पराशक्तिर्भगवती विराड्रूपतया वर्णिता प्राप्यते। सैवेश्वरी रुद्र-वसु-आदित्य-विश्वेदेवैश्चरति। सैव मित्रावरुणौ बिभर्ति, सैव इन्द्राग्नीमश्विनौ च बिभर्ति (ऋग्वेदसंहिता, १०।१२५।१)। ऋग्वेदे सरस्वत्या वर्णनक्रमे देवी सरस्वती बलदा, ज्ञानदा, ऐश्वर्यदा, अन्नदाऽस्तीति उल्लेखः प्राप्यते। तथा च सा सर्वान् पुनाति, धीमतां यज्ञं, श्रेष्ठकर्मं, देवोपासनां च धारयति (ऋग्वेदसंहिता, १।२।३।१०-१२)। एवं च ऋग्वेदस्य दशममण्डले देवी सरस्वती ज्ञानप्रकाशदात्र्यस्ति, सुखदा चास्ति तथा च साऽसीमज्ञानशक्तिसम्पन्नास्तीत्युल्लिख्य कमनीयस्वभावा विद्यारूपा च सा सर्वं विश्वं व्याप्य तिष्ठतीत्युल्लिखितं वर्तते (ऋग्वेदसंहिता, १०।६१,६,६१)। एनमतिरिच्य होत्राभारतीभ्यां देवीभ्यां सहापि सरस्वत्या वर्णनं प्राप्यते (ऋग्वेदसंहिता, १।१४२।९)। वेदे देव्या उषाया अपि बहूनि वर्णनानि प्राप्यन्ते। सा चोषाऽविनाशिनी, पापघ्नी, व्यापिनी, अतिदीप्तमतीति कथिता। देव्या उषायाः कौमार्यवर्णनमतीव सुन्दरमस्ति। सा प्रभातकाले प्रथमं ज्ञानं प्रकटयति। ततस्तेजस्विनी ब्रह्मचारिणी वा सा तेजस्विनं सूर्यं श्रयति। सा कान्तिमती नववधूरिव नानारूपं गृ्ाति (ऋग्वेदसंहिता, १।२।२०-२२, १।९२।१-१५)। सा च देवी उषा समस्तविद्याभिः पूर्णा, सर्वज्ञानप्रकाशिका, आद्या, उत्तमज्ञानकर्मोपदेशेन युक्ता चास्ति (ऋग्वेदसंहिता, ४।५१, ५२)। अदितिः सर्वभूतानां जनन्यस्ति। अस्याः प्रकाशवन्तः पुत्रा आदित्या इति कथ्यन्ते। विश्वमिमं विश्वमस्या एवोत्पद्यतेऽस्यामेव लयं याति च (ऋग्वेदसंहिता, १।७२।९, १।८९।१०)। परमेश्वरस्यानन्दमय्याश्चितिशक्तेः स्वरूपप्रकाशका मन्त्रा वेदे प्राप्यन्ते। परमेश्वरस्यानन्द-शक्तिश्चितिशक्तिरेवादितिरस्ति। अदितिरेव हि गन्धर्वमनुष्यपितृकिन्नरप्रभृतीनां जनन्यस्ति। सैवादितिः पृथिवी, सावित्री, गायत्री इति कथ्यते। अदितेर्विरोधिनी मलिनसत्त्वा दितिः कथ्यते। तस्या एव मलिनसत्त्वाया दितेः पुत्रा दैत्या इति कथ्यन्ते। शक्तेर्मातृत्वमदितौ प्राप्यते (ऋग्वेदसंहिता, १।९२, १।११३)।

ब्राह्मणग्रन्थे आरण्यकग्रन्थे च ब्रह्मशक्तिर्गायत्री-सावित्रीप्रभृतिभिर्नामभिर्वर्णिता अस्ति। सद्ब्रह्मणः स्वरूपं गायत्रीमन्त्रस्य गानेन रक्षन्ती शक्तिर्गायत्रीति कथ्यते। ब्रह्मणस्तेजो विश्वस्य भरणं करोति, विश्वे रमणं करोति, अन्ते च तत्रैव विश्वं लयं याति। गायत्र्यपि तदनुरूपमेव विश्वस्य भरणं करोति, संहारकाले निखिलमपि जगत् स्वात्मन्येव लयीकृत्य प्रतिष्ठत्यत एव सा भर्गमयी, तेजोमयी, ज्योतिर्मयीत्यभिधीयते। दुर्गादेव्या विस्तृतं वर्णनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तैत्तिरीयारण्यके प्राप्यते। तत्र दुःस्वप्ननाशिनीं दुर्गां सर्वमपि स्वपापं हरणाय प्रार्थना क्रियते (तैत्तिरीयारण्यकम्, १०।१)।

उपनिषत्सु ब्रह्मण्यन्तर्निहिता शक्तिरेव विश्वप्रपञ्चस्य कारणमस्तीत्युल्लिखितं वर्तते। ध्यानयोगानुगता ऋषयः स्वगुणैर्निगूढां सर्वकारणस्वरूपां, देहात्मशक्तिमपश्यन् (श्वेताश्वतरोपनिषत्, १।३)। यस्मिन् काले सर्वत्राज्ञानात्मकस्य तिमिरस्य साम्राज्यमासीत्, जगतः कारणरूपा सत्ता व्यक्ताव्यक्तरूपा कापि नासीत्, केवलं ब्रह्म शान्तं स्थिरं चासीत्। तदा जगतः सृष्टिं कुर्वन्त्याः सवितायास्तेजोऽभिव्यज्यत। ततस्तस्मादेव तेजसः प्राचीनकल्पस्य पुरातनी प्रज्ञाविर्बभूव (श्वेताश्वतरोपनिषत्, ४।१८)। ब्रह्म शक्तियोगादेवानेकरूपतां याति। तस्य च ब्रह्मणो विविधेषु शक्तिषु इच्छा-ज्ञान-क्रिया चेति मुख्याः सन्ति (श्वेताश्वतरोपनिषत्, ६।८)। भेदरहिता देवतामयी अदितिः प्राणादभिव्यज्यते। ततः सा चिदम्बरस्य विज्ञानमय्यां गुहायां प्रविशति तथा जगद्रूपेण स्वात्मानं व्यनक्ति (कठोपनिषत्, २।४।७)।

त्रिपुरोपनिषदि भगवत्याश्चिच्छक्त्याः स्वरूपनिरूपणक्रमे कथितमस्ति यत् सा च चिच्छक्तिः स्थूलसूक्ष्मकारणात्मेकषु त्रिविधेषु शरीरेषु, देवयान-पितृयान-महायानरूपेषु त्रिपथेषु, आदिक्षान्तवर्णमातृकासु तथा जीवेषु च विराजमानाऽस्ति। सा चाजरा, चिरन्तनास्ति (त्रिपुरोपनिषत्, १)। देव्युपनिषदि भगवती महादेवी कथयति यदहं ब्रह्मस्वरूपिणी, प्रकृतिपुरुषात्मकं जगत् शून्यञ्चाशून्यञ्च। सर्वमपि जगन्मत्त एवोदितम्। विज्ञानरूपाऽविज्ञानरूपा चाहम्।अखिलमिदं विश्वमहमेवास्मि (देव्युपनिषत्, १-२)। भावनोपनिषदि देव्याः परस्वरूपस्य वर्णनं प्राप्यते। शाक्ताद्वैतवादस्य भित्तिरस्मिन्नेवोपनिषद्याधृतास्ति।

एतानतिरिच्य त्रिपुरोपनिषद्-त्रिपुरातापिन्युपनिषद्-सरस्वतीरहस्योपनिषद्-सीतोपनिषद्-बह्वृचोपनिषद्-सौभाग्यलक्ष्म्युपनिषद्प्रभृतिषूपनिषत्सु च शक्तेर्विविधं स्वरूपं, तस्या महिमा, तस्या चोपासना विशदरूपेण वर्णिताः प्राप्यन्ते।

७.२. पौराणसाहित्ये शक्तितत्त्वम्

पौराणसाहित्ये कालिकापुराणं शक्तिवादस्य स्वतन्त्रं पुराणमस्ति। तस्मिन् पुराणे भगवती कालिकैव मुख्या प्रतिपाद्यास्ति। देवीभागवतं च शाक्तसिद्धान्तप्रतिपादकमुपपुराणम्। ब्रह्माण्डपुराणे ललितासहस्रनामाभिधेयं प्रकरणं प्राप्यते। तस्मिन् प्रकरणे भगवत्या ललितत्रिपुरसुन्दर्याः सहस्रनामानि प्रतिपादितानि वर्तन्ते। मार्कण्डेयपुराणे देवीमाहात्म्यनामकं प्रकरणमुपलभ्यते। प्रकरणमेतत् सप्तशतीति नाम्ना प्रसिद्धमस्ति। शाक्तोपासकानां कृते सप्तशतीति नाम्ना विख्यातं देवीमाहात्म्यमतीव महत्त्वपूर्णमस्ति। विष्णुपुराणे लक्ष्म्या वर्णनं जगन्मातृत्वेन कृतमस्ति। तस्मिन् पुराणे लक्ष्मीर्वेदगर्भा-यशोगर्भा-सूर्यगर्भा-दैत्यगर्भाप्रभृतिभिर्नामभिर्वर्णितास्ति (विष्णुपुराणम्, २।७-१२)। श्रीमद्भागवतमहापुराणे वर्णितं रासलीलाप्रकरणं शक्तिवादस्य रहस्यं प्रकटयतीति कथयन्ति तन्त्रविदः। महाभारते पाशुपत-भागवतसम्प्रदायावतिरिच्य शाक्तसम्प्रदायस्यापि चर्चा प्राप्यते। विराट्पर्वणि युधिष्ठिरो देव्या दुर्गाया उपासनां कृतवानिति वर्णनं प्राप्यते। तत्र देवी दुर्गा भगवतः श्रीकृष्णस्य भगिनी कथिता। वनपर्वणि च रुद्रेण सह हालिमा-मालिनी-पलालाप्रभृतीनां मातृदेवीनामुपासना वर्णितास्ति।

७.३. तन्त्रागमशास्त्रेषु शक्तितत्त्वम्

वैदिकसाहित्ये पौराणसाहित्ये च प्रतिपादितस्य शक्तितत्त्वस्य विकासस्तन्त्रागमे परिलक्ष्यते। औपनिषदसिद्धान्ते वर्णितमीक्षणं-तपः-सर्जनमेवागमशास्त्रे तन्त्रशास्त्रे वेच्छा-ज्ञान-क्रियाशक्तिर्बिन्दु-बीज-

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नादात्मकं तत्त्वमिति वर्णितम्। परमात्मनि यदा स्वत्मानं विश्वाकारतया बहिः स्फारयितुमिच्छा जायते तदेक्षणमिच्छाशक्तिः परबिन्दुर्वेति कथ्यते। परबिन्दोरवस्थायामाद्यक्षोभेन यदा प्राणतत्त्वमुदेति तदा तदेव प्राणतत्त्वं तपो ज्ञानशक्तिरपरबिन्दुर्वा कथ्यते। व्याकरणागमे मन्त्रशास्त्रे च ज्ञानशक्तिः शब्दब्रह्मेति कथ्यते। तस्मिंश्चापरबिन्दौ भेदस्य विद्यमानत्वाज्जडांशे बीजमजडांशे बिन्दुर्जडाजडांशे च नादो जागर्ति। इममेवागमिकशक्तिवादान्तर्गतं परमशिवस्येच्छा–ज्ञान–क्रियात्मिका स्वाभाविकी शक्तिरित कथ्यते। सैवेच्छा–ज्ञान–क्रियात्मिका स्वातन्त्र्य–शक्तिर्विश्वमयदशायां नानात्वेनाभिव्यज्यते। सैव स्वातन्त्र्यशक्तिस्तन्त्रागमशास्त्रेषु चितिः, ऊर्मिः, संवित्, काली, कालसङ्कर्षिणीत्यादिभिर्नामभिर्ज्ञायते, साधकैश्च तैस्तैर्नामभिरुपास्यते।

तन्त्रागमशास्त्रे परमेश्वरः पूर्णसंवित्स्वभावो मन्यते। तस्य पूर्णतैव शक्तिः, कुलं, सामर्थ्यम्, ऊर्मिः, हृदयं, सारं, स्पन्दः, विभूतिः, त्रींशिका, काली, कर्षणी, चण्डी, वाणी, भोग, दृक्, नित्याप्रभृतिभिर्नामभिरागमेषु प्रतिपादिता वर्तते। परमेश्वरस्यानन्तानां शक्तीनामन्तर्भावः परा–परापरा–अपरा चेति त्रिषु शक्तिषु क्रियते। यया च शक्त्या परमेश्वरः शिवादिक्षित्यन्तं जगत् पालयति, अवलोकयति, अवभासनं च करोति सैव तस्य पराशक्तिः,। यया च स भेदाभेदरूपेण सर्वं पश्यति सा परापराशक्तिः,। यया च स विश्वमिमं विश्वं परस्परं भेददृष्ट्या पश्यति सा च तस्यापराशक्तिः। परा–परापरा—अपरारूपं त्रिविधमेव स्वरूपं स्वात्मन्येव लयं कृत्वा तेषां नित्यनिरन्तरं यानुसन्धानं करोति सैव भगवती मातृसद्भावरूपिणी कालसङ्कर्षिणी, कालीत्यादिभिर्नामभिर्ज्ञायते।

७.३.१ काल्याः प्रादुर्भावः

फाल्गुनकृष्णैकादश्यां महारात्रितिथौ काल्या आविर्भावः कथितः। काल्याः सुन्दरीरूपतया षोडशीरूपतया वा विवृत्तिमुदिश्यैका कथा वर्तते। तद्यथा— इन्द्रः कैलासवासिनं शिवं काश्चनोऽप्सरसः प्रेषितवान्। शिवस्ताः कालीपुरं सम्प्रेष्य स्वयमप्यनुजगाम। कृष्णवर्णां तामभिलक्ष्य शिवः कालीति तामाचक्षे। एतच्छ्रुत्वावमता सा सद्यैव गौरवर्णा समजायत। शिवस्तां शक्तिसुन्दरीति सम्बोधयन् पुरे आविर्भावयामास (पाण्डेयः, वि.सं. २०२६, ३८ पृष्ठे उद्धृतम्)। सुन्दरी, श्रीः, त्रिपुरसुन्दरी, ललिता, सर्वेऽमी पर्याया एव। अस्या नामानि पुरश्चर्यार्णवे वर्णितानि। तानि च यथा— १. दक्षिणा २. भद्रा ३. श्मशाना ४. कालकाली ५. गुह्यकाली ६. कामकलाकाली ७. धनकाली ८. सिद्धिकाली ९.चण्डीकाली (बृहत्पुरश्चर्यार्णवः, प्रथमखण्डः, २३—२४ पृष्ठम्)। महाकालस्याभिन्ना शक्तिः काली दशमहाविद्यासु प्राथम्येन परिगण्यते।

७.३.२ काल्युपासकाः

महाकालसंहितायां काल्युपासकत्रैविध्यं प्रदर्शितम्। ब्रह्मविष्णुमहेश्वराश्चाद्योपासकाः (महाकालसंहिता, गुह्यकालीखण्डः, १।१३९)। इन्द्रसूर्यवरुणकुबेराग्निप्रभृतयो देवा द्वितीयोपासकाः (महाकालसंहिता, गुह्यकालीखण्डः, १।१६५—१७१कख), दुर्वासावसिष्ठदत्तात्रेयबृहस्पतिविश्वामित्रप्रभृतयश्च ऋषिप्रवरास्तृतीयो–पासकाः (महाकालसंहिता, गुह्यकालीखण्डः, २।३०—३१)। गुह्यकाली मुख्यतया नेपाले पूज्यते, अस्या उपासका ब्रह्मवसिष्ठरामकुबेरयमभरतरावणबलिइन्द्रप्रभृतयः। साधकभेदेन गुह्यकाल्या मुखाकृतिर्विभिन्ना। भरतोपासिता दशमुखी।गुह्यकाल्येवैतस्या विद्याया मूलप्रकृतिः स्वीकृताः। काल्युपासका एव कौला इत्युच्यते। तच्च यथा— श्रीकाल्युपासका ये च तत्कुलं परिकीर्तितम् (शक्तिसङ्गमतन्त्रम्, ४।३२)। एतेन काल्युपासकाः कुलपदेन गृह्यन्त इति सिद्ध्यति। यद्यपि तन्त्रालोके कुलशब्दस्यानेकेऽर्था दत्तास्तद्यथा—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुलं च परमेशस्य शक्तिः सामर्थ्यमूर्ध्वता।

स्वातन्त्र्यमोजो वीर्यं च पिण्डः संविच्छरीरकम्॥ (तन्त्रालोकः, २९।६२)

कुः पृथ्वीतत्त्वं लीयते यत्र तत् कुलमाधारचक्रं तत्सम्बन्धाल्लक्षणया सुषुम्णामार्गोऽपि कुलशब्देन ज्ञायते। अधःस्थितं रक्तं सहस्रदलकमलमपि कुलम्। तत्कर्णिकायां कुलदेवीदलेषु कुलशक्तयश्च सन्तीति स्वच्छन्दतन्त्रस्य वचनादीदृगर्थस्य कुलपदस्य परतः सम्बन्धसामान्यार्थे तद्धिते कौलम्। उक्तं च स्वच्छन्दतन्त्रे–

कुलं शक्तिरिति प्रोक्तमकुलं शिव उच्यते।

कुलेऽकुलस्य सम्बन्धः कौलमित्यभिधीयते॥ (स्वच्छन्दतन्त्रम्, ४।१२)।

एतेष्वर्थेषु सत्स्वपि काल्युपासकस्य कौल इति संज्ञा लोके दृश्यते। मूलाधारचक्रे सुषुम्णामार्गः कुलपदेनोच्यते, अत एव कौलाः कुलपूजका आधारसेवका इति कौलत्वं तेषाम्।कौलमार्गे शरीरस्यैव सर्वतीर्थभूमित्वं मन्यते। तेनाधारचक्रस्थितकुण्डलिनीशक्तिरूपा काल्युपासना कौलोपासनारूपेण प्रसिद्धास्ति।

७.३.३ कुण्डलिनी शक्तिः

अनादिविद्या षट्शाम्भवेश्वरी वाच्यातीता पराकला काली महाप्रलये शिवशक्तिमयमेकं रूपम् देहमासाद्य तिष्ठति। तत्र प्रेतरूपा ब्रह्मविष्णुरुद्रादयः काल्या हृदयरूपे श्मशाने (हृदयाकाशे) चितिरक्षास्वरूपत्वं प्राप्य नृत्यन्तो गायन्तश्च तिष्ठन्ति। तस्यां कोटिकोटिब्रह्माण्डाः स्वरूपेणावतिष्ठमानाः समुल्लसन्ति। चत्वारो वेदा युगाश्च तत्र स्थिताः सन्ति। सा च कुण्डलीशक्तिः स्वेच्छया किञ्चिदुच्छूना त्रिशक्तित्वमादधाना क्रमात्क्रमं स्वात्मानं स्फारयन्ती पञ्चाशत्प्रकारताङ्गता तावत् सङ्ख्याकवर्णमातृकात्वं लेभे। प्रतिवर्णमेका विद्या इत्येकपञ्चाशद्विद्यानामावि–र्भावः। तासां नामानि च यथा– १. काली (आद्या शक्तिः) २. इच्छा ३. ज्ञाना ४. क्रिया ५. चतुर्वेदेश्वरी ६. महोग्रा ७. सिद्धिकाली ८. कालसुन्दरी ९. भुवनाम्बिका १०. चण्डिकेश्वरी ११. दशमहाविद्याः १२. श्मशानकालिका १३. चण्डभैरवी १४. तारिणी १५. वशीकरणकालिका १६. महापञ्चदशी १७. महाषोडशी १८. छिन्नमस्ता १९. महामधुमती २०. महापद्मावती २१. रमा २२. श्रीकामसुन्दरी २३. दक्षिणकालिका २४. विद्येशी २५. गायत्री २६. पञ्चमीसुन्दरी २७. षष्ठीविद्या २८. महारत्नेश्वरी २९. मृतसञ्जीवनी ३०. महानीलसरस्वती ३१. वसोर्धारा ३२. त्रैलोक्यमोहिनी ३३. त्रैलोक्यविजया ३४. श्रीकामाख्यातारिणी ३५. अघोरा ३६. सङ्गीतमोहिनी ३७. बगला ३८. अरुन्धती ३९. अन्नपूर्णेश्वरी ४०. नकुली (नाकुली) ४१. त्रिकण्टकीविद्या ४२. राजेश्वरी ४३. त्रैलोक्याकर्षिणी ४४. राजराजेश्वरी ४५. कुक्कुटी ४६. सिद्धविद्या ४७. मृत्युहारिणी ४८. महाभोगवती ४९. वासवी ५०. फेत्कारी ५१. महाश्रीमातृसुन्दरी (मातृकोत्पत्तिसुन्दरी) इति (शक्तिसङ्गमतन्त्रम्, श्रीकालीखण्डः, १।२८–४४)।

७.३.४ कालपदव्युत्पत्तिस्तदर्थश्च

कालयति कालयते वा कालः। कालो हि भावानां भासमानाभासनात्मकानां क्रमोऽवच्छेदको भूतादिर्ज्ञानक्रियास्वरूपेण भावानपि तेन तेन रूपेण कलयन् परिच्छिनत्ति। कालस्य जगत्कवलयितृत्वं वेदशास्त्रपुराणस्मृतीतिहासादिग्रन्थेषु प्राचुर्येण वर्णितं प्राप्यते। सर्वमपि चराचरं कस्मिंश्चित्काल एव जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति षड्भावविकारान् लभते। अतः सृष्टिस्थितिसंहारेषु कालस्य सत्ताऽनिवार्यतया दृश्यते। कालस्वरूपविवेचने नैकमत्यं वेदशास्त्रादिवाङ्मये प्राच्यपाश्चात्त्यविद्वत्सु वाऽवलोक्यते। आगमशास्त्रे षट्त्रिंशत्तत्त्वेषु कालोऽप्यन्यतमतत्त्वतया स्वीक्रियते। ज्ञानक्रिययोरेव जगदिदं विश्रान्तमिति वस्तूनां ज्ञानक्रियार्थकत्वं ज्ञानक्रियात्मकत्वं च प्रसिद्धम्। ज्ञानादृते वस्तुसत्ता न केनापि गोचरीकर्तुं पार्यत इति जगतो

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानरूपत्वमेवागमसिद्धान्तेऽपि। क्रमाक्रमाभ्यामुभयथैव भावा भासन्ते। क्रमेण कार्यकारणभावादौ, अक्रमेण चित्रज्ञानादौ। द्रष्टव्ये हि चित्रपटे प्रथमं सर्वस्यापि चित्रपटस्य दर्शनमक्रममेव जायते, तदनु तत्रैकैकस्य वस्तुनो निर्धारणपूर्वकं समीक्षणं क्रमश इति। भावेषु यैवंविधा कलना सैव क्रमाक्रमात्मा कालः। स च भैरवरूपी कालः। उक्तं च तन्त्रालोके— भैरवरूपी कालः सृजति जगत् कारणादिकीटान्तम् (तन्त्रालोकः, आ.४, पृ.१९८)। परमेश्वर एव प्रकाशात्मा। प्रकाशश्च विमर्शस्वभावः। विमर्शो नाम परमेश्वरस्य सृष्टिस्थिति–संहारनिग्रहानुग्रहकारिणी स्वाभिन्ना स्वातन्त्र्यात्मिका इच्छापरपर्याया स्फुरत्तासारा शक्तिरेव। शक्तिशक्तिमतोश्चा–विनाभावसम्बन्धः। शक्तिशिवयोः कदाचिदपि पार्थक्याभावेऽपि शक्तिरेव जगत्कर्त्री। तयोर्नित्यसिद्धैक्येन शिवस्यापि पञ्चकृत्यकारित्वव्यपदेशो न विरोधमावहति।

७.३.५ कालीशक्तेः पञ्चधोल्लासाः

परमेश्वरः कालः, कालकालः, महाकाल इत्यादि संज्ञां भजते। प्रकाशस्वरूपस्य महेश्वरस्य स्वेच्छावभासितस्य प्रमातृप्रमाणप्रमेयाद्यात्मकस्य जगतस्तत्तद्रूपतया कलनसामर्थ्यमेव शक्तिः। कलधातोः पञ्चधार्थं प्राप्यते क्षेपो ज्ञानं सङ्ख्यानं गतिर्नाद इति। तदुक्तं तन्त्रालोके—

स्वात्मनो भेदनं क्षेपो भेदितस्याविकल्पनम्।
ज्ञानं विकल्पः सङ्ख्यानमन्यतो व्यतिभेदनात्॥

गतिः स्वरूपारोहित्वं प्रतिबिम्बवदेव यत्।
नादः स्वात्मपरामर्शशेषता तद्विलोपनात्॥ (तन्त्रालोकः, ४।१७४—१७५)।

अकुलस्य शिवस्य कौलिकी शक्तिर्विश्वावभासनक्रमे स्वभित्तौ स्थितस्य विश्वस्य स्वातन्त्र्यरूपया स्वेच्छया बहिरुल्लासनं करोतीत्ययं क्षेपः। बहिरुल्लासितस्य तस्य स्वाभेदेन परामर्शो ज्ञानम्। भेदितस्यैव प्रमातृप्रमेयादेरर्थस्य परस्परापोहनात् इदमिदं नेदमिदमिति प्रतिनियततयाऽवस्थापनात् सङ्ख्यानं (गणनं) विकल्पः। गतिश्चात्र गत्युपसर्जनाप्राप्तिः। पूर्वोक्तानां चतुर्णामपहस्तनात् स्वात्मपरामर्शशेषता नादः, नदनमात्ररूपत्वात्। यदाऽहमिति स्वात्मपरामर्श एव शिष्यते तदा क्षेपज्ञानसङ्ख्यानगतीनां परित्यागोऽनिवार्यतया जायते। नदनमात्ररूपां कलनां कुर्वन् साधकश्चिदानन्दघनपूर्णाहन्तासमाविष्टः शाक्तोपायप्रतिपन्नतया परशाक्तरूपो मुक्त एव। यथोक्तं तन्त्रालोकविवेके— संविदेव हि आश्यानीभूता नीलादिरूपतामधिशयाना प्रमाणोपारोहद्वारेण तद्रूपतां विलाप्य प्रमातरि विश्रान्तिमभ्युपगच्छन्ती स्वेन प्रमात्रेकात्मनारूपेण प्रस्फुरति। किञ्च कालस्यापि कलयित्री काली। तदुक्तं महानिर्वाणतन्त्रे –

कालसङ्कलनात् काली सर्वेषामादिरूपिणी।
कालत्वादादिभूतत्वादाद्या कालीति गीयते॥ (महानिर्वाणतन्त्रम्, ५।७)।

७.३.६ कालीशक्तेः पर्यायाः

पूर्वोक्तपञ्चविधां कलनां कुर्वती सा कालीशक्तिर्देवी काली कालकर्षणी च कथ्यते। आगमशास्त्रे सा मातृसद्भाव इत्यपि संज्ञां भजते।देवदेवात् परभैरवान्निर्गतत्वाद् विश्ववमनशीलत्वाच्च वामेश्वरीति सा कथ्यते। कुलं षट्त्रिंशत्तत्त्वात्मकं जगत्, कलयति बहिः क्षिपति पारमित्येन परिच्छिनत्तीति कला इति। कला च स्थूलजगत उपादानकारणम्। सर्वकर्तृत्वशक्तिमत ईश्वरस्य किञ्चित्कर्तृत्वहेतुः कला, तस्याश्च विद्यारागकालनियतिरूपं तत्त्वचतुष्कं जन्यते। कलादिनियत्यन्ततत्त्वपञ्चकेन कञ्चुकितस्य पशोर्न सर्वत्राप्रतिहतं कर्तृत्वमपि तु क्वचिदेवेति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कलाकलनवैभवम्। यथा कलया सर्वकर्तृत्वं सङ्कोच्य नियन्त्र्यते, तथैव कालेनापि क्रमाक्रमाभ्यां जगदिदं नियम्यते। कर्तृत्वमात्रसङ्कोचिका कला, कालस्तु कार्यत्वकर्तृत्वयोरुभयोरिति विशेषः। कलनैव विजृम्भापदेनाप्युच्यते। तदुक्तं तन्त्रालोके–

इमाः प्रागुक्तकलनास्तद्विजृम्भोच्यते यतः। (तन्त्रालोकः, ४।३५)।

सेयं विजृम्भापरपर्यायां कलनां कुर्वती काली पूर्णसंवित्स्वभावा कुलम्, सामर्थ्यम्, ऊर्मिः, हृदयम्, सारः, स्पन्दः, विभूतिः, चित्, चितिः, चैतन्यम्, स्वरसोदिता परावाक्, स्वातन्त्र्यम्, त्रींशिका, कर्षिणी, चण्डी, वाणी, भोगः, दृक्, नित्या, परमात्मनो मुख्यमैश्वर्यम्, कर्तृत्वम्, स्फुरत्ता, विश्रान्तिः, चित्प्रतिभा, प्राणनाशक्तिः, उद्यमः, स्फूर्तिः, ओजः, बलम्, कला, अहन्तेत्यादिभिर्नामभिः सैव पराशक्तिः काली ज्ञायते। एवंभूता सा कालीशक्तिरेका–ऽद्वयापि विश्वावभासनसंरक्षणस्वात्मविमर्शादिरूपया परा–परापरा–अपराख्यया त्रेधा विभिद्यते। तिसृभिः शक्तिभिर्विश्वकार्यनिर्वाहः सम्पद्यते। यया षट्त्रिंशत्तत्त्वात्मकमिदं विश्वं शिवादिधरण्यन्तं निर्विकल्पसंविन्मात्रतया ध्रियते, ज्ञायते, भास्यते च सा पराशक्तिः। यया च पूर्वोक्तं जगत् प्रतिविम्बितवस्तुवद् भेदाभेदाभ्यां सर्जनपालन–विमर्शाद्यात्मना विषयीक्रियते सा परापरा। यया च प्रत्येकं वस्तु प्रमातृप्रमाणप्रमेयाद्यात्मना भेदेन भास्यते सा चापराशक्तिः। आसां तिसृणामात्मन्येव क्रोडीकारेणानुसन्धानात्मना वा यया ग्रास्यते, सा कालकर्षिणी। चतस्रोऽप्येताः सृष्टिस्थितिसंहारभेदात् प्रत्येकं त्रिधा भिद्यमाना द्वादशसङ्ख्याका भवन्ति। तद्यथा– सृष्टिसृष्टिः सृष्टिस्थितिः, सृष्टिस्थितिः, सृष्टिसंहारः, सृष्टितुरीयम्, स्थितिसृष्टिः, स्थितिस्थितिः, स्थितिसंहारः, स्थितितुरीयम्, संहारसृष्टिः, संहारस्थितिः, संहारसंहारः, संहारतुरीयमिति (महार्थमञ्जरीपरिमलव्याख्या, १०४ पृ.)। एभिरेव शक्तीनां भेदद्वादशकैः समस्तव्यस्तभावेन सकलोऽपि लोकव्यवहारो नितरां समभिचाल्यते। महार्थमञ्जरीपरिमले–ऽनाख्याभासात्मकं शक्तिद्वयं निग्रहानुग्रहस्थाने स्थापयित्वा सृष्ट्यादिपञ्चशक्तीनां भेदाः सलक्षणं षट्पञ्चाशद्धा वर्णिताः। तद्यथा– सृष्टिर्नाम उद्योग–अवभास–चर्वण–आत्मविलापन–निस्तरङ्गत्वलक्षणप्रथापञ्चक–समष्टिः, तस्याः कलाः क्रियाज्ञानेच्छोद्योगप्रतिभास्वभावसृष्टिस्थितिसंहारानाख्याभासास्वरूपाः। स्थितिर्हि नाम सृष्टानां पदार्थानां यावत्संजिहीर्षोदयमवैयाकुल्येनावस्थानम्।

क्रमदर्शने सैव कालीशब्देनोच्यते। यथोक्तं महार्थमञ्जर्याम् –

सैव काली महादेवी गीयते लोकवेदयोः।
इतिहासेषु तन्त्रेषु सिद्धान्तेषु कुलेषु च। (पूर्ववत्)।

इयमेव कालीशक्तिर्विश्वस्य योनिः। स्वतन्त्रा सा स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति। तस्याः स्वातन्त्र्यं हि नाम यद्येनासौ स्वात्मनापि भासते परात्मनाप्यर्थादात्मानं परीकरोति, परमप्यात्मीकुरुत इति। कालीति स्त्रीलिङ्गशब्देन कालीतत्त्वस्य स्त्रीलिङ्गत्वं लोके व्यवह्रियते किन्तु परतत्त्वात्मके पूर्णे वस्तुनि लिङ्गप्रयुक्तव्यवहारः साधकरुच्यनुसारं कल्पित एव न तु वास्तविकः। ब्रह्मविष्णुरुद्रसूर्यगणपतिशक्तीत्यादिशब्देषु तत्तल्लिङ्गप्रयोगो भावनाबलेनैव। चिद्गगनचन्द्रिकायां परतत्त्वात्मकस्य कालीतत्त्वस्य त्रैलैङ्गं निषिध्य पुनस्तत्त्रयस्य स्फोरणसामर्थ्यमपि तस्या एवेति शक्तिसम्बोधनपुरःसरं यथा प्रतिपादितम् -

न त्वमम्ब पुरुषो न चाङ्गना चित्स्वरूपिणी न षण्ढतापि ते।
नापि भर्तुरपि ते त्रिलिङ्गता त्वां विना न तदपि स्फुरेत् त्रयम्॥ –चिद्गगनचन्द्रिका, २७३ श्लोकः ।

श्वेताश्वतरोपनिषदि तु भङ्गिभेदेन परतत्त्वस्य त्रिलिङ्गतां प्रतिपाद्य बाल्ययौवनवार्द्धक्याद्यवस्थामयत्व–मपि प्रतिपादितम्–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।
त्वं जीर्णो दण्डेन वञ्चयसि त्वं जातो भवसि विश्वतोमुखः॥—श्वेताश्वतरोपनिषत्, ४।३।

७.३.७ शिवशक्त्योरभिन्नत्वम्

सर्वथानर्गलमनन्योन्मुखं स्वाच्छन्द्यमस्याः कालीशक्तेः। अत एव यदा सा स्वात्मानं परोपाधिकतया भासयितुं चेष्टते, तदा शिवस्य शक्तिरिति व्यपदेशं लभते, यदा तु स्वविश्रान्ततया तिष्ठति तदा चितिः, चित्, विमर्श इत्यादि। वस्तुतस्तु शिवशक्त्योर्यामलमेव तत्त्वम्। तयोः पार्थक्यचिन्तनमेव दुःशकम्। तत्राहङ्काररूपार्थेऽकार-हकारयोः प्रत्याहारन्यायेनानुत्तराकुलस्वरूपादकारादारभ्य शक्तिस्फाररूपहकलापर्यन्तं यद् विश्वं प्रसृतं तत्पुनरन्तः स्वीकृतं सदविभागवेदनात्मकबिन्दुरूपतया स्फुरितमनुत्तरेऽकारे विश्राम्यति। यथोक्तम्— अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः। हकारोऽन्त्यकलारूपो विमर्शः परिकीर्तित इति। तेन अकार एव शिवरूपो बिन्दुः, हकारश्चान्त्यकलारूपो नादः। तत्र शिव इति शक्तिरिति पृथक् पृथक् परामर्शो नास्ति। वर्गाधिष्ठात्र्यो ब्राह्म्याद्याः शक्तयो योनयः, ता एवाकारादिक्षकारान्ताः कलाः। एता मातृका एव पीठरूपाः पीठेश्वर्यः। शक्तिरेव सृष्टिक्रमप्रवर्तिका। शिवशक्त्योः स्वरूपं यामलभावापन्नं प्रकाशविमर्शात्मकमहन्तेदन्तारूपं ज्ञानक्रियात्मकं क्रमाक्रमरूपम्। क्रमतैव कालतत्त्वम्। कालाधीनं हि जगदिति सर्वोऽपि पदार्थः क्रमाक्रमतयैव भासते। शिवशक्त्योरविनाभावः सम्बन्धः। शिवः प्रकाशस्वरूपः, शक्तिश्च विमर्शरूपा, शक्तिरहितस्य शिवस्य जडप्रायत्वात्। अत एव शक्तेरेवैश्वर्यं वर्ण्यते। यद्यपि शिवोऽपि शक्तेः साहचर्येण वर्णितः, किन्तु शिवस्य शक्तिहीनत्वेऽकिञ्चित्करत्वात् शक्तेरेव प्राधान्यम्। स्थूलसूक्ष्मपररूपतया त्रिधा भिन्ना सा। जगतः स्फुरणं शक्त्यभिन्नशिवप्रकाशसम्बन्धेनैव। लोकेऽपि सर्वो व्यवहारो ज्ञानपूर्वकोऽहमित्यनुसन्धानपूर्वकमेव लक्ष्यते। उक्तञ्च—

स्थूलं सूक्ष्मं परं च त्रिविधमिह जगद् यत्प्रथावेशसिद्ध्या
युक्तं सत्ता यदीया स्फुरति च परतः स्वप्रथैकस्वभावा।
भामूर्तिर्यं विमर्शक्रियमनुपतिता लक्ष्यते लोकवृत्तिः
सन्मार्गालोकनाथ व्यपनयतु स वस्तामसीं वृत्तिमीशः॥—चिद्गगनचन्द्रिका, १।२।

प्रकाशविच्छुरितात्मशरीरः शिवः, अहमिति स्वरसोदिता विमर्शात्मिका परावाग्रूपा शक्तिः। एतौ मिथः समुदितौ षडध्वरूपं वाच्यवाचकरूपं जगन्निर्मिमाते। उक्तं हि—

याऽहमित्युदितवाक् परा च सा यः प्रकाशलुलितात्मविग्रहः।
यौ मिथः समुदिताविहोन्मुखौ तौ षडध्वपितरौ श्रये शिवौ॥—चिद्गगनचन्द्रिका, १।६।

षडध्वानश्च कलातत्त्वभुवनानि वाच्यरूपाणि, वर्णपदमन्त्राश्च वाचकरूपाः। तत्र विमर्शांशेन वाच्याध्वनः समुत्पत्तिः, प्रकाशांशेन तु वाचकाध्वनो वर्णादित्रयस्य। षडध्वेषु शिवशक्त्योरुभयोरपि जनकत्वोक्त्या द्वयोः कर्तृत्वं स्फुटम्। कर्ता च स्वतन्त्रः। स्वातन्त्र्ययोगेन कर्ता स्वं वपुः षोढा विभज्य कर्तृकर्मकरणादिव्यपदेशं भजन् करणतया स्वशक्तिमेव कलारूपां नियोज्य विश्वरूपतया भासते। कला च निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतभेदात् पञ्चधा। षट्त्रिंशत्तत्त्वानि पञ्चकलासु विभक्तानि, तद्यथा— यस्तत्त्वसर्गो निवर्तते सा निवृत्तिः कला पृथिव्याम्। जलादिप्रकृत्यन्ते वर्गे त्रयोविंशतितत्त्वेषु प्रतिष्ठा, पुरुषादिमायान्तेषु सप्तसु तत्त्वेषु विद्या, शुद्धविद्यादिशक्त्यन्तेषु चतुर्षु तत्त्वेषु शान्ता, शान्तिर्वा। शिवतत्त्वे शान्तातीता शान्त्यतीता वा कला। परमशिवरूपं तु कलातीतं निष्कलम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यतः षट्त्रिंशत्तत्त्वात्मके विश्वस्मिन् सर्वत्रापि कलाऽनुस्यूता, अत एव कला शक्तिपर्याया, शक्तिदशायां सर्वत्र कलनस्य व्याप्तत्वात्।

७.३.८ कालीतत्त्वं ब्रह्मापरपर्यायरूपम्

कालीतत्त्वं श्रुत्युक्तब्रह्मतुल्यम्। सत्यत्वेन प्रसिद्धं ब्रह्मवदेव। स्वस्वरूपे स्थिता कालीशक्तिः सर्वथाऽपरिच्छिन्ना क्रमरहिता, तथापि लोकानां जन्मस्थितिहेतुतया जगद्रूपतया स्फुरितं तस्या रूपं सक्रममेव। प्रकाशस्वरूपाद् बहिर्विजृम्भणमेव तस्याः कलना। अन्तःस्थितस्य विश्वस्येच्छामात्रेण बहिरुल्लासनमेव च विजृम्भणम्। कालिकारूपाया जगज्जनन्या वपू रजस्तमोभ्यामस्पृष्टं विशुद्धसत्त्वात्मकम्। ततो गुणत्रयमभिव्यज्यते। अतो भूतभौतिककारणीभूतं तत्त्रयं शक्तिजमपि ततो भिन्नमेव। ईश्वरनिष्ठं यदक्षयमैश्वर्यं यच्च तस्य विशुद्धं विज्ञानं पञ्चकृत्यकारित्वञ्च तत्सर्वं विरागप्रचुरायाः पूर्णात्मिकायाः शक्तेरेव बलम्, चिद्रूपस्य शिवस्य शक्तिसम्बन्धं विना तथात्वानुपपत्तेः। सृष्टौ तमसो बाहुल्यमपेक्षितम्। सिसृक्षोः संजिहीर्षोश्च शिवस्य सङ्कल्पमनुसृत्य सृष्टि-संहारयोर्व्याप्रियमाणा शक्तिर्जायमानं जगदवलोक्य सप्रकाशं तत् स्वात्मनि मज्जयन्ती प्रकाशपूर्णतया पूर्णिमा भवति। कालीशक्तिः स्वरूपस्थितौ कालमपि भक्षयित्वाक्रमतयावतिष्ठते। उक्तं हि—

पूर्णताकृशतयोर्यदन्तरं तत्र काली विजहत्क्रमे स्थिता।
दर्शितक्रमविभागसंभ्रमं कालमद्यतनमत्तुमीहसे॥—चिद्गगनचन्द्रिका, २२।

क्रमाक्रमात्मा कालश्च परः संविदि वर्तते। कालीनाम पराशक्तिः सैव देवस्य गीयते।(तन्त्रालोकः, ६। २३) इति शक्तेरेव कालाधिष्ठातृत्वं प्रविभावितम्। सर्वो विकल्पः संसार इत्युक्त्या मातृमेयमितिलक्षणं कुलमिति रीत्या कुलस्य विश्वात्मकतया विश्वोत्तीर्णस्वरूपायाः शक्तेर्महत्त्वं द्योत्यते। क्रमवत्वात् क्रमः सर्गः। क्रमसंहारवत्वात् क्रमः प्रलयः। तौ च दृष्टिसृष्टिवादानुसारं विमर्शात्मकौ। तयोश्चाधिष्ठानत्वात् पराप्रकृतिः शक्तिः क्रमाक्रममयी। तस्याश्च शिवोपाधिकतया तन्मध्यमः शिवः, यथा घटादिमध्यममाकाशम्। तञ्च शिवं निमित्तकारणत्वेनाश्रित्य स्वयमुपादानकारणरूपा शक्तिः कालभेदेन क्रममक्रमञ्च सृजति तत्तद्रूपतया भासते वा। शिवतत्त्वमेव संविद्रूपमेकं वेदकम्। तस्यैव त्वनादिभावरूपया मायया शक्त्या वा विवर्तभूतानि कल्पितानि वेद्यानि। ।

८. निष्कर्षः

शिवशक्त्योः सामरस्यैकात्तया सर्वोऽपि द्वैतव्यवहारः शक्त्या स्वस्मिन् प्रविलाप्य तया जगद्भक्षणात्मकेन चिन्मयेन वपुषा स्थीयते। स्थूलसूक्ष्मपररूपभेदत्रैविध्यमास्थाय शक्तिरेकाऽपि त्रिरूपतयावभासमाना स्थूलविग्रहरूपेण दशमहाविद्यादिवपुषा सूक्ष्मविग्रहात्मना चिदाकाशाक्रमताशीलतया अतीन्द्रियवाङ्मनसमात्र-गोचरतया परामृश्यते। परात्मना च वाङ्मनसयोरप्यगोचरतया परमोर्ध्वगेऽण्डचतुष्ट्यादप्यूर्ध्वगे पथि कार्यकारण-भावातीते सामरस्यात्मकेऽनुभूयते योगिभिः। अकारादियकारान्तवर्गसप्तकविरचितविग्रहा वाक्शक्तिः समस्तं वाङ्मयं सप्तधा वमन्ती वान्तया तया शब्दार्थोभयरूपया वाचा स्वाश्रितान् स्वभक्तान् परं व्योमात्मकं शिवं शान्तमुखं प्रापयति, न त्वपरं शिवम्। प्रत्यगात्मनि परप्रमातरि स्थिता परावाग्रूपा कालीशक्तिः परापश्यन्ती-मध्यमावैखरीरूपैस्स्चितुर्भिर्भावैरभिधीयते। एतेन परशक्तिरूपायाः कालिकायाः सर्वकारणत्वात् सर्वात्मकत्वञ्च ज्ञायते। एकैव सा पराशक्तिः सृष्टिदशायां प्रथमं ज्ञानेच्छाक्रियाशक्तिरूपेण पुनः प्रबुद्धा सती खेचरत्वं समुपाश्रिता खेचरी, दिशि स्फारिता दिक्चरी, अन्तःकरणरूपा गोष्विन्द्रियेषु सम्प्राप्ता गोचरी, भावेषु प्राप्ता भूचरी,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नानात्मानमाविर्भाव्य स्वं पारमार्थिकं रूपमाभासयति। इत्थमकैव चिद्रूपा भगवती साधकानां हितार्थाय विविधस्वरूपमाधत्ते। इति शिवम्॥

सन्दर्भसामग्रीसूची

एवेलोन आर्थर (सं.)(ई.सं.१८८४), महानिर्वाणतन्त्रम्, कलिकाता : जीवानन्द विद्यासागर भट्टाचार्य।

कौल, मधुसूदनः (सं.)(ई.सं.१८९२), स्वच्छन्दतन्त्रम्, मुम्बई : निर्णय सागर प्रेस।

गुप्तः, अभिनवः, (ई.सं.२००२), श्रीतन्त्रालोकः (विवेकव्याख्यासहितः), राधेश्याम चतुर्वेदी, (सं.), वाराणसी : चौखम्बा विद्याभवन।

गुप्तः, मुनिलालः (सं.), (वि.सं.२०३३), विष्णुपुराणम्, गोरखपुर : गीताप्रेस।

झा, किशोरनाथः (सं.) (१९७६ ई.), महाकालसंहिता (गुह्यकालीखण्डः), इलाहावादः : गङ्गानाथझा केन्द्रीय-संस्कृत-विद्यापीठम्।

द्विवेदः, व्रजवल्लभः (सं.) (१९९२ ई.), महार्थमञ्जरी (परिमलव्याख्योपेता), वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

पणशीकरः, वासुदेवलक्ष्मणः(सं.) (ई.सं.१९९०), ईशाद्यष्टोत्तरशतोपनिषदः, वाराणसी : चौखम्बा विद्याभवन।

पाण्डे, रामतेजः(सं.) (ई.सं.२००३), देवीभागवतम्, वाराणसी : चौखम्बा विद्याभवन।

पाण्डेयः, रघुनाथः (वि.सं. २०२६), कालीविद्या कालीशक्तिश्च, योग—तन्त्र—विमर्शिनी, १ अङ्कः, वाराणसी : वाराणसेय—संस्कृत—विश्वविद्यालयः।

प्रिस्टन, जे.(१९८०), कल्ट अफ् द गडेस, न्यू दिल्ली : विकास पब्लिसिङ हाउस।

बोडासः, राजारामः तथा गोरै, शिवरामः(सं.) (ई.सं.१९४५), ऋग्वेदः(सायणभाष्यसहितः), बम्बई : बम्बई टेक्नोलोजिकल पब्लिकेसन फन्ड।

भट्टाचार्यः, विनयतोषः(सं.), (ई.सं. १९३२), शक्तिसङ्गमतन्त्रम् (कालीखण्डः), बरोदा : ओरिएन्टल इन्स्टिच्युट।

मिश्रः, रघुनाथः, (१९७९ई.), चिद्गगनचन्द्रिका, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

शास्त्री, महादेवः(सं.) (ई.सं.१९८५), तैत्तिरीयारण्यकम्, दिल्ली : मोतीलाल बनारसीदास।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहभगणविमर्शः

सहप्रा. मुरलीधरदाहालः
वाल्मीकिविद्यापीठम्

शोधसारः

प्रस्तुते शोधलेखे ग्रहयोर्गतिकारणवशात् कथं भगणपूर्तिं कुर्वन्तीति प्रदर्शनमेव विहितं वर्तते। पौरस्त्य-ज्योतिषवाङ्मये सूर्यादिग्रहाणां गतिकारणवशाद् भगणपूर्तिकालः प्रदर्शितोऽस्ति। भानां द्वादशराशीनां गणः समूह इति भगणः, समस्तस्य चक्रस्य भगण इति संज्ञा। किमपि नक्षत्रमारभ्य स्वगत्या परिभ्रमन् ग्रहो यदा पुनस्तदेव नक्षत्रमुपयाति तावान् कालः भगणो नाम। ग्रहाः स्वस्वकक्षायां भिन्नभिन्नगतिभिर्भ्रमन्ति। अतस्तेषां सामान्योच्च-शीघ्रपातभगणा अपि अतुल्या भवन्ति। योजनात्मकगत्या सर्वे ग्रहाः समा एव स्वस्वकक्षायां प्रचलन्ति। ग्रहा वृत्ते भ्रमन्ति। वृत्तानि चक्रकलाङ्कितानीति पूर्वाऽऽचार्याणां मतम्। लघुकक्षो ग्रहः शीघ्रगतिः, महत्कक्षो ग्रहो मन्दगतिः। तुल्यगतियोजनेन भ्रमन् मन्दगतिग्रहो बृहत्कक्षत्वान्महता कालेन, शीघ्रगतिग्रहस्तु लघुकक्षत्वादल्पेन कालेन भगणपूर्तिं करोति। पूर्वगत्या रविर्यावता कालेनैव चक्रं भुनक्ति तावानेको भगणः। अतो युगे कल्पे वा यावन्ति सौरवर्षाणि तावन्तो रविभगणाः। बुधशुक्रौ सदा रवेरग्रतः पृष्ठतो वा समीपस्थावनुचराविव व्रजन्तौ गच्छन्तौ दृश्येतेऽतस्तयोरपि भगणास्तुल्याः। ग्रहभ्रमणवृत्तस्य यो बिन्दुर्भूकेन्द्रात् सुदूरे भवति स एव उच्चः। तथा यो बिन्दुः भूकेन्द्रात् सन्निकटे भवति स नीचः। प्रथमद्वितीयदिनयोरस्फुटचन्द्रयोरन्तरं तस्य स्फुटा गतिः। ततः तौ प्रथम-द्वितीयदिनयोश्चन्द्रौ मध्यमौ कृत्वा तयोरन्तरं चन्द्रस्य मध्यमा गतिः। ततो यद्येकदिनेनैतावती चन्द्रगतिस्तदा युगदिनैः कल्पकुदिनैर्वा किमित्यनुपातेन चन्द्रभगणाः सिध्यन्ति।

शब्दकुञ्जीः– *भगणः, मन्दोच्चम्, शीघ्रोच्चम्, पातः, ग्रहः, नक्षत्रम्।*

विषयपरिचयः

भानां द्वादशराशीनां गणः समूहो भगण इत्युच्यते। सम्पूर्णराशिचक्रस्य भगण इति संज्ञा। किमपि नक्षत्रमारभ्य स्वगत्या परिभ्रमन् ग्रहो यदा पुनस्तदेव नक्षत्रमुपयाति तावान् कालो भगणः। इष्टकालिकग्रहसाधनोपयोगितया भगणादिज्ञानस्याऽऽवश्यकत्वाद् ग्रहसाधकानुपातफलभूता ग्रहमन्दोच्चशीघ्रोच्चपातभगणाः पूर्वाऽऽचार्यैः पठिताः। उपपत्त्या ये भगणाः सिध्यन्ति ते ग्राह्याः। ते च संख्यया कियन्तः? कल्पे युगे वेति विवेकीकरणाय तद्विनिगमोपपत्तौ इयं गोलयुक्तिः कथ्यते, सैव तावद् भगणोपपत्तिशब्देनोच्यते। ग्रहाः स्वस्वकक्षायां भिन्नभिन्नगतिभिर्भ्रमन्ति। भिन्नगतिवशाद् भानी राशीन् नक्षत्राणि भुञ्जते ग्रहा भुञ्जन्तीत्यर्थः। अतस्तेषां सामान्योच्चशीघ्रपातभगणा अपि अतुल्या भवन्ति। पूर्वगत्या सूर्यो यावता कालेनैकं चक्रं भुनक्ति तावनेको भगणः। लघुकक्षो ग्रहः शीघ्रगतिः महत्कक्षो ग्रहो मन्दगतिः। तुल्यगतियोजनेन भ्रमन् मन्दगतिग्रहो बृहत्कक्षत्वान्महता कालेन, शीघ्रगतिग्रहस्तु लघुकक्षत्वादल्पेन कालेन भगणभ्रमणं करोति। तत्र प्रवहवायुवेगवशाद् अतिवेगेन तारकादिभिः सह निरन्तरं पश्चिमाभिमुखं गच्छन्तो ग्रहाः स्वस्वकक्षावृत्तस्था नक्षत्रपराजिता इव स्वस्थानात् पूर्वदिशि लम्बायमाना दृश्यन्ते। स्वस्वकक्षायां ग्रहा योजनात्मकमानेन तुल्यमेव क्षेत्रमाक्रामन्ति। परन्तु कक्षावृत्तस्य ऊर्ध्वोर्ध्वक्रमेण महत्वाद् ग्रहाणां भगणकालो भिन्नो भिन्नो भवति। कक्षावृत्ते समानयोजनं गच्छतामपि तेषां कोणीयमानमधिकमल्पमेव भवति। प्रतीचिदिगभिमुखैर्नक्षत्रैः सह ग्रहाः प्रवहवायोः शीघ्रतरगति-वशान्निरन्तरं गच्छन्तः स्वकक्षवृत्तस्था जीयमाना प्रवहवायोः प्रत्यग्भ्रमेण सखगे भचक्रे शीघ्रं भ्रमन्ति। तत्तस्मात् प्रवहाद् अल्पगत्या स्वमार्गे स्वस्वकक्षायां गतास्ते खेचराः सदैव पूर्वदिशं परिचरन्ति। अर्थाद् ग्रहस्य स्वकीया गतिस्तु पूर्वाभिमुखी वर्तते परन्तु यस्मिन् वायौ तस्य भ्रमणकक्षाऽस्ति तस्य पश्चिमाभिमुखाभिकगतित्वाद् ग्रहगतिः पश्चिमाभिमुख्येव लक्ष्यते। येन प्रवहस्य महद्गतौ

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहस्य स्वल्पगतेः पूर्वाभिमुखाणां नक्षत्राणां दृग्गोचरत्वं न जायते। तेन ग्रहादीनामाकाशगतानां पूर्वोदयः प्रतीच्यामस्तमयश्च सर्वजनैः सन्दृश्यते। तत्र भचक्रे इन्दुपूर्वा ग्रहाः यथोत्तरं स्वाग्रिमराशिभानां पूर्वक्रमान्नक्षत्राणि ग्रहाणि च भोगं प्रकुर्वन्ति। यथा कस्मिन्नपि दिने यस्मिन्नक्षत्रे चन्द्रो दृश्यते तद्द्वितीयदिने तत्पूर्वभागे चन्द्रस्यावस्थानदर्शनात् स्फुटं ग्रहगतेः प्रागगतित्वमिति। अतो ग्रहाणां गतिकारणवशाद् भगणपूर्तेर्विवेचनमनुसन्धानेऽत्र क्रियते।

समस्याकथनम्

प्रस्तुतेऽनुसन्धानात्मकलेखे प्रमुखरूपेण समस्याद्वयं दृष्टिपथं समायाति। यथा–

(क) किन्नाम भगणः?

(ख) सूर्यादिग्रहाणां भगणसंख्याः कति?

अध्ययनस्योद्देश्यम्

अस्याऽनुसन्धानात्मक–लेखस्य समस्याकथने प्रयुक्तसमस्ययोः समाधानस्याऽन्वेषणमेव उद्देश्यं वर्तते। यथा –

(क) भगणस्य परिचयप्रदानम्।

(ख) सूर्यादिग्रहाणां भगणपूर्तिकालप्रदर्शनम्।

अनुसन्धानविधिः

(क) सामग्रीसङ्कलनविधिः

प्रस्तुतलेखस्योपस्थापने सामग्रीसङ्कलनाय पुस्तकालयीयध्यायनविधिः प्राधान्येन प्रयुक्तः। शोधकार्यस्यैतस्य सामग्रीसङ्कलनार्थं विविधपुस्तकालयानामुपयोगो विहितो वर्तते। तथा चाऽन्तरजालमाध्यमेन सामग्रीणामन्वेषणं विधाय यथावश्यकं प्रयोगश्च कृतो वर्तते।

(ख) शोधविधिः

अत्र लघुशोधलेखे तावन् निगमनात्मकविधेः प्रयोगं विधाय व्याख्यात्मको विधिर्विश्लेषणात्मको विधिश्चाऽनुसृतः। तत्र यथाऽऽवश्यकं सामग्रीसङ्कलनाय पुस्तकालयीयविधेः प्रयोगो विहितः। पुस्तकालयं गत्वा विभिन्नानि विषयसम्बद्धपुस्तकान्यवलोक्य मधुकरपद्धत्या तत्रस्थानि विषयवस्तूनि सङ्कलय्याऽऽवश्यकसामग्रीणां सङ्कलनं कृतम्। तथैव गद्यांशस्य सन्दर्भप्रदाने लेखकमितिपद्धतिः (एपिए) प्रयुक्ता चेद् आवश्यकश्लोकानामुद्धरणे तु प्राचीनपद्धत्या एवाऽनुसरणं स्वीकृतं विद्यते।

सीमाङ्कनम्

सर्वप्रसिद्धं ज्योतिषशास्त्रमेवाध्ययनस्यास्य प्रमुखं क्षेत्रमस्ति। तच्छास्त्रमधिकृत्य तत्स्वरूपं तत्प्रयोजनञ्च सप्रमाणं निर्धार्यते। ज्योतिषशास्त्रान्तर्गतानि सर्वाण्यपि ज्योतिषस्याऽङ्गोपाङ्गभूतानि ग्रन्थरत्नानि तत्रोद्घाटितानि तथ्यानि चास्य क्षेत्रान्तर्गतानि सन्ति।

भगणपरिचयः

प्रथमं को नाम भगण इत्यत्रोच्यते- भानां द्वादशराशीनां गणः समूहो भगण इति। किमपि नक्षत्रमारभ्य स्वगत्या परिभ्रमन् ग्रहो यदा पुनस्तदेव नक्षत्रमुपयाति तावान् काल एव भगणसंज्ञकः। समस्तस्य चक्रस्य भगण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति संज्ञा। शीघ्रगतिग्रहस्तानि भानि स्वल्पेन कालेन भुनक्त्यल्पगतिग्रहो बहुकालेन भुनक्ति। तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवति। क्रान्तिवृत्ते द्वादशराशीनां सत्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत्- स्थानादारभ्य चलितो ग्रहः पुनस्तद् स्थानमायाति स चक्रभोगः परिवर्तनसंज्ञोऽपि द्वादशराशि-भोगाद् भगण इत्यर्थः। पौष्णस्य रेवतीयोगताराया अन्ते निकटे प्रदेशे तथा च रेवतीयोगताराऽऽसन्नाऽग्रिमस्थानमेव ग्रहाणां भगणपूर्णो भवति। उक्तञ्च-

शीघ्रगस्तान्यथाऽल्पेन कालेन महताऽल्पगः।
तेषां तु परिवर्तेन पौष्णान्ते भगणः स्मृतः॥[१]

सूर्यसिद्धान्तानुसारेण भगणस्वरूपमाह- यथा मूर्तकाले प्राणकाल आदिभूतस्तथा क्षेत्रपरिभाषायां विकलाः सूक्ष्मादिभूतास्तासां षष्ट्यैककला, कलानां षष्ट्या भागोंऽशः क्षेत्रपरिभाषाऽभिज्ञैः कथ्यते। भागत्रिंशता राशिः स्यात्। ते सकला द्वादशराशयः भोगकालः भगणः। यथाऽऽह-

विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।
तत् त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते॥[२]

इष्टकालिकग्रहसाधनोपयोगितया भगणादिज्ञानस्याऽऽवश्यकत्वाद् ग्रहसाधकाऽनुपातफलभूता ग्रहमन्दोच्चशीघ्रोच्चपातभगणाः पूर्वाऽऽचार्यैः पठिताः। उपपत्त्या ये भगणाः सिध्यन्ति ते ग्राह्याः। ग्रहाः स्वस्वकक्षायां भिन्नभिन्नगतिभिर्भ्रमन्ति। अतस्तेषां सामान्योच्चशीघ्रपातभगणा अपि अतुल्या भवन्ति। ग्रहाणां गतिकारणविषये यथाऽऽह-

अदृश्यरूपाः कालस्य मूर्तयो भगणास्मृताः।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः॥

तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः।
प्राक्पश्चादपकृष्यन्ते यथासन्नं स्वदिग्मुखम्॥[३]

प्रवहवायोः प्रत्यग्भ्रमेण सखगे भचक्रे शीघ्रं भ्रमति। तत्तस्मात् प्रवहाद् अल्पगत्या स्वभागे स्वस्वकक्षायां गतास्ते खचराः सदैव पूर्वदिशं भ्रमन्ति। येन प्रवहस्य महद्गतौ तद्ग्रहस्य स्वल्पगतेः पूर्वाभिमुखाणां नक्षत्राणां दृग्गोचरत्वं न जायते। तेन ग्रहादीनामाकाशगतानां पूर्वोदयः प्रतीच्यामस्तमयश्च सर्वजनैः सन्दृश्यते। यथा कस्मिन्नपि दिने यस्मिन्नक्षत्रे चन्द्रो दृश्यते तद्द्वितीयदिने तत्पूर्वभागे चन्द्रस्याऽवस्थानदर्शनात् स्फुटं ग्रहगतेः प्राग्गतित्वमिति। अतः ग्रहाणां गतिकारणवशाद् भगणपूर्तिर्भवति। यथाऽऽह-

पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः।
जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः॥

प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः।
परिणाहवशाद् भिन्ना तद्वशाद् भानि भुञ्जते॥[४]

योजनात्मकगत्या सर्वे ग्रहाः समा एव स्वस्वकक्षायां भ्रमन्ति। ग्रहकक्षासमयोजनैश्चक्रकलाः प्राप्यन्ते तदा ग्रहगतियोजनैः किमिति कला इत्यनुपातेन योजनात्मिकाः कला भवन्ति। तस्माद् यस्य कला बृहती स्यात्तस्य लघुत्वं

---

१. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकः २७।

२. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकः २८।

३. सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लोकौ १,२।

४. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकौ २५, २६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यस्य च लघ्वी कक्षा तस्य कलाया महत्त्वं भवति। भूकेन्द्राऽभिप्रायिकग्रहभगणकल्पनायां शनेः कक्षा सर्वोपरि स्थिताऽस्ति। अतः सा महती, चन्द्रस्य कला सर्वाधः स्थिता वर्ततेऽतः सा लघ्वी। अतो यस्य च लघ्वी कक्षा तस्य चक्रस्यैककलायाश्चापं महत्त्वं, यस्य च लघ्वी कक्षा तस्य लघुत्वम्। अत एव शनेः कलात्मिका मध्यमा गतिर्न्यूनतमा भवति चेच्चन्द्रस्य कलात्मिका मध्यमा गतिर्महत्तमा भवति। अतो लघुकक्षाग्रहः शीघ्रगतिः, महत्कक्षाग्रहो मन्दगतिर्भवति। तुल्यगतियोजनेन भ्रमन् मन्दगतिग्रहो बृहत्कक्षत्वान्महता कालेन भगणपूर्तिं करोति। शीघ्रगतिग्रहस्तु लघुकक्षत्वादल्पेन कालेन भगणभ्रमणं करोति।

यथाऽऽह–

कक्षा सर्वा अपि दिविषदां चक्रलिप्ताङ्किताास्ता वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ता।
तस्मादेते शशिजभृगुजादित्यभौमेज्यमन्दा मन्दाक्रान्ता इव शशधराद् भान्ति यान्तः क्रमेण॥[५]

सूर्यबुधशुक्राणां भगणाः

पूर्वाभिमुखगत्या रविर्यावता कालेनैकं चक्रं भुनक्ति तावानेको भगणः। अतो युगे कल्पे वा यावन्ति सौरवर्षाणि तावन्तो रविभगणा भवन्ति। तेनैकस्मिन् कल्पे ४३२०००० सौरवर्षाणि भवन्ति। अतो रविभगणा अपि तावन्त एव। बुधशुक्रौ सदा रवेरग्रतः पृष्ठतो वा समीपस्थावनुचराविव गच्छन्तौ दृश्येते। अतस्तयोरपि भगणा रवेर्भगणतुल्याः। तथैव युगे पूर्वगामिनां भौमशनिगुरुशीघ्राणां भगणाः सूर्यज्ञशुक्राणां तुल्या भवन्ति। यथाऽऽह–

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः।
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम्॥[६]

युगे चन्द्रादिग्रहाणां भगणाः

यथोक्तविधिना स्फुटचन्द्राच् चन्द्रभगणः साध्यः। क्रान्तिवृत्तस्य स्वविमण्डलगतस्य चन्द्रस्य बिम्बस्य च वेधवृत्ते यावदन्तरं तावत्तस्य विक्षेपः। ततो यावतीषु रात्रिगतघटिकासु वेधः कृतस्तावतीष्वेव घटिकासु द्वितीयदिनेऽपि वेधः कर्तव्यः। एवं प्रथमद्वितीयदिनयोरस्फुटचन्द्रयोरन्तरं तस्य स्फुटा गतिः। अतस्तौ प्रथमद्वितीयदिनयोश्चन्द्रौ 'स्फुटग्रह-मध्यखगं प्रकल्प्य' (आचार्यः, भास्करः, वि.सं.२०५५ : पृ.१२८) इत्यादिना स्फुटग्रहान्मध्यमौ कृत्वा तयोरन्तरं चन्द्रस्य मध्यमा गतिः। ततो यद्येकदिनेनैतावती चन्द्रगतिस्तदा युगदिनैः कल्पकुदिनैर्वा किमित्यनुपातेन चन्द्रभगणाः सिध्यन्ति। सूर्यसिद्धान्तानुसारेण युगे चन्द्रभगणा रसाग्नित्रित्रीषु सप्तभूधरमार्गणाः अर्थात् ५७७५३३३६ मिताः कथिताः। तथैव भौमस्य दस्रत्र्यष्टरसाङ्काक्षिलोचनानि २२९६८३२, बुधशीघ्रोच्चस्य अदृश्यरूपस्य पूर्वगतेर्भगणाः शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः १७९३७०६०, बृहस्पतेर्भगणाः खदस्राक्षिवेदषड्वह्नयः ३६४२२० भवन्ति। अथ शुक्रशीघ्रोच्चस्य अदृश्यरूपस्य पूर्वगतेर्भगणाः षट्सप्तत्रियमाश्विखभूधराः ७०२२३७६, शनेर्बिम्बात्मकस्य भगणा भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ तथैव चन्द्रमन्दोच्चस्य पूर्वगतेरदृश्यरूपस्य भगणा महायुगेऽग्निशून्याश्विवसुसर्पार्णवाः ४८८२०३ तथा पातस्य (राहुकेत्वोः) पश्चिमाभिमुखगतित्वाद् अर्थाद् विपरीतगतित्वाद् भगणसङ्ख्या वस्वग्नियमाश्विशिखिदस्रकाः २३२२३८ भवन्ति। यथाऽऽह–

इन्दो रसाग्नित्रित्रीषु सप्तभूधरमार्गणाः।
दस्रत्र्यष्टरसाङ्काक्षिलोचनानि कुवस्य तु॥

---

५. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकः २९।

६. सिद्धान्तशिरोमणौ ग्रहगणिते मध्यमाधिकारः, श्लोकः २७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः॥
चन्द्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा युगे।
वामं पातस्य वस्वग्नियमाश्विशिखिदस्रकाः॥[७]

विभिन्नसिद्धान्तानुसारं ग्रहाणां भगणसङ्ख्या प्रस्तूयते।

युगे चन्द्रभगणाः

सूर्यसिद्धान्ते- ५७७५३३३६

रोमकसिद्धान्ते- ५७७५१५८०

वेदाङ्गज्योतिषे- ५७८८८०००

पितामहसिद्धान्ते, ब्रह्मगुप्तश्रीपतिभास्करमतेषु- ५७७५३३०० पूर्वोक्तचन्द्रस्य महायुगीयभगणसङ्ख्या रोमकसिद्धान्तापेक्षया सूर्यसिद्धान्तपुलिशसिद्धान्ताभ्यां ब्रह्मगुप्तस्य सन्निकटा अस्ति।

युगे भौमस्य भगणाः

सूर्यसिद्धान्ते, पौलिशसिद्धान्ते च - २२९६८२४

वर्तमानसिद्धान्तपञ्चके, मकरन्दे, सौरपक्षे च - २२९६८३२

भास्करमते- २२९६८२८

ब्राह्ममते- २२९६८२८

वटेश्वरमते- २२९६८२८

आधुनिकमतस्य निकटे तु सौरमतं दृश्यते।

युगे गुरोर्भगणाः

सूर्यसिद्धान्ते, वर्तमानसिद्धान्तपञ्चके, वटेश्वरकमलाकरमुनीश्वराणां मतेषु पौलिशसिद्धान्ते च - ३६४२२०

प्रथमार्यभटमते- ३६४२२४

मकरन्दमते- ३६४२१२

ब्राह्ममते- ३६४२२६

भास्करमते- ३६४२२६

युगे शनेर्भगणाः

पौलिशमते, प्रथमार्यभटमते, मूलसूर्यसिद्धान्तेषु - १४६५६४

वटेश्वरमते- १४६४६८

सूर्यसिद्धान्ते ब्राह्ममते च - १४६५६७

७. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकाः ३०-३३।

 ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहोच्चभगणाः

भूकेन्द्रात् सुदूरे ग्रहभगणवृत्तस्य यो बिन्दुर्भवति स एवोच्चः कथ्यते। तथा भूकेन्द्राद् यो बिन्दुः सन्निकटे भवति स नीचः। उक्तञ्च– "उच्चस्थितो व्योमचरः सुदूरे नीचस्थितः स्यान्निकटे धरित्र्याः" (भास्करः,वि.सं.२०५५ : ३८९)। ग्रहोच्चविषये यथाऽऽह–

> **भ्रमन् ग्रहः स्वे प्रतिमण्डले नृभिः स यत्र कक्षावलये विलोक्यते।**
> **स्फुटये हि तत्रास्य फलोपपत्तये प्रकल्पितं तुङ्गमिहाद्यसूरिभिः॥**
>
> **यः स्यात् प्रदेशः प्रतिमण्डलस्य दूरे भुवस्तस्य कृतोच्चसंज्ञा।**
> **ज्ञोऽपि प्रदेशश्चलितीति तस्मात् प्रकल्पिता तुङ्गगतिर्गतिज्ञैः॥**
>
> **उच्चाद्भषट्कान्तरितं च नीलं मध्यः स्वनीचोच्चसमो यदा स्यात्।**
> **कक्षास्थमध्योपरि कर्णसूत्रपातात् स्फुटे मध्यमस्तदानीम्॥**[८]

उच्चस्थाने विद्यमाने ग्रहे मध्यस्पष्टग्रहयोरभेदत्वं ग्रहगतेः परमाल्पत्वं च भवति। ग्रहवेधोक्तविधिनाऽभीष्ट-ग्रहस्य मध्यस्फुटग्रहाभेदस्थानं उच्चं विज्ञाय ततो यावता कालेन ग्रहः पुनः उच्चं प्राप्नोति तदुच्चयोरन्तरकालं विज्ञाय यद्यतावता कालेनैतावत्युच्चगतिः प्राप्यते तदा युगकालेन कल्पकालेन वा किमित्यनुपातेन तत्तद्ग्रहोच्चभगणाः सिध्यन्ति। सूर्यसिद्धान्तानुसारेण भौमशनिगुरुशीघ्राणां भगणाः ४३२०००० भवन्ति (पाण्डे, ई.२००२ : १९)। तथैव बुधशीघ्रस्य, शुक्रशीघ्रस्य, चन्द्रोच्चस्य च क्रमेणः १७९३७०६०, ७०२२३७६, ४८८२०३ युगे भगणा भवन्ति (पाण्डे, ई.२००२ : १९,२०)।

ग्रहपातभगणाः

प्रथमं को नाम पात इत्यत्रोच्यते– ग्रहविमण्डलक्रान्तिवृत्तयोर्योगस्थानमेव पात इति कथ्यते। *विमण्डले भवृत्तस्य सम्पातः पात उच्यते* (दाहालः, वि.सं.२०७१ : २०)। सर्वेऽपि ग्रहाः कस्मिन्नपि वृत्त एव स्वस्वकक्षायां भ्रमन्ति। ग्रहभ्रमणवृत्तानि सर्वेषां पृथक् पृथग् भवन्ति। यस्मिन् वृत्ते यो भ्रमति स एव तस्य ग्रहस्य विमण्डलम् इत्युच्यते। रविभ्रमणवृत्तस्य क्रान्तिवृत्तसंज्ञया तस्य कृते विमण्डलस्य कथनं नास्ति। अतश्चन्द्रादय एव ग्रहा विमण्डले भ्रमन्ति। विमण्डलवृत्तस्य पृष्ठकेन्द्राणि विकदम्बसंज्ञक नक्षत्राणि मन्यन्ते। ग्रहविमण्डलक्रान्ति-वृत्तयोर्योगस्थानमेव पात इति कथ्यते। योगोऽयं स्थानद्वयं भवति। अतः पातावपि द्वौ भवतः। यथाऽऽह–

> **यत्र गच्छन्ति चन्द्राद्यास्तद्विमण्डलमुच्यते।**
> **तत्तु चन्द्रादि–खेयना–मूहनीयं पृथक् पृथक्॥**
>
> **विकदम्बाभिधं तस्य पृष्ठकेन्द्रमुदाहृतम्।**
> **विमण्डले भवृत्तस्य सम्पातः पात उच्यते॥**[९]

विषुवत्क्रान्तिबलयोः पूर्वसम्पाताद् विमण्डलं क्रान्तिवृत्तादुत्तरे भवति। पश्चिमसम्पाताद् विमण्डलं दक्षिणे भवति। अतः पूर्वसम्पाताद् विषुवत्–क्रान्तिवृत्तयोरन्तररूपो दक्षिणः शरः क्षीणतामुपगता उत्तरतो वर्धिष्णुर्भवति। तत्र दक्षिणशराऽभावस्थानं वेधेन ज्ञात्वा तत्प्रथमं पातस्थानमवगन्तव्यम्। ततो ग्रहो यावता कालेन पुनर्यदा तद्दक्षिणशराऽभावस्थानगतो भवेत्तावान् कालः गणनीयः। ततो यद्यतावता कालेनैतावती पातगतिस्तदा युगकालेन

८. सिद्धान्तशिरोमणौ गोलाध्याये, छेद्यकाधिकारः, श्लोकाः १९-२१।

९. गोलपरिभाषा, श्लोकौ ३४,३५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कल्पकालेन वा किमित्यनुपातेन युगे कल्पे वा ग्रहपातभगणाः आयान्ति। पातयोः (राहुकेत्वोः) पश्चिमाभिमुखगतित्वाद् अर्थाद् विपरीतगतित्वाद् भगणसंख्याः २३२२३८ भवन्ति। उक्तञ्च- *वामं पातस्य वस्वग्नियमाश्विशिखिदस्रकाः* (पाण्डेः, ई.२००२ : २०)।

निष्कर्षः

ग्रहाः स्वस्वकक्षायां भिन्नभिन्नगतिभिभ्रमन्ति। अतस्तेषां सामान्योच्चशीघ्रपातभगणा अपि अतुल्या भवन्ति। योजनात्मकगत्या सर्वे ग्रहाः समा एव स्वस्वकक्षायां प्रचलन्ति। ग्रहाः वृत्ते भ्रमन्ति। वृत्तानि चक्रकलाङ्कितानीति पूर्वाऽऽचार्याणां मतम्। अतो ग्रहकक्षासमयोजनैश्चक्रकलाः प्राप्यन्ते तदा ग्रहगतियोजनैः कियत्यः कला इत्यनुपातेन योजनसम्बन्धीयाः कला भवन्ति। तस्माद् यस्य कला बृहती स्यात्तस्य कलाया लघुत्वं यस्य च लघ्वीकक्षा तस्य कलाया महत्त्वं भवति। सिद्धान्तज्योतिषग्रन्थेषु वर्णितं भूकेन्द्राभिप्रायिकग्रहभगणकल्पनायां ग्रहाणां कक्षाक्रमानुसारेण शनेः कक्षा सर्वोपरिस्थिताऽस्ति। अतः सा महती, चन्द्रस्य कक्षा सर्वाधः स्थितत्वाल्लघ्वी। एतेन लघुकक्षो ग्रहः शीघ्रगतिः, महत्कक्षो ग्रहो मन्दगतिः। तुल्यगतियोजनेन भ्रमन् मन्दगतिग्रहो बृहत्कक्षत्वान्महता कालेन, शीघ्रगतिग्रहस्तु लघुकक्षत्वादल्पकालेन भगणपूर्तिं करोति। ग्रहभगणवृत्तस्य यो बिन्दुर्भूकेन्द्रात् सुदूरे भवति स एवोच्चः। ग्रहभगणवृत्तस्य यो बिन्दुर्भूकेन्द्रात् सन्निकटे भवति स नीचः। उच्चस्थाने स्थिते ग्रहे मध्यस्पष्टग्रहयोरभेदत्वं ग्रहगते परमाल्पत्वं च भवति। क्रान्तिवृत्तस्य ग्रहविमण्डलस्य च सम्पातः पात इत्युच्यते। ग्रहपातभगणा युगभगणाः कल्पभगणा वा भवन्ति। ग्रहाणां भगणासंख्याविषये विभिन्नसिद्धान्तानुसारेण भिन्नभिन्नसंख्याः समुल्लिखिताः सन्ति। चन्द्रस्य महायुगीयभगणसंख्या रोमकसिद्धान्तापेक्षया सूर्यसिद्धान्तपुलिशसिद्धान्ताभ्यां ब्रह्मगुप्तस्य सन्निकटा अस्ति। अत्र सौरमतमााधुनिकमतस्य निकटं दृश्यते। गणेशदैवज्ञानुसारमार्यपक्षीयभौमस्तदानीं दृक्तुल्यमासीत्। किन्त्वधुना न तथा ३६४२२० मितगुरुभगणाधारे भास्वतीकरणोक्तः क्षेपको न हि आयाति। परं ३६४२२४ मितगुरुभगणाधारे भास्वतीकरणोक्तः क्षेपकः समायातीति शङ्करबालकृष्णदीक्षितमहोदयेन भारतीयज्योतिषे लिखितमस्ति। पञ्चसिद्धान्तिकायां निर्दिष्टषोडशाध्याये गुणकभाजकवशेन ३६४२२० संख्यका एव गुरुभगणाः समायान्ति। उत्पलोक्तपुलिशसिद्धान्ते एवं वर्तमाने प्रचलितसूर्यसिद्धान्ते च ३६४२२० मितगुरुभगणाः समुल्लिखिताः सन्ति।

सन्दर्भग्रन्थसूची

आचार्यः, भास्करः, (वि.सं.२०५५), सम्पादकः, चतुर्वेदः, मुरलीधरः, **सिद्धान्तशिरोमणिः**, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

दैवज्ञः, गणेशः, (ई.१९८१), व्याख्याकारः, जोशी, केदारदत्तः, **ग्रहलाघवम्**, (प्र.सं.), वाराणसी : मोतीलालः वनारसीदासः।

भट्टः, कमलाकरः, (वि.सं.२०५२), **सिद्धान्ततत्त्वविवेकः**, (प्रथमो भागः), वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

रङ्गनाथः, (टीका) (ई.२००९), व्याख्याकारः, पाण्डेयः, रामचन्द्रः, **सूर्यसिद्धान्तः**, वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।

शर्मा, ब्रह्मदत्तः, (ई.२००४), **भारतीय ज्योतिष**, (प्र.सं.), जयपुर : पञ्चशील प्रकाशन।

शर्मा, सीतारामः, (वि.सं.२०७१), व्याख्याकारः, दाहालः, मुरलीधरः, **गोलपरिभाषा**, काठमाडौँ : एक्मी ग्लोबल पब्लिकेशन प्रा.लि.।

सहाय, रमानाथः, (ई.१९६४), **अर्वाचीनज्योतिर्विज्ञानम्**, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पौरस्त्यास्तिकदर्शनाभिमतजगत्तत्त्वविवेकः

उपप्रा.डा. उमेशप्रसादघिमिरे

वाल्मीकिविद्यापीठम्

शोधसारः

शोधलेखेऽस्मिन् पौरस्त्यास्तिकदर्शनाभिमतं जगद्विषयकं चिन्तनमनुसंहितम्। जीवजगदीशादितत्त्वनिरूपणाय पौरस्त्यदर्शनं केन्द्रितमस्ति। चराचरात्मकस्य जगत्प्रपञ्चस्य कारणं स्वरूपं प्रयोजनञ्च किमिति विषये पौरस्त्यास्तिकचिन्तकैर्बहुधा चिन्तितम्। प्रमाणप्रमेयविषयिणी चर्चैव पौरस्त्यदर्शनस्य प्रमुखः प्रतिपाद्यो विषयः। प्रमेयान्तर्गतत्वेन प्रथितस्य जगत्प्रपञ्चस्य स्वरूपं पौरस्त्यास्तिकदर्शनेषु कथं प्रतिपादितमिति प्राज्ञिकजिज्ञासासमाधानायात्र प्रयत्नो विहितः। तत्राध्ययनक्रमे पौरस्त्यास्तिकदर्शनेषु कानिचन दर्शनानि जगत्प्रपञ्चस्योत्पत्तिमत्त्वमनित्यत्वञ्चाङ्गीकुर्वन्ति, कानिचन दर्शनानि च जगत्प्रपञ्चस्योत्पत्तिमत्त्वेऽपि नित्यत्वं सत्यत्वं वाङ्गीकुर्वन्तीति प्रदर्शितम्। जगदुत्पत्तिपक्षेऽपि कैश्चन दार्शनिकैरारम्भवादः, कैश्चन सङ्घातवादः, कैश्चन परिणामवादः, कैश्चन विवर्तवादश्चाङ्गीकृत इति मतवैषम्यं विवेचितम्। तत्रास्तिकान्तर्गतन्यायवैशेषिकदर्शने परमाणुकारणवादमङ्गीकुरुतः, साङ्ख्ययोगदर्शने प्रधानकारणवादमङ्गीकुरुतः, मीमांसादर्शनमदृष्टस्य तत्तद्भूतावयवानाञ्च कारणत्वमङ्गीकरोति, शाङ्कराद्वैतवेदान्तदर्शनञ्च सगुणब्रह्मणो जगत्प्रपञ्चं प्रत्यभिन्ननिमित्तोपादानकारणत्वमङ्गीकरोतीति सुनिश्चितम्। आस्तिकत्वेन परिगणितान्यपि साङ्ख्ययोगमीमांसाख्यानि वैदिकदर्शनानि जगत्कारणत्वेनेश्वरतत्त्वं नाङ्गीकुर्वन्ति, न्यायवैशेषिकाख्ये वैदिकास्तिकदर्शनेऽपीश्वरस्य जगत्सृष्टिं प्रति निमित्तकारणत्वमेवाङ्गीकुरुतः, शाङ्कराद्वैतदर्शनं तु जगदुत्पत्तिस्थितिप्रलयं प्रतीश्वरतत्त्वस्याभिन्ननिमित्तोपादानत्वमङ्गीकरोतीत्यूहापोहरूपेणात्र विवेचितम्। तत्र जडतत्त्वप्रधानादेव जगत्सृष्टिरिति साङ्ख्ययोगाभिमताज्जगच्चिन्तनात्, ईश्वरस्य निमित्तत्वेऽपि परमाणूनामेवोपादानत्वेन जगतः सृष्टिरिति न्यायवैशेषिकसम्मताज्जगद्विषयकचिन्तनात्, जगत्कर्तृत्वेनैवेश्वरास्तित्वमसहमानमीमांसाभिमतजगत्स्वरूपचिन्तनाच्च चेतनस्येश्वरस्याभिन्ननिमित्तकारणत्वेन जगत्सृष्टिरित्यद्वैत-दर्शनाभिमतं जगद्विषयकं चिन्तनमेवोपयुक्तं सुन्दरञ्च। वेदोपनिषन्मूलकत्वाच्चाद्वैतदर्शनाभिमतजगत्स्वरूपस्य प्रामाणिकत्वं सर्वातिशायित्वञ्चेति निष्कर्षः शोधलेखादस्मात् सम्प्राप्तः।

पारिभाषिकशब्दाः– *परमाणुः, सत्कार्यवादः, आरम्भवादः, परिणामवादः, विवर्तवादः।*

विषयपरिचयः

जगच्छब्दोऽयं गच्छति-जन्मस्थितिलयात्मकान् विकारान् प्राप्नोतीति व्युत्पत्त्या सावरणस्य विश्वब्रह्माण्डस्य वाचको विद्यते। पौरस्त्यदर्शनवाङ्मये नास्तिकास्तिकभेदेन विभक्तानि सर्वाण्यपि दर्शनानि किमिदं जगत्? कस्मादिदं प्रादुर्भूतम्? तेन सहास्माकं सम्बन्धः कथमागतः? तस्य च सम्बन्धस्य विच्छेदो भवति न वा? जगत्प्रपञ्चस्यास्य प्रयोजनं किम्? अस्य च सृष्टिक्रमः कीदृशः? इत्यादिजगद्विषयकचिन्तनानि कुर्वन्ति। इह खलु जगत्प्रपञ्चे विद्यमानानां समेषां प्राणिजातानां दुःखनिवृत्तये सुखावाप्तये वा निसर्गत एव जायमाना प्रवृत्तिरनुभूयते। दुःखस्यात्यन्तिकनिवृत्तिपूर्विका परमानन्दस्य प्राप्तिरेव पौरस्त्यदर्शनस्य मूलं प्रयोजनमिति निश्चप्रचम्। तदर्थञ्च पौरस्त्यदर्शने तत्त्वविवेचनं विशेषरूपेण विहितमस्ति। पौरस्त्यदर्शनेषु प्रमुखतत्त्वभूतचिज्जडनिरूपणाय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महानायासः कृतो विद्यते। चित्तत्त्वं जीवेशब्रह्मभेदात् त्रिविधमङ्गीकृतमिति भोक्तॄणां जीवानां भोगभूमित्वेन जडवर्गान्तर्गतं प्रमेयभूतमेकं जगत्तत्त्वं सर्वेष्वपि पौरस्त्यदर्शनेषु विवेचितमुपलभ्यते। "न हि दृष्टेऽनुपपन्नं नाम" इति न्यायाज्जगति दृश्यमानानां भूतभौतिकानां समेषां पदार्थानामस्तित्वविषये दर्शनानां न कापि विप्रतिपत्तिः। यद्यपि जगत्प्रपञ्चस्वरूपविषये, जगत्सृष्टिविषये, तत्कारणविषये च प्रायः सर्वेषु दर्शनेषु सूक्ष्माणि मतवैषम्यानि समुपलभ्यन्ते परं पौरस्त्यास्तिकदर्शनसम्बद्धानां सूक्ष्मचिन्तनानां गभीररूपेणाद्यपर्यन्तमनुसन्धानमूलकं विश्लेषणं नैवोपलब्धमिति तत्तद्दर्शनाभिमतजगद्विषयकचिन्तनवैशिष्ट्यानि कानीति प्राज्ञिकजिज्ञासाशमनाय शोधलेखेऽस्मिन्नूहापोहरूपेण तुलनात्मकं समीक्षणं विहितमस्ति। अतो लघ्वनुसन्धानात्मकः शोधलेखोऽयं पौरस्त्यास्तिक-दर्शनाभिमतजगत्स्वरूपानुसन्धानाय पूर्णतः समर्पितो विद्यते।

शोधसमस्या

"पौरस्त्यदर्शनाभिमतजगत्तत्त्वविवेकः" इति शीर्षकीयशोधलेखे जगत्स्वरूपं किमिति प्रधानाऽखण्डा च समस्या विद्यते। अत्रानया समस्यया सम्बद्धे प्रमुखसमस्ये निम्नलिखिते स्तः-

१. पौरस्त्यास्तिकदर्शताभिमतं जगत्स्वरूपं किम्?

२. पौरस्त्यास्तिकदर्शनाभिमतजगच्चिन्तनानां वैशिष्ट्यानि कानि? जगच्चिन्तनदृष्ट्या कस्य दर्शनस्योत्कृष्टत्वञ्च?

शोधोद्देश्यम्

जगत्स्वरूपप्रतिपादनमेवास्य शोधलेखस्य शीर्षकसम्बद्धं मूलमुद्देश्यम्। अतः प्रस्तुतसमस्यासम्बद्धे वक्ष्यमाणे निम्नलिखिते द्वे उद्देश्ये स्तः-

१. पौरस्त्यास्तिकदर्शनाभिमतजगत्स्वरूपप्रतिपादनम्,

२. जगच्चिन्तनदृष्ट्या पौरस्त्यास्तिकदर्शनानां वैशिष्ट्यनिर्धारणम्, तुलनात्मकदृशाऽद्वैतदर्शनाभिमत-जगच्चिन्तनस्योत्कृष्टत्वोपपादनञ्च।

शोधान्तरालम्

यद्यपि प्रमुखग्रन्थानामवलोकनात्तथा दर्शनसम्बद्धपुस्तकानामालेखानाञ्च गवेषणात् पौरस्त्यदर्शनेषु जगद्विषयकं पृथक् पृथक् पर्याप्तं चिन्तनं विहितमित्यवज्ञायते तथापि जगत्स्वरूपविषये समग्रतया विशिष्टमनुसन्धानकार्यं साम्प्रतं यावन्नहि दृष्टिपथमागतमस्तीति तत्प्रतिपादनमेव प्रकृतस्यानुसन्धानस्यौचित्यम्। दर्शनसम्बद्धग्रन्थेषु जगत्स्वरूपविषयकचिन्तनानि यद्यपि सामान्यरूपेण प्रतिपादितानि तथापि तेषु ग्रन्थेषु जगच्चिन्तनदृष्ट्या न कुत्रापि पौरस्त्यदर्शनवैशिष्ट्यानि प्रतिपादितान्युपलभ्यन्ते। अत्र च पौरस्त्यास्तिक-दर्शनाभिमतजगद्विषयकचिन्तनानां सूक्ष्मरूपेणैकत्रानुसन्धानं विश्लेषणं वा विहितमस्ति। अतः पौरस्त्यवाङ्मये विहितेषु जगद्विषयकचिन्तनेष्वद्यपर्यन्तं विरचितेषु शोधप्रबन्धपुस्तकालेखेष्वयं शोधलेखो नितरां वैशिष्ट्य-मावहति। पूर्वकृतानुसन्धानात्मककार्यादेव जगद्विषयणी प्राज्ञिकजिज्ञासा पूर्णतः शान्ता न भवति। अतो जगद्विषयकं विस्तृतमध्ययनमपरिहार्यमिति प्रस्तुतप्राज्ञिकसमस्यासमाधानाय "पौरस्त्यास्तिकदर्शनाभिमतजगत्तत्त्वविवेकः" इत्याख्योऽयमनुसन्धानात्मकलेखो विनिर्मितः। अस्मिन्नालेखे पौरस्त्यास्तिकदर्शनानां केन्द्रीयतायां जगत्स्वरूपविवेचनपुरस्सरं तत्तद्दर्शनाभिमतजगच्चिन्तगतवैशिष्ट्यनिर्धारणाय विशेषः प्रयत्नो विहितोऽस्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अध्ययनस्य सीमाङ्कनम्

पौरस्त्यास्तिकदर्शनाभिमतजगत्तत्त्वविमर्शनमेवास्य शोधलेखस्य क्षेत्रं सीमा चास्ति। अतोऽत्रालेखे पौरस्त्यदर्शनेषु साङ्ख्ययोगन्यायवैशेषिकपूर्वमीमांसाद्वैतवेदान्तेषु प्रतिपादितं जगत्स्वरूपमेव विवेचितमस्ति, ततोऽतिरिक्तानां दर्शनानामत्र चर्चा नैव कृतेति शोधस्य क्षेत्रं सीमा च विद्यते।

शोधविधिः

पौरस्त्यास्तिकदर्शनाभिमतं जगद्विषयकं चिन्तनमन्वेष्टुं प्रवृत्तस्य गुणात्मकस्य लध्वनुसन्धानप्रबन्धस्याऽनुसन्धानमूलकत्वाय निश्चितोऽनुसन्धानविधिरवलम्बितोऽस्ति। अध्ययनार्थमावश्यकसामग्र्यः पौरस्त्यदर्शनसम्बद्धाः सन्ति। तत्सामग्रीणां सङ्कलनं पुस्तकालयेभ्यो विहितम्। प्रस्तुताध्ययने सामग्रीणां विश्लेषणं निगमनात्मकपद्धतावाधारितम्। पूर्वस्थापितमान्यातानाधारीकृत्य सामग्रीणां विश्लेषणं वर्णनात्मकविधिना व्याख्यात्मकविधिना तुलनात्मकविधिना च विहितमस्ति।

सैद्धान्तिक आधारः

शोधलेखेऽस्मिन् पौरस्त्यदर्शनसम्बद्धानां शास्त्रीयग्रन्थानामाधारेण विषयोपस्थापनं विवेचनं निष्कर्षप्रदानञ्च कृतमस्ति। अतो विश्लेषणस्य सैद्धान्तिक आधारः पौरस्त्यदर्शनानां जगत्सम्बद्धाः सिद्धान्ताः सन्ति। पौरस्त्यास्तिकदार्शनिकैर्विहितं जगत्तत्त्वसम्बद्धं चिन्तनमेवास्याध्ययनस्य सैद्धान्तिक आधारो विद्यते। न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्ताख्यानां वैदिकदर्शनानामेव सिद्धान्तानाधारीकृत्यास्मिन् लेखे जगत्तत्त्वस्य स्वरूपं निर्धारितम्, तत्तद्दर्शनाभिमतजगत्तत्त्वविषयकं चिन्तनगतवैशिष्ट्यञ्च निरूपितम्। "सिद्धः अन्तो यस्य स" इति बहुव्रीहिसमासेन निर्मितस्य सिद्धान्तशब्दस्य तात्पर्यमपि पूर्वस्थापितः सिद्धान्त एवेति पूर्वस्थापितदार्शनिकसिद्धान्ता एवास्य शोधलेखस्य सैद्धान्तिक आधारः।

विषयप्रवेशः सैद्धान्तिक्यवधारणा च

अथ जगत्स्वरूपं विचार्यते। "गम्" धातोः गच्छति–उत्पत्तिस्थितिलयान् प्राप्नोतीति विग्रहे क्विप् प्रत्ययान्ताज्जगच्छब्दोऽयं निष्पद्यते। नामरूपात्मकस्यास्य जगतो विषये पौरस्त्यचिन्तकैर्बहुधा भृशं चिन्तितमुपलभ्यते। पौरस्त्यदर्शनाधारभूतवेदोपनिषद्ग्रन्थेष्वेव जगद्विषयकं सूक्ष्मं चिन्तनमुपलब्धमस्ति। तदाधारे दर्शनेषु सर्वत्र जगत्स्वरूपमुपपादितम्, तत्प्रयोजनञ्च निरूपितम्। अत्र च सर्वप्रथमं वैदिकमन्त्रेषूपलब्धानि जगद्विषयकचिन्तनानि संक्षेपेण विविच्यन्ते। तदनु च पौरस्त्यास्तिकदर्शनेषु सर्वेषु जगद्विषयिणी चर्चा कीदृशीति विस्तृतेन समीक्ष्यते। तत्रास्तिकदर्शनाभिमतं जगत्स्वरूपं पृथक् पृथगेव विविच्यते। अर्थात् शोधलेखोऽयं पौरस्त्यास्तिकदर्शनानुरूपजगत्स्वरूपविवेचने केन्द्रितोऽस्ति। अतोऽस्मिन् लेखे विविधानि शीर्षकोपशीर्षकाणि समुपस्थाप्य व्यवस्थितरूपेण जगत्तत्त्वस्य विषये सूक्ष्ममध्ययनं विधीयते। तत्र वेदसंहितायां जगत्स्वरूपविवेकः, पौरस्त्यास्तिकदर्शनेषु जगत्स्वरूपविवेकः, न्यायदर्शनाभिमतजगत्स्वरूपविवेकः, वैशेषिकदर्शनाभिमतजगत्स्वरूपविवेकः, साङ्ख्यदर्शनाभिमतजगत्स्वरूपविवेकः, योगदर्शनाभिमतजगत्स्वरूपविवेकः, पूर्वमीमांसाभिमतजगत्स्वरूपविवेकः, अद्वैतदर्शनाभिमतजगत्स्वरूपविवेकः, उपसंहारो निष्कर्षश्चेत्यादिशीर्षकोपशीर्षकाण्युपकल्प्य शोधलेखोऽयमारचितः। एतत्प्रकारिका शीर्षकोपशीर्षकस्थापनपूर्विकाऽध्ययनरीतिः शोधलेखविभाजनस्थितिरिव वेति शोधलेखस्यास्य सैद्धान्तिक्यवधारणा विद्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदसहितायां जगत्स्वरूपविवेकः

स्थावरजङ्गमान्तं चैतन्यातिरिक्तं सर्वं प्रपञ्जातं जगदित्युच्यते। तत्र परमेश्वरस्य लीलास्थलं जीवस्य च भोगस्थलं वा जगदिति प्राचीनतमे ग्रन्थे ऋग्वेदेऽपि यथा सङ्केतितम्- "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥" (ऋग्वेदः, १/१६४/२०) मन्त्रेऽस्मिन्नागत-वृक्षपदेन जगदिति ज्ञायते। तस्मिन्नेव संसारवृक्षे जीवपरमात्मानावतिष्ठतः। सशरीरस्यैव स्थितिरिति परमात्मनः स्थितिः कथमिति चेल्लीला कर्मैवात्र द्योतितम्। अत एव परमात्मन इदं जगल्लीलाशरीरं लीलास्थलमेवेत्युक्तम्। एवं सत्यपि जगतोऽस्योपभोगाय परमात्मा नैव चेष्टते, किन्तु भोगपराङ्मुखोऽयमीश्वरः द्रष्टृत्वेन साक्षित्वेन वावतिष्ठते। भोगपरायणो जीवस्तु संसारेऽस्मिन् निमज्जति। "अनश्नन्नन्योऽभिचाकशीति" मन्त्रांशेनानेन परमात्मनो जगदनुपभोग्यत्वमुपपादितम्। गच्छतीति जगदित्यस्यार्थो विश्वब्रह्माण्डः संसारो वा। ऋग्वेदेऽपि जगच्छब्देन जङ्गमप्राणिनामेव ग्रहणं कृतमस्ति। संसारवाचकस्य जगच्छब्दस्य प्रयोगो यथा मिलति वेदे- "ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्।" (ऋग्वेदः, १०/१७३/४) मन्त्रेणानेन यथेदं जगत्सर्वं ध्रुवं-प्रवाहरूपेण नित्यं वर्तते तथाऽयं विशां राजाऽपि वो भूयात्, चिराय राज्यमुपभोक्तुं समर्थः स्यादिति प्रार्थना विहिताऽस्ति। एवमृग्वेदीयो जगच्छब्दः संसाररूपार्थावबोधकोऽस्ति। जगच्छब्दबोध्यश्चायं संसारो भोगदृष्ट्या वरियान्। एवं पृथिव्यादिपञ्चमहाभूतैः सह चतुर्दशभुवनानि ब्रह्माण्डमिति प्रदर्शितञ्च- "सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः॥" (ऋग्वेदः, १०/१९०/३) जगतोऽस्य भोक्तृभोग्यात्मकं चित्रं नासदीयसूक्ते यथोपदिष्टम्-"तिरश्चिनो विततो रश्मिरेषामधः स्विदासीदुपरि स्विदासीत्। रेतोधा आसन् महिमान आसन् स्वधा अवस्तात् प्रयतिः परस्तात्॥" (ऋग्वेदः, १०/१२९/५) वैचित्र्यपूर्णस्यास्य जगतः स्वरूपावबोधाय परमात्मन्यप्यसम्भव इति प्रदर्शितञ्चास्ति यथा-"योऽस्याध्याक्षः परमेव्योमन् स्वोऽङ्ग वेद यदि वा न वेदः।" (ऋग्वेदः, १०/१३९/७) अर्थात् परमात्मन्यपि जगद्बोधाय संशयो विद्यते चेत् का कथाऽन्येषाम्? इति जगद्बोधोऽतीव दुःशक इति स्पष्टम्। एवं परमात्मनो लीलास्थलत्वेन, लीलारूपत्वेन वा जगतश्चर्चा ऋग्वेदे सम्प्राप्यते। एवञ्च जगदुत्पत्तावीश्वरस्यैव कारणत्वञ्चोपपादितमस्ति। मायावच्छिन्नस्येश्वरस्य जगत्कारणत्वं यथा प्रतिपादितम्-"एकैवोषाः सर्वमिदं विभात्येकं वा इदं विवभुव सर्वम्। एक एवाग्निर्बहुधा समिद्ध एक सूर्यो वशमनु प्रभूतः॥" (ऋग्वेदः, ८/५८/२) ब्रह्मण एव विभूत्वेनैतज्जगदत्र प्रतिपादितम्। पुरुषवाच्यस्य परमात्मनो जगद्रूपता च मन्त्रेऽस्मिन् प्रतिपादितम्- "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उता मृतत्वस्येशानो यदन्नेनातिरोहति॥" (ऋग्वेदः, १०/९०/२) जीवेभ्यस्तत्कर्मफलभोगप्रदानाय परमात्मैवौपाधिकीं जगदवस्था-मवाप्नोति। परमात्मनो जगत्कतृत्वं यथानेन च मन्त्रेणोपदिष्टम्-"विश्वतश्चक्षुरुतविश्वतोमुखो विश्वतो बाहरुत विश्वतस्पात्। स बाहुभ्यां धमतिसंपतत्रैर्द्यावा भूमी जनयन्देव एकः॥" (ऋग्वेदः १०/८१/३) अधिष्ठानाद्यभावेऽपि सर्वव्यापकपरमात्मनो जगत्सृष्टिरिति नैव दुष्करत्वम् , तस्यः परमात्मनः सर्वज्ञत्वात् सर्वशक्तिमत्वाच्च। समेषां प्राणिजातानां स्वकृतकर्मलभोगस्थलत्वेनेश्वरस्य च लीलास्थलत्वेन वेदसहितायां यत्र तत्र सर्वत्र जगत्स्वरूपमुपवर्णितमस्तीति दिक्।

पौरस्त्यास्तिकदर्शनाभिमतजगत्स्वरूपविवेकः

वेदोपनिषन्मूलकं खलु पौरस्त्यदर्शनम्। वैदिकार्षचिन्तनात् प्रभावितं पौरस्त्यदर्शनमिदं नास्तिका-ऽस्तिकभेदेन द्विविधम्। साक्षाद् वेदप्रामाण्यमङ्गीकृत्य सम्प्रवृत्तानि पौरस्त्यदर्शनान्यास्तिकदर्शनानि विद्यन्ते। अर्थान्न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्ताख्यानि श्रुतिसापेक्षाणि दर्शनान्यास्तिकानि सन्ति। न हि दृष्टेऽनुपपन्नमिति न्यायाज्जगति दृश्यमाना ये भूतभौतिकाः पदार्थास्तदस्तित्वविषये न कस्यापि दर्शनस्य

 ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विवादोऽवलोक्यते परं जगतोऽस्य कारणन्तथा स्वरूपञ्चेत्यादिविषये तु मतवैषम्यं प्रशस्तमवाप्यते। अतोऽत्र तत्तद्दर्शनाभिमतजगत्स्वरूपविषयकचिन्तनान्यनुसन्धाय संक्षेपेण विविच्यन्ते।

साङ्ख्यदर्शनाभिमतजगत्स्वरूपविवेकः

श्रीकपिलमहर्षिप्रणीतमिदं साङ्ख्यदर्शनं दर्शनेष्वतीव प्राचीनमित्यङ्गीक्रियते। त्रिगुणात्मिकया प्रकृत्या विरचितत्वादस्य जगतोऽपि त्रैगुण्यं सिद्ध्यतीति व्यावहारिकञ्चेदं साङ्ख्यदर्शनमवलोक्यते। व्यवहारे खलु त्रैगुण्यमनुभूयते, साङ्ख्यदर्शनं तथैव प्रतिपादयति। सत्त्वरजस्तमसां साम्यावस्थैव प्रकृतिरित्युच्यते। सैव प्रकृतिः पुनः सत्त्वरजस्तमसां वैषम्यावस्थामापन्ना सती त्रिगुणात्मकं जगदिदमुत्पादयतीति जगत्कारणीभूता भवति। साङ्ख्यदर्शने पञ्चविंशतितत्त्वान्यङ्गीक्रियन्ते। तानि च तत्त्वानि- पुरुषः, प्रकृतिः, महत्तत्वम्, अहङ्कारः, मनः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि। तथा च साङ्ख्यसूत्रम्- "सत्त्व-रजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियम्, तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः।" (साङ्ख्यसूत्रम्, १/६१) दर्शनेऽस्मिन् सत्कार्यवादो-ऽङ्गीक्रियते। एतन्मते कार्यं पूर्वत एव स्वकारणे विद्यमानमस्ति। कारणावस्थायां यदव्यक्तरूपेणासीत् तदेव कार्यावस्थायां व्यक्तं भवति। कारणस्य सत्वात् कार्यस्यापि सत्वमङ्गीक्रियते। "न सत आत्मलाभो न सत आत्महानिः" (सांख्यदर्शनम्, आमुखम्, पृ.६) इति साङ्ख्यसिद्धान्तः। सत्कार्यवादस्थापनाय साङ्ख्यदर्शने पञ्चहेतवः प्रदर्शिताः सन्ति। "नासदुत्पादो नृशृङ्गवत्" (साङ्ख्यसूत्रम्, १/११४), "उपादाननियामात्" (साङ्ख्यसूत्रम्, १/११५),"सर्वत्र सर्वदा सर्वासम्भावात्" (साङ्ख्यसूत्रम्, १/११६),"शक्तस्य शक्यकरणात्" (साङ्ख्यसूत्रम्, १/११७),"कारणभावाच्च" (साङ्ख्यसूत्रम्, १/११८),"पारम्पर्यतोऽन्वेषणाद्बीजाङ्कुरवत्" (साङ्ख्यसूत्रम्, १/११९),"उत्पत्तिवद्वाऽदोषः" (साङ्ख्यसूत्रम्, १/१२३), "हेतुमदनित्यं सक्रियमनेकमाश्रितं लिङ्गम्" (साङ्ख्यसूत्रम्, १/१२४) इत्यादिसूत्रेभ्यः सत्कार्यवादो निरूपितोऽस्ति। तत्सत्कार्यवादस्थापनाय प्रवृत्ता कारिका च यथा प्रदर्शितेश्वरकृष्णेन- "असदकरणादुपादानग्रहणात्सर्वसम्भवात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥" (साङ्ख्यकारिका-९) कारिकायामस्यां प्रदर्शिताः पञ्चहेतवोऽत्र संक्षेपेण चर्च्यन्ते।

(क) असदकरणात्- असतः कारणत्वं लोके नैव दृष्टम्। यदि चासतोऽपि कार्यं सम्भवेत् तर्हि सिकताभ्यस्तैलं स्यात्। शषविषाणखपुष्पबन्ध्यापुत्रादीनाञ्चोत्पत्तिर्भवेत्। अतोऽसतः सदुत्पत्तेरसंभावात् सत्कारणवादः स्वीकरणीयः।

(ख) उपादानग्रहणात्- लोके कार्यस्य कारणेन सह सम्बन्धोऽवलोक्यते। सतोऽसतश्च सम्बन्धो नैव दृश्यते। तद्यथा दधिः क्षीरस्योपादानं कुरुते। यदि चासत्कार्यं स्यात् तर्हि दध्यर्थो जलस्याप्युपादानं कुर्यात्, न च कुरुते। तस्मात्प्रधाने महदादिकार्यमस्तीति स्वीकरणीयम्।

(ग) सर्वसम्भवाभावात्- लोके यद् यस्मिन् विद्यते तस्मादेव तदुत्पद्यते, यथा तिलेभ्यस्तैलम्। यदि चासत्कारणात्कार्यं भवेत् तर्हि सर्वमेव सर्वतो जायेत, न च तथा जायते। अतः सर्वसम्भवाभावादिति हेतोः सत्कार्यवाद एवाङ्गीकार्यः।

(घ) शक्तस्य शक्यकरणात्- शक्यादेव कार्यमारभते। यथा हि लोके शक्यः-शिल्पी-करणादि-कारणोपादानसम्पन्नः सन् कार्यमुत्पादयति, यथा च कुलालो मृत्पिण्डादेव घटकार्यमारभते। अतः शक्तस्य शक्यकरणादपि हेतोः सत्कार्यवादः स्वीकर्तव्यः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(ङ) कारणभावाच्च- कार्यं कारणात्मकं भवति, कारणाद्भिन्नं न भवति। यदि तथा न भवेत् तर्हि पाषाणादपि तैलमुत्पद्येत, तथा तु न सम्भवति। अतः प्रधाने महदादिकार्यमस्तीतिकारणभावादितिहेतोः सत्कार्यवादः सिद्ध्यतीति साङ्ख्यसिद्धान्तः।

प्रकृतिपुरुषयोः संयोगादेव सृष्टिर्भवतीति साङ्ख्यसिद्धान्तः। प्रकृतौ क्रियाशक्तिर्विद्यते, चेतनशक्तिर्नास्ति। पुरूषे च चेतनशक्तिरस्ति, क्रियाशक्तिर्नास्ति। पङ्ग्वन्धवदुभयसंयोगात् सर्गो भवति। सर्गश्चायं द्विविधः- भावसर्गः, भौतिकसर्गश्च। बुद्धेः परिणामरूपा धर्माधर्मादयो भावा यदा विपर्ययाशक्तितुष्टिसिद्धिरूपेण परिणमन्ते स एव भावसर्गः। अयमेव सर्गः प्रत्ययसर्गो बौद्धिक सर्गो वोच्यते। अस्य भावसर्गस्य च स्थितिः सूक्ष्मस्थूलशरीर-साध्या भवति, अतः स तत्तद्देहमयो लिङ्गसर्गः, सूक्ष्मसर्गस्तन्मात्रसर्गो भौतिको वा सर्गो निगद्यते। अयञ्च भौतिक-सर्गश्चतुर्दशभुवनेषु व्याप्तोऽस्ति। (द्रष्टव्यं साङ्ख्यसूत्रम्, ३/४५-५०) तत्र पञ्चविपर्ययाः, अष्टाविंशति-रशक्तयः, नव तुष्टयोऽष्टसिद्धयश्चेति योगात् पञ्चाशत्प्रकारकोऽयं बौद्धिकसर्गः। (द्रष्टव्यं साङ्ख्यसूत्रम्, ३/३७-४२) भौतिकसर्गस्तु चतुर्दशविधः। भूर्भुवस्वर्महर्जनस्तपसत्यलोकाः, अतल-वितल-सुतल-तलातल-रसातल-महातल-पाताललोकाश्चेति चतुर्दशलोकाः भौतिकसर्गत्वेनाख्यायन्ते। तदुक्तमीश्वर-कृष्णेन- "ऊर्ध्वं सत्त्वविशालस्तमो विशालश्च मूलतः सर्गः। मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः॥" (साङ्ख्यकारिका, ५४) भूर्लोकादूर्ध्वलोकेषु सात्त्विकानां देवादीनां स्थितिः, भूर्लोकादधस्तु राक्षस-पिशाचादयस्तमोबहुलाः सन्ति, भूर्लोके च रजोबहुलानां पशुपक्षीस्थावरमनुष्यादीनामवस्थितिर्भवतीति कारिकार्थः। भूतभौतिकसृष्टिक्रमश्चेश्वरकृष्णेन यथा प्रोक्तम्- "प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि।" (साङ्ख्यकारिका, २२) अर्थात् प्रकृतितत्त्वात् महत्तत्त्वम् (बुद्धिः), महत्तत्त्वादहङ्कारः, अहङ्कारात् षोडशकः (पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रीयाणि, मनः, पञ्चतन्मात्राश्च), तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि (पृथिव्यप्तेजोवायवाख्यानि) जायन्त इत्यर्थः। तत्र पञ्चतन्मात्राभ्यो वियदादिनामुत्पत्तिरित्थं भवति- "तत्र शब्दतन्मात्रादाकाशः, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः, गन्धतन्मात्रात् पृथिवीत्यादिक्रमेण पूर्वपूर्वानुप्रवेशेनैक-द्वित्रिचतुष्पञ्चगुणानि आकाशादिपृथिवीपर्यन्तानि महाभूतानीति सृष्टिक्रमः। (साङ्ख्यकारिका-२२, माठरवृत्तिः) "शब्दादिभ्यः पञ्चभ्य आकाशादीनि पञ्चमहाभूतानि पूर्वपूर्वानुप्रवेशादेक-द्वित्रिचतुष्पञ्चगुणान्युत्पद्यन्ते।" (साङ्ख्यकारिका-२८ माठरवृत्तिः) एतेन पृथिव्यादिभूतानां कारणं तन्मात्रेत्युक्तम्। एवं तन्मात्राद्वारा भूतानां सृष्टिर्भवतीति प्रस्तुतपञ्चीकरणसिद्धान्तेन स्पष्टीकृतम्। समस्तमपि पाञ्चभौतिक-मेतज्जगत् प्राणीमात्रस्योप-भोगार्थमिति साङ्ख्यसिद्धान्तः। प्राणीमात्रस्याहारविहारार्थं पञ्चभूतानामावश्यकत्वम्। कृमिकीटपतङ्गपशुपक्षि-मानवादीनां भोगसाधनभूतं शरीरञ्च पाञ्चभौतिकमेव। एवमचेतना प्रकृतिरेव जगत्कर्त्री, नेश्वरस्य जगत्कर्तृत्व-मिति साङ्ख्यसिद्धान्तः। सृज्यमानप्राण्यदृष्टवशादचेतनापि प्रकृतिः सर्गे प्रवर्तते, तथा चोक्तमीश्वरकृष्णेन- "वत्स-विवृद्धिनिमितं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमितं तथा प्रवृत्तिः प्रधानस्य॥" (साङ्ख्यकारिका-५७) वत्सविवृद्धिनिमित्तं क्षीरस्य प्रवृत्तिर्यथा भवति तथैव जडस्य प्रधानस्यापि प्रवृत्तिः सम्भवतीति साङ्ख्य-सिद्धान्तः। एवं त्रिगुणात्मकप्रकृतितत्त्वादेव त्रिगुणात्मकस्य जगत उत्पत्तिरिति साङ्ख्यदर्शनाभिमतजगत्स्वरूपविवेकः।

योगदर्शनाभिमतजगत्स्वरूपविवेकः

महर्षिपतञ्जलिप्रतिपादितमिदं योगदर्शनं पौरस्त्यदर्शनेषु महत्त्वपूर्णमस्ति। चिकित्साशास्त्रवद् योगशास्त्रं चतुर्व्यूहं मन्यते। "यथा चिकित्साशास्त्रं रोगो रोगहेतुरारोग्यं भेषजमिति, तथेदमपि संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति। तत्र दुःखमयः संसारो हेयः। प्रधानपुरुषयोः संयोगो हेयभोगहेतुः। तस्यात्यन्तिकी निवृत्तिर्हानम्। तदुपायः सम्यग्दर्शनम्।" (सर्वदर्शनसङ्ग्रहः-पातञ्जलदर्शनम्, पृ. ६२९) अतः परमपुरुषार्थभूतस्य मोक्षस्य प्राप्त्यर्थं सर्वैरपि

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योगिजनैरिदं योगशास्त्रमादरणीयम्। योगदर्शने द्वावेव मूलपदार्थौ- द्रष्टा, दृश्यञ्च। बहुविकारबीजभूतमिदं दृश्यं परिणामशीलं चित्संयोगाद् बहुधा परिणमते। साङ्ख्यदर्शनवदस्मिन्नपि दर्शने सत्कार्यवाद एवाङ्गीक्रियते। यद्यपि योगदर्शने त्वीश्वरस्यास्तित्वमङ्गीक्रियते तथापीश्वरो नैव कारणमपि तु त्रिगुणात्मिका प्रकृतिरेव कारणम्। गुणवैषम्यरूपं जगदेतन्मायामात्रमित्युच्यते। "ते व्यक्तसूक्ष्मा गुणात्मनः" (योगसूत्रम्, कैवल्यपादः-१३) इति सूत्रव्याख्यानावसरे व्यासेन शास्त्रानुशासनं यथा समुद्धृतम्- "गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिपथं प्राप्तं तन्मायेव सतुच्छकम्॥" (पातञ्जल योगदर्शन, कैवल्यपाद-१३, व्यासभाष्यम्, पृ.४३१) द्रष्टा दृष्टिपथं नागच्छति, यच्च दृष्टिपथं समागच्छेत् तत्तु मायिकं तुच्छकमेवेति योगदर्शनमतम्। दृग्दृश्यौ द्वावेव मूलपदार्थौ तथापि सत्कार्यवादञ्चाश्रित्यानेकपदार्थाः सन्ति, व्यक्ताव्यक्तज्ञरूपेण, प्रकृति-प्रकृतिविकृति-विकृत्यप्रकृति-विकृति-रूपेण च। पदार्थगणनारीतिश्च प्रकृतिमहदहङ्कारा-दिपञ्चविंशतिपदार्थरूपेण प्रसिद्धा विद्यते। दृग्भिन्नं सर्वं संसारान्तर्गतम्। जडपदार्थो वा संसारः। जडपदार्थस्य मूलं कारणं प्रकृतिरेव। प्रकृतितत्त्वादेव सृष्टेरारम्भः। प्रकृतेर्महत्, महतोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राणि (शब्दस्पर्शरूपरसगन्धाख्यानि), तन्मात्रादेकादशेन्द्रियाणि (श्रोत्रम्, त्वक्, चक्षुः, जिह्वा, घ्राणञ्चेति पञ्चज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थेति पञ्चकर्मेन्द्रियाणि, उभयात्मकं मन एकञ्च), पञ्चमहाभूतानि (पृथिव्यप्तेजोवाय्वाकाशाख्यानि) च जायन्ते। महदादेरेव पुरुषस्य भोगायतनं सूक्ष्मशरीरम्, सूक्ष्मशरीरस्य चाधिष्ठानभूतं स्थूलशरीरञ्चोत्पद्येते। जडपदार्थैः साकं चेतनस्याभेदसम्बन्ध एव संसार इत्युच्यते। योगदर्शनेऽङ्गीकृतेऽपीश्वरतत्त्वे तस्य जगत्कर्तृत्वं नैवाङ्गीक्रियते। अयस्कान्त-मणेरिवेश्वरस्य प्रकृतिप्रवर्तकत्वम्, अपरिणामिन्यसङ्गे च व्यापारासम्भवात्। साङ्ख्यानामिव योगिनामपि पुरुषस्य भोगापवर्गाथमेव सृष्टिरिति मतम्। जगत्कर्तृत्वेनेश्वरस्योपादेयत्वं नैवाङ्गीक्रियते। ईश्वरस्य जगदुत्पत्ति-स्थितिप्रलयवत्त्वेनेश्वरास्तित्वानङ्गीकाराद्योगदर्शनं साङ्ख्यदर्शनतुल्यम्। साङ्ख्याङ्गीकृतसत्कार्यवादोऽपि योगदर्शने स्वीकृतोऽस्ति। सर्वं कार्यजातं कारणेऽव्यक्तरूपेण विद्यमानमस्ति। कथमसतः सज्जायेत, सत एव सज्जायते। दुःखमूलादस्मात् संसारान्मोचनार्थं योगानुष्ठानस्यावश्यकतेति योगदर्शनाभिमतजगत्स्वरूपविवेकः।

मीमांसादर्शनाभिमतजगत्स्वरूपविवेकः

जैमिनिमुनिप्रणीतं मीमांसादर्शनमिदं कर्ममीमांसापदेनाप्यभिधीयते। व्यवहारिकदर्शनत्वेन प्रसिद्धेऽस्मिन् दर्शने कर्मप्रतिपादनातिरिक्तमाध्यात्मिकचिन्तनं पश्चादेवानुप्रविष्टमवलोक्यते। "चोदनालक्षणोऽर्थो धर्मः" (जैमिनिसूत्रम्, १/१/२) इतिसूत्राद् धर्मपदार्थनिरूपणमेव मीमांसायाः प्रयोजनमिति निश्चीयते। अस्मिन् दर्शने इहलोकादीनामस्तित्वमङ्गीकृतम्। स्वर्गप्राप्त्यर्थं वेदविहितसत्कर्मानुष्ठानं सम्पाद्यं भवति, वेदनिषिद्ध-कर्मानुष्ठानाच्च नरकप्राप्तिरिति च स्वीकृतम्। मीमांसादर्शने कर्मैव सर्वमिति प्रतिपादितम्। तथा च माधवाचार्येण प्रोक्तम्-"वेदोक्तकर्मसरणिः स तु यागरूपो विध्यर्थवादयुगलं परिलम्बमानः। धर्मो भवेत् किल ततो जननान्तरेषु कर्मैव सर्वमिति जैमिनये नमोऽस्तु॥" (सर्वदर्शनसङ्ग्रहः- जैमिनिदर्शनम्, पृ. ४३९) मीमांसादर्शने जगदिदं वास्तविकमङ्गीक्रियते। अतश्च वास्तवदर्शनमिति नाम्ना चेदं दर्शनमाख्यायते। प्रत्यक्षेण दृष्टाः सर्वेऽपि पदार्थाः खलु नित्या एव सन्ति। यत् सत् तदेव दृश्यते। मीमांसादर्शनस्य भाट्टसम्प्रदाये द्रव्य-गुण-कर्म-सामान्य-शक्तिरभावाख्याः षट्पदार्थाः स्वीक्रियन्ते चेत् प्रभाकरसम्प्रदाये द्रव्य-गुण-कर्म-सामान्य-समवाय-शक्ति-सङ्ख्या-सादृश्याख्या अष्टौ पदार्थाः स्वीक्रियन्ते। एवं दर्शनेऽस्मिन् पृथिवी, अप्, तेजः, वायुः, आकाशः, दिक्, आत्मा, मनः, शब्दः, तमश्चेत्येकादशद्रव्याण्यङ्गीक्रियन्ते। पृथिव्या एव स्वरूपाणि महीपर्वतवृक्षशरीरघ्राणेन्द्रि-यादीनि। जरायुजाण्डजस्वेदजोद्भिजादीनि शरीराणि स्वीक्रियन्ते परं प्रभाकरमते तूद्भिज्जाख्यशरीरस्यास्तित्वं नाङ्गीक्रियते। एतेषां सर्वेषां द्रव्यादिपदार्थानां मीमांसाऽत्र नैवावश्यकी। अस्य च जगतः सत्यत्वमेवाङ्गी-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यमिति मीमांसाभिमतं मतम्। तथा चोक्तम्- "तस्माद् यद् गृह्यते वस्तु येन रूपेण सर्वदा। तत्तथैवाभ्युपेतव्यं सामान्यमथवेतरत्॥" (श्लोकवार्तिकम्, पृ.४०४) अर्थाद् बाह्यपदार्थानां ग्रहणमिन्द्रियमाध्यमेन भवति। अतो यद्रूपेण जगत उपलब्धिर्भवति तद्रूपमेवाङ्गीकर्तव्यम्। एतेन मीमांसादर्शनमिदं जागतिकाः सर्वेऽपि पदार्थाः सत्यस्वरूपा एवेति स्वीकरोति।

इन्द्रियाण्येव बाह्यवस्तूपलब्धिसाधनानि। इन्द्रियैर्यद्रूपेण जगत उपलब्धिर्भवति तद्रूपे जगतः सत्यत्वम्। अस्मिन् संसारे त्रिप्रकारकाणां वस्तूनां ज्ञानानि भवन्ति- १. भोगायतनं शरीरम्, यस्मिन् स्थित्वाऽऽत्मा सुख-दुःखादीनामनुभवं कुरुते। २. भोगसाधनानीन्द्रियाणि, यैः साधनैरात्मा दुःखसुखादीनामनुभवं करोति। ३. भोग-विषयाः पदार्थाः, ये चात्मनो भोग्याः सन्ति। शरीरोन्द्रियविषययुक्तोऽयं संसारोऽनादिरनन्तश्च। जगतोऽस्योत्पत्तिः प्रलयश्च मीमांसादर्शने नैवाङ्गीक्रियेते। मूलं जगत् खलु नोत्पद्यते न च विनश्यति, व्यक्तिरेव जन्यते म्रियते च। प्रत्यक्षातिरिक्तानां स्वर्गनरकात्मयज्ञदेवतादीनाञ्चास्तित्वं शब्दप्रमाणेन सिद्ध्यतीत्यङ्गीक्रियते। जगतोऽस्या-नादित्वेनानन्तत्वेन च नित्यत्वाङ्गीकारात् तत्कर्तृत्वेनेश्वरस्यास्तित्वं मीमांसादर्शने नाङ्गीक्रियते। अर्थाज् जगतोऽस्य सर्गानङ्गीकारात् तत्सर्जकत्वेनेश्वरस्यास्तित्वाङ्गीकार एव व्यर्थः। गिरिसरिदादीनां नक्षत्रादीनाञ्च नोत्पत्तिविनाशौ किन्तूपचयापचयावेवावयवानामिति जगदेतन्नित्यमेवेति मीमांसादर्शनाभिमतमतमवगन्तव्यम्। एवं वेदविहितकर्मसम्पादनार्थं तत्कर्मफलभोगार्थञ्च जगत्प्रपञ्चस्य प्रयोजनमिति मीमांसादर्शनाभिमत-जगत्स्वरूपविवेकः।

न्यायदर्शनाभिमतजगत्स्वरूपविवेकः

पौरस्त्यदर्शनेषु न्यायदर्शनमतीव महत्त्वपूर्णं दर्शनमस्ति। "यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" (मनुस्मृतिः, १२/१०६) इति स्मृतेश्च न्यायदर्शनाख्यस्य तर्कशास्त्रस्य महत्त्वं सर्वथा सिद्धम्। महर्षिगौतमप्रणीतमिदं न्यायदर्शनमान्वीक्षिकीविद्याहेतुविद्यातर्कशास्त्रप्रमाणशास्त्राक्षपाददर्शनादिपर्यायैश्च सम्बोध्यते। "तर्कं पठ कृषिं कुरु" इति प्रसिद्धया च जीवनसाफल्यार्थमिदं सर्वैः पठनीयमिति ज्ञायते। न्यायसूत्रभाष्यकारेण वात्स्यायनेनापि न्यायदर्शनमहत्त्वमुपपादकं कौटील्यवचनं यथोद्धृतमस्ति-"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥" (न्यायसूत्रम्, १/१/१, भाष्यम्) सर्वशास्त्राणां प्रदीपभूतस्य न्यायदर्शनस्य महत्त्वं सर्वैरपि पौरस्त्यचिन्तकैः सर्वत्र समुपपादितम्। न्यायदर्शने प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानीति षोडशपदार्थानां तत्त्वज्ञानान् निःश्रेयसाधिगमो भवतीति प्रतिपादितमस्ति। "प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दः" (न्यायसूत्रभाष्यम्, १/१/३) "साधनाश्रयव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम्" (सर्वदर्शनसङ्ग्रहः-अक्षपाददर्शनम्, पृ.३८९) "येनार्थं प्रमिणोति तत्प्रमाणम्" (वात्स्यायनभाष्यम्, १/१२), "यथार्थानुभवः प्रमा, तत्साधनञ्च प्रमाणम्" (उदयनाचार्यः, न्याय-कुसुमाञ्जलिः), "उपलब्धिहेतुः प्रमाणम्" (न्यायवार्तिकम्, १/१/१) इत्यादिलक्षण वचनैः ज्ञानस्य साधनत्वेन प्रमाणं विवेचितम्। "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (न्यायसूत्रम्, १/१/३) इति चतुर्विधानि प्रमाणानि न्यायदर्शनेऽङ्गीकृतानि। प्रमीयते यत् तत् प्रमेयम्। अर्थाद् यद् यथार्थरूपेण ज्ञायते तस्य नाम प्रमेयमिति ज्ञायते। तच्च प्रमेयं द्वादशविधं न्यायदर्शनेऽङ्गीकृतम्। "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।" (न्यायसूत्रम्, १/१/९) "अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसारः" (न्यायभाष्यम्, १/१/९) इति वात्स्यायनवचनाद् द्वादशप्रकारकाणामेतेषां प्रमेयाणां ज्ञानादेव मुक्तिरिति न्यायदर्शनेऽङ्गीकृतमस्तीति वक्तुं शक्यते। एवमेव द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाश्च प्रमेयान्तर्गता एव सन्ति। जगद्रूपं द्वादशविधं प्रमेयजातमत्र संक्षेपेण विविच्यते।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal ISSN : 2795-1960

CC-0. In Public Domain. Digitization by eGangotri

१.आत्मा– न्यायदर्शने ज्ञानवानात्मा स च द्विविधः ईश्वरो जीवश्च। ईश्वरः सर्वज्ञ एक एवास्ति चेज्जीवस्तु प्रतिशरीरं भिन्नः। द्विविधोऽप्यात्मा विभुर्नित्यश्च।

२. शरीरम्– सुखदुःखादिभोगसाधनं शरीरम्। भोगायतनं वा शरीरम्। विविधचेष्टाश्रयञ्च शरीरमस्ति। "चेष्टेन्द्रियार्थाश्रयः शरीरम्" (न्यायसूत्रम्, ४/१/२१) इति सूत्राच्च चेष्टानामिन्द्रियाणामर्थानाञ्चाश्रयं शरीरमिति ज्ञायते।

३. इन्द्रियम्– शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियम्। "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः" (न्यायसूत्रम्, ४/१/२१) इति सूत्रात् पञ्चज्ञानसाधनान्येवेन्द्रियाणि। भोगसाधनान्येतानीन्द्रियाणि। एतैश्चेन्द्रियैः गन्धरसरूपस्पर्शशब्दानां ग्रहणं भवति।

४. अर्थः– इन्द्रियमाध्यमेन यस्य ज्ञानं भवति स एवार्थः। सामान्यतया द्रव्यगुणकर्मादयः सर्वेऽपि वस्तुनोऽर्था एव सन्ति। विशेषरूपेण तु रूपरसगन्धस्पर्शशब्दा एवार्थाः। तथा च सूत्रम्– "गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।" (न्यायसूत्रम्, १/१/१४) अर्थाद् घ्राणादीन्द्रियैर्ग्राह्याः पृथिव्यादीनां गन्धादयो गुणा एवात्रार्थपदवाच्याः सन्ति।

५. बुद्धिः– ज्ञानमेव बुद्धिपदवाच्यम्। बोधनं बुद्धिः, बुद्ध्यतेऽनया सा बुद्धिरिति व्युत्पत्त्या चार्थोपलब्धिरेव बुद्धिरिति ज्ञायते। "बुद्धिरूपलब्धिर्ज्ञानमित्यर्थान्तरम्" (न्यायसूत्रम्, १/१/१५) इति सूत्राच्चोपलब्धिर्ज्ञानं वा बुद्धिगम्यार्थः बुद्धिपर्यायो वा।

६. मनः– सुखाद्युपलब्धिसाधनमिन्द्रियं मन इत्युच्यते। "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" (न्यायसूत्रम् १/१/१६) इतिसूत्राद् युगपद् ज्ञानानामनुत्पत्तिरेव मनसो लक्षणम्। अर्थात् तत्तदिन्द्रियाणां तत्तद्विषयसन्निकर्षे जातेऽपि समेषां युगपज्ज्ञानं न भवति। "ज्ञानायौगपद्यादेकं मनः" (न्यायसूत्रम् ३।२।५८) इति सूत्राच्च ज्ञानानां युगपदनुत्पत्तेरपि मनः प्रतिशरीरमेकमेवेति सिद्ध्यति, तच्च नानाविधं प्रतिजीवनियतमणुरूपमेकमेवेति नित्यञ्च।

७. प्रवृत्तिः– वाचिकी, मानसिकी, कायिकी च क्रिया प्रवृत्तिरित्युच्यते। "प्रवृत्तिर्वाक्बुद्धिशरीरम्भः" (न्यायसूत्रम्, १/१/१७) इति सूत्राच्च प्रवृत्तेस्त्रैविध्यमुपपादितम्। शुभाशुभात्मकं कर्मैव प्रवृत्तिः। शुभाप्रवृत्तिरशुभा–प्रवृत्तिश्च दशधेति वात्स्यायनमतम्। तथा चोक्तम्– "दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्ध–मैथुनान्याचरति, वाचाऽनृतपुरुषसूचनासम्बद्धा, मनसा परद्रोहं परद्रव्याभीप्सा नास्तिक्यञ्चेति, सेयं पापात्मिका प्रवृत्तिरधर्माय। अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्चेति, वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति, मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्माय।" (न्यायभाष्यम्, १/१/२) एवं भाष्यावलोकनात् पापात्मिकाः क्रिया अशुभाः प्रवृत्तयः सन्ति चेत् पुण्यात्मिकाः क्रियाः शुभाः प्रवृत्तयः सन्तीति ज्ञायते।

८. दोषाः– प्रवृत्तिजनकाः दोषाः सन्ति। "प्रवर्तना–लक्षणदोषाः" (न्यायसूत्रम्, १/१/१८) इति सूत्राच्च। ते च दोषाः रागद्वेषमोहाः सन्ति। "तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्" (न्यायसूत्रम्, ४/१/३) इति सूत्रे सङ्केतितानां त्रिविधदोषाणां व्याख्यानं वात्स्यायनेन यथा विहितम्– "तेषां दोषाणां त्रयो राशयः त्रयःपक्षाः। रागपक्षः– कामः, मत्सरः, स्पृहा, तृष्णा, लोभ इति। द्वेषपक्षः– क्रोध ईर्ष्याऽसूया द्रोहोऽमर्ष इति। मोहपक्षः– मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति।" (न्यायभाष्यम्, ४/१/३) एवं प्रवृत्तिजनक एव दोष इति ज्ञायते। स च रागद्वेषमोहभेदात् त्रिविधः। दोषवशादेव जीवाः पुण्यपापकर्मसु प्रवृताः भवन्ति, तस्मात्कारणाच्च तत्कर्मफलरूपाणि सुखदुःखानि सर्वेऽपि जीवा अनुभवन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. प्रेत्यभावः– मृत्वा पुनर्जन्म एव प्रेत्यभावः, "पुनरुत्पत्तिः प्रेत्यभावः" (न्यायसूत्रम्, १/१/१९) इति सूत्राच्च। पूर्वशरीरपरित्यागेनापरशरीरग्रहणमेव प्रेत्यभाव इति ज्ञायते। "सोऽयं जन्म-मरण-प्रबन्धाभ्यासो-ऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्यः।" (न्यायभाष्यम्, १/१/१९) इति वात्स्यायनोक्तेश्च जन्ममरणरूपावृत्ति-रूपोऽयं प्रेत्यभावोऽनादिरपवर्गान्त इति सिद्ध्यति।

१०. फलम्– "प्रवृत्तिदोषजनितोऽर्थ फलम्" (न्यायसूत्रम्, १/१/२०) इति सूत्रात् सुखदुःखसंवेदनं फलम् (न्यायभाष्यम्, १/१/२०) इति भाष्यवचनात् , "सोऽयं फलशब्दः सुखदुःखभोगे मुख्यः शरीरादिषु गौणः।" (न्यायवार्तिकम्, १/१/२०) इति वार्तिकवचनाच्च सुखादिसाक्षात्कार एव फलमित्यवगम्यते।

११. दुःखम्– पीडाबोधस्तथा सन्ताप एव दुःखमित्युच्यते। "बाधनालक्षणं दुःखम्" (न्यायसूत्रम्, १/१/२१) इति सूत्राच्च वेदनायाः कारणं वेदनैव वा दुःखमित्यवगम्यते। तथा चोक्तं वात्स्यायनेन– "बाधना=पीडा=ताप इति। तयाऽनुविद्धमनुषक्तमविनाभावेन वर्तमानं दुःखयोगाद् दुःखमिति।" (न्यायभाष्यम्, १/१/२१) तथैव वार्तिक-कारेणोद्यतकरेण चोक्तम्– "शरीरादिबाधनानुषङ्गाद् दुःखमित्युच्यते।" (न्यायवार्तिकम्, १/१/२१) एवं दुःखानुषक्तत्वाद् विषयसुखमपि दुःखमेवेति न्यायमतम्। "मधुविषसंपृक्तान्नमनादेयमिति एवं सुखं दुःखानुषक्त-मनादेयमिति" (न्यायभाष्यम्, १/१/२) इति वात्स्यायनोक्तेश्च संसारिकसुखस्यापि दुःखरूपत्वमेवाङ्गीकृतम्। एवम् "शरीरम् षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखम्, दुःखञ्चेति"(न्यायवार्तिकम्, १।१।१) एकविंशति-विधदुःखानि न्यायदर्शनेऽङ्गीकृतानि सन्ति।

१२. अपवर्गः– पतनम्, फलाशा, बन्धनम्, भयम्, मृत्युश्चेति पवर्गः, न पवर्ग इत्यपवर्गः। अतोऽपवर्गपदेन मोक्षोऽवगम्यते। अर्थात् संसारस्यात्यन्तोपरमोऽपवर्गशब्दस्यार्थो भवति। "तदत्यन्तविमोक्षोऽपवर्गः" (न्यायसूत्रम्, १/१/२२) इत्यस्मिन् सूत्रे तत्पदेन "बाधनालक्षणं दुःखम्" (न्यायसूत्रम्, १/१/२१) इति पूर्वसूत्रसूचितस्य दुःखस्यावमर्शो विहितः। एतेन तस्य दुःखस्यात्यन्तविमोक्षोऽत्यन्तनिवृत्तिरेवापवर्गपदार्थः। एवमेव– "उपात्तस्य जन्मनो हानमन्यस्य चाऽनुपादानम्" (न्यायभाष्यम्, १/१/२२) इति वात्स्यायनवचनात् प्राप्तस्य जन्मनो नाशोऽन्यस्य जन्मनोऽभावश्चापवर्ग इति स्पष्टं भवति।

एवं प्रमाणेन ज्ञातुं योग्यं प्रमेयम्। प्रमेयाणि च शरीरेन्द्रियादीनि। तत्रात्मना सह शरीरेन्द्रियादीनां प्रमेयत्वमिति विविच्य तदेव प्रमेयजातं जगदिति वक्तुं शक्यते। पूर्वोक्तानि द्वादशसङ्ख्यकानि प्रमेयाणि च सर्वाणि जगत्यां नैव समागच्छन्ति। जडजगत्यां भौतिकानि द्रव्याणि भवन्ति। द्वादशप्रमेयेषु प्रमेयत्वेन गणितेष्वात्मा, ज्ञानम्, मनश्च नैव भौतिकतत्त्वानि। एवं कालः दिक् च नैव भौतिकतत्त्वे स्तः, किन्तु सर्वाण्यपि भौतिकद्रव्याणि दिशायां काले चावतिष्ठन्ति। आकाश एकोऽपरिणामी भूतमस्ति। एतज्जडस्वरूपं जगद् भूतेभ्यः (पृथिव्यप्तेजोवायुभ्यः) निर्मितमस्ति। एतानि चतुर्विधानि भूतानि स्वस्वपरमाणुभिर्निर्मितानि भवन्ति। परमाणवो नित्या अपरिवर्तन-शीलाश्च सन्ति। आकाशः, कालः, दिक् च नित्यानि विभुद्रव्याणि विद्यन्ते। तानि च त्रीणि द्रव्याणि नैव परमाणुभि-रुत्पन्नानि। परमाणुसंयोगात् समुत्पन्नाः सर्वेऽपि पदार्थाः, तेषां गुणाः, पारस्परिकः सम्वन्धश्च सर्वेऽपि ज्ञेयाः जगदन्तर्भूताः सन्ति। अस्य च जगतः स्रष्टृत्वेन, पालयितृत्वेन, संहर्तृत्वेन चेश्वरस्यास्तित्वं न्यायदर्शने स्वीक्रियते। सोऽयमीश्वरः शून्यादेव सृष्टिं कर्तुमसमर्थो विद्यते किन्तु परमाणुभिर्दिक्कालाकाशादिभिश्च जगत्सृष्टिं करोति। ईश्वरे विद्यमानायाः सत्तायाः जगद्रूपेण रूपान्तरणमेव हि जगत्सृष्टिः। एतज्जगद्धर्मप्रधानं विद्यते। अस्मिन् जगत्प्रपञ्चे जीवात्मा स्वकृतपुण्यपापरूपाणि सुखदुःखान्युपभुङ्क्ते। जीवानामाध्यात्मिकलक्ष्यपूर्तये जगत्प्रपञ्चस्य जडद्रव्याणि साधनानि भवन्ति। अत ईश्वरः संसारस्यादिकर्ता विद्यते परमुपादानकारणं तु नास्ति। घटं प्रति कुलाल इव जगत्प्रति निमित्तकारणमेवेश्वरो विद्यते। ईश्वरो न केवलं कर्ताऽपि तु पालकः संहारकश्चास्ति। स चेश्वर

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकोऽनन्तो नित्यश्चास्ति। दिक्, कालः, मनः, आत्मा चैनमीश्वरं परिच्छिन्नं कर्तुं न शक्नुवन्ति। तेषु च पदार्थेष्वीश्वरस्य सम्बन्धः खलु शरीरे आत्मन इव मन्यते। एतस्य जगत्कार्यस्य यः कर्ता स एवेश्वर इति न्यायमतम्। परमाणुजन्यानां गिरिसरिदादीनां सावयवपदार्थानां कारणानि भवन्त्येवेति सुनिश्चितम्। दिक्कालाकाशात्मानां तु निरवयवत्वान्नैव कार्यत्वम्। तदतिरिक्तानां गिरिसमुद्रसूर्यतारानक्षत्रादीनां सावयवत्वाच्च कार्यत्वम्। क्षित्यादीनां न च विभुत्वम्, न चाणुत्वम्, अतस्तेषां सर्वेषां खलूपादानकारणपरमाणुसंयोगादुत्पत्तिः, परमाणुवियोगाच्च विनाशः। कार्यरूपस्य जगत्प्रपञ्चस्य दृष्टत्वात् तत्सर्जकत्वेन कस्यापि बुद्धिमतश्चेतनस्य सिद्धिर्भवति, स एव सर्वज्ञः सर्वशक्तिमान् चेतन ईश्वर इति न्यायदर्शनमतम्। एवं न्यायदर्शने दृश्यमानजगत्प्रपञ्चस्य निमित्तकारणत्वेनैवेश्वरास्तित्वमङ्गीकृतमस्तीति न्यायदर्शनाभिमतजगत्स्वरूपविवेकः।

वैशेषिकदर्शनाभिमतजगत्स्वरूपविवेकः

महर्षिकणादेन प्रणीतमिदं वैशेषिकदर्शनं सर्वशास्त्रोपकारकमिति सर्वेऽपि पौरस्त्यदार्शनिकाः स्वीकुर्वन्ति। काणाददर्शनम्, काश्यपीयदर्शनम्, औलूक्यदर्शनम्, उलूकदर्शनञ्चेत्यादिसंज्ञाभिरेतद्दर्शनं सम्बोध्यते। "अथातो धर्मं व्याख्यास्यामः" (वैशेषिकसूत्रम्, १/१/१) इति सूत्रयित्वा "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" (वैशेषिकसूत्रम्, १/१/२) इत्यादिना धर्मस्वरूपं प्रतिपादयता कणादेन निःश्रेयसप्रयोजकीभूतधर्मप्रतिपादनपरत्वमेव वैशेषिकदर्शनस्य लक्ष्यमित्यङ्गीकृतम्। "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान् निःश्रेयसम्" (वैशेषिकसूत्रम्, १/१/४) इत्यनेन च सूत्रेण तदेव लक्ष्यीकृतम्। वैशेषिकदर्शने संसारिकवस्तूनां कृते पदार्थशब्दः प्रयुक्तो विद्यते। "पदस्यार्थः पदार्थः" (तर्कसङ्ग्रहः, दीपिकाटीका) "ऋच्छन्तीन्द्रियाणि यं सोऽर्थः" इति व्युत्पत्त्याऽभिधेयवस्तुरेव पदार्थ इति ज्ञायते। वैशेषिकैः खलु भावाभावभेदेन पदार्थस्य द्वैविध्यमङ्गीकृतम्। तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षड्विधा भावपदार्थाः सन्ति चेदेकोऽभावपदार्थोऽस्ति, तथा चोक्तम्–"द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्। समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः॥" (कारिकावली २) अत्र च वैशेषिकाङ्गीकृतानामेतेषां सप्तपदार्थानां संक्षेपेण चर्चा विधीयते।

क. द्रव्यम्– प्रथमपदार्थत्वेन वैशेषिकदर्शने द्रव्यं विवेचितमस्ति। तत्र "क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्" (वैशेषिकसूत्रम, १/१/१५) इति द्रव्यलक्षणमुक्तमस्ति। क्रियावत्वम्, गुणवत्वम्, समवायिकारणत्वञ्च द्रव्यस्य त्रीणि लक्षणानि। पुनश्च माधवाचार्येणापि "द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति गन्धासमवेतत्त्वम्" (सर्वदर्शनसङ्ग्रहः– औलुक्यदर्शनम्, पृ. ३४७) इति द्रव्यलक्षणं समुपस्थापितमस्ति, तच्च द्रव्यं नवविधमङ्गीकृतम्। "पृथिव्यापस्तेजो वायुराकाशं मन इति द्रव्याणि" (वैशेषिकसूत्रम्, १/१/५) इति सूत्राद् द्रव्याणां नवप्रकारकत्वमुल्लिखितम्। तथा चोक्तं वरदराजाचार्येणापि–"भूरापोज्योतिरनिलो नभः कालस्तथा दिशा। आत्मा मन इति प्राहुर्द्रव्याणि नव तद्विदः॥" (तार्किकरक्षा, द्रव्यनिरूपणम्) एतेषां नवद्रव्याणाञ्चात्र साङ्केतिकः परिचय उपस्थाप्यते।

१. पृथिवी– "रूपरसगन्धस्पर्शवती पृथिवी" (वैशेषिकसूत्रम्, २/१/१) इति कणादेन पृथिवीलक्षणमुल्लिखितम्। सा च पृथिवी नित्यानित्यभेदेन द्विविधा। तत्र परमाणुस्वरूपा नित्या चेद् द्वयणुकादिब्रह्माण्डान्तात्वनित्या। सा चानित्या पृथिवीशरीरेन्द्रियविषयभेदात् त्रिविधाऽस्ति। तत्र पार्थिवं शरीरं योनिजमयोनिजञ्चेति द्विविधम्। "तत्र शरीरं द्विविधं योनिजमयोनिजञ्च" (वैशेषिकसूत्रम्, ४/२/५) इति सूत्राच्च। तत्र शुक्रशोणितमनपेक्ष्योत्पन्नं देवानामृषीणाञ्च शरीरमयोनिजमित्युच्यते चेत् तद्विपरीतं शुक्रशोणितसन्निपातजं पशुपक्षिमनुष्यादीनां शरीरं योनिजमित्युच्यते। तथा चोक्तं प्रशस्तपादाचार्येण– "तत्रायोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योनिजम्। तद्द्विविधं जरायुजमण्डञ्च। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्।" (प्रशस्तपाद-भाष्यम्, द्रव्ये पृथिवीप्रकरणम्, पृ.८२) एतेन जरायुजमण्डजञ्चेति योनिजं शरीरं द्विविधम्। वाक्पाणि-पादपायूपस्थाद्यङ्गैश्चक्षुरादीन्द्रियैश्च युक्तं शरीरं जरायुजमुच्यते चेदण्डेन वेष्टितं सदुत्पद्यमानं पक्षिसरीसृपादीनां शरीरमण्डजमुच्यते। समग्रतया शरीरं खलु स्वेदजजरायुजाण्डजोद्भिज्जभेदेन चतुर्विधं भवति।

२. जलम्- "शीतस्पर्शवत्य आपः" (तर्कसङ्ग्रहः, पृ.२५) इति जलस्य लक्षणम्। तत्र च माधवाचार्येण "अप्त्वं नाम सरित्सागरसमवेतत्त्वे सति ज्वलनासमवेतं सामान्यम्" (सर्वदर्शनसंग्रहः- औलुक्यदर्शनम्, पृ. ३५२) इति सङ्गृहीतम्। कणादेन च "रूपरसस्पर्शवत्य आपः" (वैशेषिकसूत्रम्, २/२/१) इति जललक्षणं विहितम्। तत्र प्रशस्तपादाचार्येण च "अप्त्वाभिसम्बन्धादापः" (प्रशस्तपादभाष्यम्, द्रव्ये जलप्रकरणम्, २०५३, पृ. ९०) इति जललक्षणं प्रोक्तमस्ति। तत्र जलमपि द्विविधम्- नित्यमनित्यञ्च। नित्यं परमाणुरूपमनित्यञ्च कार्यरूपम्। अनित्यञ्च जलं शरीरेन्द्रियविषयरूपं त्रिविधम्। जलीयं शरीरं वरुणलोके प्रसिद्धमित्युच्यते। जलीयमिन्द्रियं रसनेन्द्रियम्। जलीयो विषयस्तु सर्वप्रकारकं सरित्समुद्राद्यनुभवविषयीभूतं जलमित्यङ्गीक्रियते।

३. तेजः "ऊष्णस्पर्शवत्तेजः" (तर्कसङ्ग्रहः, पृ.१३) इत्युक्तेरूष्णस्पर्शवत्त्वं तेजसो लक्षणम्। कणादेन "तेजो रूपस्पर्शवत्" (वैशेषिकसूत्रम्, ८/२/६) इति लक्षणं विहितम्। प्रशस्तपादाचार्येण च "तेजस्त्वाभिसम्बन्धात् तेजः" (प्रशस्तपादभाष्यम्, द्रव्ये जलप्रकरणम्, पृ. ९७) इत्युक्तमस्ति। "तेजस्यूष्णता" (वैशेषिकसूत्रम्, २/२/४) इति कणादसूत्रेणोष्णस्पर्शत्वं तेजसः स्वाभाविकगुणोऽङ्गीकृतः। "तेजो रूपस्पर्शवत्" (वैशेशिकसूत्रम्, २/१/३) इति च कणादसूत्रमुपलभ्यते। नित्यानित्यभेदेन तेजोऽपि द्विविधम्। नित्यं परमाणु रूपमनित्यञ्च कार्यरूपम्। कार्यरूपञ्च तेजः शरीरेन्द्रियविषयभेदात् त्रिविधम्। एतञ्च शरीरमयोनिजम् तच्चादित्यलोके प्रसिद्धमित्युच्यते। एवमिन्द्रियं सर्वप्राणिनां रूपव्यञ्जकं चक्षुरिन्द्रियम्, तत्सत्त्वे रूपाभिव्यक्तिः प्रमाणम्। विषयसंज्ञं तेजश्च चतुर्विधं प्रसिद्धम्। प्रोक्तञ्च प्रशस्तपादाचार्येण- "भौमं दिव्यमुदर्यमाकरञ्च। तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलनस्वभावं पचन-दहन-स्वेदनादिसमर्थम्, दिव्यमबिन्धनं सौरविद्युदादि, भुक्तस्याहारस्य रसादिपरिमाणार्थमुद्यम्, आकरजञ्च सुवर्णादि।" (प्रशस्तपादभाष्यम्, द्रव्ये तेजःप्रकरणम्, पृ.१००-१०२) एवं वैशेषिकदर्शनाभिमततेजस्तत्त्वसम्बद्धमतं सुस्पष्टम्।

४. वायुः- कणादमुनिना "स्पर्शवान् वायुः" (वैशेषिकसूत्रम्, २/१/४) इति वायोर्लक्षणमभिहितम्। प्रशस्त-पादेनापि "वायुत्वाभिसम्बन्धाद्वायुः" (प्रशस्तपादभाष्यम्, द्रव्ये वायुप्रकरणम्, पृ. १११) इति वायुलक्षणं प्रोक्तम्। "स्पर्शश्च वायोः" (वैशेषिकसूत्रम्, २।१।९) इत्यभिधानाद् वस्तुतः स्पर्शवत्त्वमेव वायोः स्वरूपम्। नित्योऽनित्यश्चेति वायुर्द्विविधः। अत्रापि नित्यः परमाणुरूपोऽनित्यश्च कार्यरूपः। कार्यरूपोऽयं वायुश्च शरीरेन्द्रियविषयप्राण-भेदाच्चतुर्विधः। तत्र शरीरमयोनिजम्, तच्च मरुल्लोके प्रसिद्धमित्युच्यते। इन्द्रियं सर्वप्राणीनां स्पर्शोपलम्भकं त्वगिन्द्रियम्। तत्सत्त्वे च स्पर्शोपलब्धिरेव प्रमाणम्। "विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः। स्पर्शशब्दधृतिकम्प-लिङ्गस्तिर्यग्गमनस्वभावो मेघादिप्रेरणधारणादिसमर्थः।" (प्रशस्तपादभाष्यम्, द्रव्ये वायु-प्रकरणम्, पृ.११४-११५) स्पर्शाधिष्ठानत्वेन, तिर्यग्गमनस्वभावत्वेन, मेघादिप्रेरकत्वेन, तद्धारकत्वेन च विषयरूप-वायोः स्वरूपं वैशेषिकदर्शनेऽङ्गीकृतम्। "प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन्, क्रियाभेदादपानादि-संज्ञां लभते।" (प्रशस्तपादभाष्यम्, द्रव्ये वायुप्रकरणम्, पृ.१२०) अर्थादन्तःशरीरे यो वायुर्वर्तते स प्राण इत्युच्यते। एवमुत्पत्तिमन्ति चत्वारि द्रव्याणि संक्षेपेण चर्चितानि।

५. आकाशः- शब्दस्य समवायिकारणत्वेनाकाशस्य चर्चा वैशेषिकसिद्धान्ते क्रियते। "परिशेषाल्लिङ्ग-माकाशस्य" (वैशेषिकसूत्रम्, २/१/२७) इति कणादसूत्रेण परिशेषानुमानादाकाशस्य लिङ्गं शब्द इति

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपादितम्। अष्टद्रव्येषु शब्दो नैवावतिष्ठते, यस्मिन् द्रव्ये शब्दस्तिष्ठति तदेव द्रव्यमाकाशमिति परिशेषानुमानस्य तात्पर्यमित्यवबोध्यते। तथा चोक्तं शङ्करमिश्रेण– "अत्रापि शब्दः क्वचिदाश्रितो गुणत्वाद् रूपवदिति सामान्यतो दृष्टाल्लिङ्गादष्टद्रव्यातिरिक्तद्रव्याश्रितत्वे शब्दे सिद्धिः।" (वैशेषिकसूत्रोपस्कारः, २/१/१७, पृ. १५१) एवं मिश्रेण सामान्यतो दृष्टानुमानेनैवाष्टद्रव्यातिरिक्ततद्रव्यस्य सिद्धिर्भवतीति मतमुपस्थापितम्, परिशेषानुमानेनाकाशे शब्दनिरूपिताश्रयत्वसिद्धिः न त्वष्टद्रव्यातिरिक्तद्रव्यसिद्धिरिति प्रतिपादितम्। आकाशस्य नित्यत्वान्नैतस्य कार्यत्वम्। कर्णशष्कुल्यवच्छिन्नाकाशस्यैव श्रोत्रेन्द्रियत्वम्। एवमाकाशतत्त्वं स्पष्टम्।

६. कालः– "अतीतादिव्यवहारहेतुः कालः" (तर्कसंग्रहः, पृ.३८) इति लक्षणेन "आसीत्, अस्ति, भविष्यति" इत्यादिव्यवहारहेतुरेव काल इति प्रतिपादितम्। "अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि" (वैशेषिकसूत्रम्, २/२/६) इति सूत्रेण कालस्यानुमेयत्वमङ्गीकृतम्। एतत्सूत्रव्याख्याक्रमे शङ्करमिश्रोणोक्तं यद् "इतिकारो ज्ञानप्रकारपरः प्रत्येकमभिसम्बध्यते, तथा चापरमिति प्रत्ययो युगपदितिप्रत्ययः चिरमितिप्रत्ययः क्षिप्रमितिप्रत्ययः काललिङ्गानीत्यर्थः।" (वैशेषिकसूत्रोपस्कारः २/२/६, पृ. १६०) वस्तुतः कालोऽयं सर्वेषां कार्यजातानां कारणं विद्यते। "सर्वकार्याणाञ्चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात्" (प्रशस्तपादभाष्यम्, द्रव्ये कालप्रकरणम्, पृ.१५६) इति प्रशस्तपादाचार्येण सर्ववस्तुजनकत्वेन जगदाश्रयत्वेन सर्वसंहर्तृत्वेन वास्य कालस्य चर्चा विहिताऽस्ति। विश्वनाथपञ्चानभट्टाचार्येणापि प्रोक्तम्–"जन्यानां जनकः कालो जगतामाश्रयो मतः।" (कारिकावली–४५) कालव्यतिरेकेण गर्भबालयुवादिकं न संभवति, लोके यत्किञ्चिज्जायते तदसौ काल एव कारणमस्ति। एतेन वैशेषिकाभिमतं कालाख्यं द्रव्यं स्पष्टं भवति।

७. दिक्– इदमस्माद् दूरमिदमस्यादन्तिकमिति निर्धारकं लिङ्गमेव दिगाख्यं द्रव्यम्। "इत इदमिति यतस्तद्दिश्यं लिङ्गम्" (वैशेषिकसूत्रम्, २/२/१०) इति कणादेनोक्तम्। दिशेयमाकाशवदेका, नित्या, अमूर्ता चास्ति। उपाधिभेदेन दिशायाः पूर्वपश्चिमोत्तरदक्षिणादिभेदव्यवहारो भवति। अस्मात्पूर्वमिदम्, अस्मादुत्तरमिदम्, अस्माद् दक्षिणपूर्वमिदम्, अस्माद्दक्षिणपश्चिममिदम्, अस्मात्पश्चिमोत्तरमिदम्, अस्मादुत्तरपूर्वमिदम्, अस्मादधस्तादिदम्, अस्मादुपरिष्टादिदमित्यादयः प्रत्यया इत इदम्, इत्यनेन भवन्ति। "कार्यविशेषेण नानात्वम्" (वैशेषिकसूत्रम्, २/२/१३) इति सूत्रेण दिशाया एकत्वेऽपि कार्यविशेषेण नानात्वव्यवहारो भवतीति प्रतिपादितम्। एतेन वैशेषिकसम्मतदिक्स्वरूपं स्पष्टम्।

८. आत्मा– "अहं दुःखी" "अहं सुखी" "अहं करोमि", "अहं जानामि" इत्याद्यनुभवबलादात्मा सिद्ध्यति। "आत्मेन्द्रियार्थसन्निकर्षात्तावज्ज्ञानमुत्पद्यते तच्चात्मनि प्रमाणम्।" अतएव कणादेन सूत्रितम्–"आत्मेन्द्रियार्थ-सन्निकर्षाद्यन्निष्पद्यते तदन्यत्।" (वैशेषिकसूत्रम्, ३/१/१८) एतेन ज्ञानाश्रयत्वेनात्मनः सिद्धिर्भवतीति वैशेषिकमतम्। न केवलं ज्ञानमेवात्मनो लिङ्गमपि तु प्राणादयोऽपि तस्यात्मनो लिङ्गानीति कणादेन सूत्रितम्– "प्राणापाननिमिषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि।" (वैशेषिक-सूत्रम्, ३/२/४) एवमेव वैशेषिकदर्शने ज्ञानाश्रयत्वेन, शरीरेन्द्रियमनोबुद्धिभिन्नत्वेन, अनेकत्वेन, विभुत्वेन, नित्यत्वेन चात्मास्तित्वमङ्गीकृतमवलोक्यते। न्यायदर्शनवद् वैशेषिकदर्शनेऽपि जीवेशभेदेनात्मनो द्वैविध्यमङ्गीक्रियते। परमात्मा च नित्यो विभुः सर्वशक्तिमान् सर्वज्ञो नित्यज्ञानवान् विद्यते, स एवास्य जगत्प्रपञ्चस्य निमित्तकारणमस्तीति वैशेषिकमतम्। तत्र जीवो नाम जीवनादृष्टविशिष्ट आत्मेत्युच्यते। जीवनञ्च नाम प्राणनम्। एवमदृष्टविशिष्टस्यात्मन एव जीवत्वमित्यङ्गीकृतमिति वैशेषिकाभिमतात्मस्वरूपं स्पष्टम्।

९. मनः– सुखदुःखाद्युपलब्धिसाधनमिन्द्रियमेव मनः। तत्र चक्षुरादीन्द्रियाणि बाह्यसाधनानि चेन्मन आन्तरिकं साधनम्। "मनस्त्वयोगान्मनः" (प्रशस्तपादभाष्यम्–द्रव्यप्रकरणम्, पृ.२१६) इति प्रशस्तपादाचार्येणोक्तम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्यैव भाष्यस्य व्याख्यानक्रमे श्रीधरभट्टेन मनसो निरूपणं यथा विहितम्- "आत्मनस्तावत् सर्वेन्द्रियैर्युगपत् सम्बन्धोऽस्त्येव, इन्द्रियाणामपि सन्निहितैरर्थैः सन्निकर्षो भवति, तथाप्येकस्मिन् विषये प्रतीयमाने विषयान्तरे ज्ञानसुखादयो न भवन्ति तदुपरमाच्च भवन्तीति दृश्यते, तद्तद्दर्शनादात्मेन्द्रियार्थसन्निकर्षेभ्यः करणान्तरमनुमीयते, यस्य सन्निधानाज्ज्ञानसुखादीनामुत्पत्तिः, असन्निधानाच्चानुत्पत्तिः। आत्मेन्द्रियार्थसन्निकर्षाः कार्योत्पत्तौ करणान्तरसापेक्षाः, सत्यपि सद्भावे कार्यानुत्पादकत्वात्, तन्त्वादिवत्, यच्च तदपेक्षणीयं तन्मनः।" (प्रशस्तपादभाष्यम्, द्रव्ये मनःप्रकरणम्, न्यायकन्दलीभाष्यम्, पृ. २१६-२१७) तत्र श्रोत्रादीनामव्यापारेऽपि स्मृत्युत्पत्तिदर्शनाद् बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणं सिद्ध्यतीति वैशेषिकराद्धान्तः। ज्ञानायौगपद्यहेतुना, प्रयत्नायौगपद्यहेतुना च मनस एकत्वमङ्गीकृतम्। तथा च कणादेन "प्रयत्नयौगपद्याज् ज्ञानायौगपद्याच्च प्रतिशरीरमेकं मनः" (वैशेषिकसूत्रम्, ३/२/३) इति सूत्रितम्। मनसोऽनेकत्वे ह्यात्ममनःसंयोगानां बहुत्वाद्युगपज्ज्ञानानि प्रयत्नाश्च भवेयुः, किन्त्वलातचक्रभ्रमणवत् पृथक् पृथग् ज्ञानमुत्पद्यते, प्रयत्नानामपि क्रमोत्पाद एव दृश्यते। तस्मादेकमेव मनः संसिद्धम्। "तस्य च मनसः सङ्ख्या, परिणामम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम् संस्कारश्चेत्यष्टविधा गुणाः सन्ति।" (प्रशस्तपादभाष्यम्, द्रव्ये मनःप्रकरणम्, न्यायकन्दली, पृ. २२१) एवं गुणवत्वान्मनसो द्रव्यत्वं संसिद्धम्। एवं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनसां नवद्रव्याणाञ्चर्चा संक्षेपेण विहिता।

ख. गुणपदार्थः- "द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्।" (वैशेषिकसूत्रम्, १/१/१६) इति कणादप्रोक्तसूत्रानुसारं गुणः द्रव्याश्रितो भवति, अगुणवान् भवति, संयोगविभागेष्वकारणं भवति, निरपेक्षश्च भवति। शङ्करमिश्रेणापि "सामान्यवत्त्वे सति कर्मान्यत्वे च सत्यगुणत्वमेव वा गुणलक्षणम्।" (वैशेषिकसूत्रोपस्कारः, गुणनिरूपणम्, १/१/१६, पृ.१५) वैशेषिकदर्शने गुणस्य चतुर्विंशतिभेदाः स्वीक्रियन्ते, यथा- "रूपरसगन्धस्पर्शाः सङ्ख्याः परिणामानि पृथकत्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः।" (वैशेषिकसूत्रम्, १/१/६) प्रशस्तपादाचार्येणैतेषां चतुर्विंशतिगुणानां मूर्तामूर्तोभयभेदेन विभाजनं कृत्वा यथा प्रदर्शितम्- "रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगाः मूर्तगुणाः। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अमूर्तगुणाः। सङ्ख्यापरिणामपृथक्त्वसंयोगविभागा उभयगुणाः।" (प्रशस्तपादभाष्यम्, गुणप्रकरणम्, पृ. २२९) एतेषां चतुर्विंशतिगुणानां चर्चाऽत्र नैव विधीयतेऽस्मिन्नालेखेऽनावश्यकत्वात्।

ग. कर्मपदार्थः- "चलनात्मकं कर्म" (तर्कसङ्ग्रहः, पृ. १६७) इत्युक्तेः द्रव्यस्य चलनं गतिरेव वा कर्म "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि" (वैशेषिकसूत्रम्, १/१/७) इति कणादसूत्रानुसारं कर्मणः पञ्चविधत्वम्- १. उत्क्षेपणम्, २.अवक्षेपणम्, ३.आकुञ्चनम्, ४. प्रसारणम्, ५.गमनञ्चेति।

घ. सामान्यपदार्थः- सामान्यञ्च जातिरित्युच्यते। नित्यत्वे सत्यनेकसमवेतत्त्वं जातेर्लक्षणम्।

ङ. विशेषपदार्थः- "नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः" (तर्कसङ्ग्रहः, पृ १८) इति लक्षणानुसारं व्यवच्छेद एव विशेष इति ज्ञायते।

च. समवायपदार्थः- "इहेदमिति यतः कार्यकारणयोः स समवायः।" (वैशेषिकसूत्रम्, ७/२/२६) इति तन्तुपटयोर्मृद्घटयोर्वा कार्यकारणयोः सम्बन्ध एव समवायः। तथा चोक्तं विश्वनाथभट्टाचार्येण- "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥" (कारिकावली- ११) एतावता समवायसम्बन्धः स्पष्ट एव।

छ. अभावपदार्थः- वैशेषिकदर्शने सप्तमपदार्थत्वेनाभावो विमृष्टोऽस्ति। यद्यपि कणादेन स्पष्टतया भावपदार्थवदभावस्य विशेष उल्लेखो नैव विहितस्तथापि "क्रियागुणव्यपदेशाभावात् प्रागसत्" (वैशेषिकसूत्रम्, ९/१/१) इत्यनेन सूत्रेण प्रागभावः, "सदसत्" (वैशेषिकसूत्रम्, ९/१/२) इत्यनेन ध्वंसः, "सच्चासत्" (वैशेषिकसूत्रम्,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९/१/४) इत्यनेन सूत्रेणान्योन्याभावः, "यच्चान्यादसतस्तदसत्" (वैशेषिकसूत्रम्, ९/१/५) इत्यनेन सूत्रेण चात्यन्ता-भावः सङ्केतितो विद्यते। प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेत्यभावचतुष्टयं वैशेषिकदर्शने विवेचितमस्ति। उत्पत्तेः पूर्वं कार्यस्य समवायिकारणे विद्यमानोऽभावः प्रागभाव इत्युच्यते। विनाशानन्तरं कार्यस्याभावः प्रध्वंस इतमुच्यते "त्रैकालिकसंसर्गाऽवच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताभावः, यथा भूतले घटो नास्ति।" (तर्कसंग्रहः) इतरेतराभाव एवान्योन्याभावः,अश्वे गोरभावः, गव्यश्वस्याभाव एवान्योन्याभावः। एवं वैशेषिकदर्शनाभिमत जगत्स्वरूपज्ञानाय तद्दर्शनाङ्गीतानां द्रव्यगुणकर्मसामान्यविशेषसमवायाभावपदार्थानां सप्तानामेव संक्षेपेण दिग्दर्शनं विहितम्, एतावदेव पर्याप्तञ्चेति दिक्।

वैशेषिकदर्शने कार्यकारणवादः प्रसिद्धो विद्यते। दृश्यमानमेतज्जगत् कार्यं विद्यते, परमेश्वरश्च कारणमस्ति। स चेश्वरो निमित्तमेव कारणं विद्यते। ईश्वरातिरिक्तस्यान्यस्यापि कार्यजगत् प्रत्यपेक्षा भवति। परमाणुरेवोपादानकारणं समवायिकारणं वा मन्यते। यत् कार्यं तदनित्यम्। अर्थात् कार्यजातं विनाशशीलं भवति। कार्यरूपेण च पृथिवी, जलम्, तेजः, वायुरेवास्तित्ववन्तः पदार्थाः सन्ति। अतः प्रलयेऽपि चतुर्णामेव महाभूतानां विनाशो भवति, तानि च चतुर्भूतानि परमाणुरूपेण परिणमन्ते। कार्यस्य कारणरूपेण परिणमनमेव प्रलय इत्युच्यते। प्रयलकाले प्रत्येकजीवात्मा स्वकीयेन मनसा, पूर्वजन्मसंस्कारेण, पुण्यापुण्यरूपादृष्टेन युक्तः सन् तिष्ठति, तस्मिन् समये सृष्टिकार्यमवरुद्धं भवति। यदा च जीवसंस्कारोऽदृष्टो वा कार्यरूपेण परिणमनाय सन्नद्धो भवति, यदा च जीवः सञ्चितकर्माणां स्वादृष्टरूपपुण्यापुण्यानां फलं भोक्तुमिच्छति तदा जीवस्य मोचनार्थं परमात्मा क्षुब्धो भवति, तस्मिन् परमात्मनि जगच्चिकीर्षोत्पद्यते। सृष्टेरेनन्तरं जीवात्मा शरीरं धृत्वादृष्ट्यनुरूपफलं भोक्तुं शक्नोति। तस्य कृते परमाणुसंयोगात् द्व्यणुकं त्रसरेणुकमित्यादिरीत्या भौतिकद्रव्याणामुत्पत्तिर्भवति। अतो जगदुत्पत्यर्थमीश्वरेच्छा महत्त्वपूर्णा भवति। ईश्वरेच्छां प्रति च जीवानां फलभोगकामना कारणं भवति। ईश्वरस्य निमित्तत्वेन परमाणुनाञ्च समवायित्वेन जगत्प्रपञ्चस्य सृष्टिर्भवतीति वैशेषिकदर्शनसिद्धान्तः। सृष्टौ सजातीयपरमाणुरेव नैव कारणमपि तु विजातीयपरमाणूनां संयोगोऽपि कारणं भवति। परमाणुसंयोगाद् द्व्यणुकत्रसरेणुकचतस्रेणुकादिक्रमेण भौतिक-सृष्टिर्भवति। द्रव्याणामुत्पत्तिकालस्य द्वितीयक्षणे गुणानामुत्पत्तिर्भवति। सम्पूर्णेयं सृष्टिः जीवानां भोगार्थैवेति, जीवानां जन्म च सृष्टिभोगार्थमिति सृष्टेः प्रयोजनम्। सृष्टेः क्रम इव लयस्यापि क्रमो वैशेषिक-सिद्धान्ते-ऽङ्गीक्रियते। अर्थाद् यथा परमाणुसंयोगात् सृष्टिर्भवति तथैव द्व्यणुकादिवियोगात् प्रलयो भवति। परमाणु-संयोजनवियोजनयोरीश्वरेच्छैव कारणमित्यङ्गमङ्गीक्रियते। अतः प्रपञ्चसृष्टिं प्रतीश्वरस्य निमित्तकारणत्वं परमाणुनाञ्चोपादानकारणत्वमिति वैशेषिकदर्शनाभिमतजगत्स्वरूपविवेकः।

शाङ्करवेदान्ताभिमतजगत्स्वरूपविवेकः

शाङ्करवेदान्ते ब्रह्मचैतन्यातिरिक्तं स्थावरजङ्गमान्तं सर्वं प्रपञ्चजातं जगदित्युच्यते। "ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति शङ्कराचार्योक्तेश्व जगतो मिथ्यात्वमङ्गीकृतमस्ति। अस्य च जगतोऽपारमार्थिकत्वे तस्य विषये चर्चा व्यर्थैव स्यादिति चेन्न, तस्य व्यावहारिकसत्ताङ्गीकारात्। अद्वैतवेदान्ते सत्तात्रैविध्यमङ्गीक्रियते। ब्रह्मणः सत्ता पारमार्थिकी विद्यते, जगतः सत्ता व्यावहारिकी मन्यते चेद् भ्रमस्थलस्य स्वप्नप्रपञ्चस्य च सत्ता प्रतिभासिकी स्वीक्रियते। ब्रह्मज्ञानोत्तरकाले बाध्यमानेऽपि ब्रह्मज्ञानपूर्वं सत्यत्वेन जगत्प्रपञ्चोऽयं प्रतीयते। व्यवहारकाले दृष्टिगोचरपदार्थानां व्यावहारिकी सत्ता निश्चीयते। व्यवहारिकस्य जगत्प्रपञ्चस्य पञ्चधर्माः स्वीक्रियन्ते- अस्तित्वम्, प्रकाशत्वम्, प्रियत्वम्, रूपत्वम्, अभिधेयत्वञ्च। तथा च प्रसिद्धिः- "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्य त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" (समुद्धृतम्, वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ. ३३३) अर्थादस्ति, भाति, प्रियं, रूपं, नाम चेति पञ्चरूपात्मकं जगद् विद्यते। एतच्च जगन्न ब्रह्मणो भिन्नमिति शङ्कराचार्येण प्रतिपादितम्। तथा चोक्तम्- "कार्यमाकाशादिकं बहुप्रपञ्चं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जगत्। कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्व व्यतिरेकेणाभावः कार्यस्यावगम्यते।" (ब्रह्मसूत्रम्, २/१/१४, शाङ्करभाष्यम्) जगदिदमाविद्यकमनादि चाङ्गीक्रियते। अविद्यात्मकनामरूपव्याकरणापेक्षत्वात् सर्वज्ञस्य, "तस्मादेतस्मादात्मन आकाशः सम्भूतः" (तैत्तिरीयोपनिषद्, २।१) इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्त-स्वभावात् सर्वज्ञात् सर्वशक्तेरीश्वराज्जनिस्थितिलयाः। "सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म, कर्मापेक्षश्च शरीरादिविभाग इतीतरेतराश्रयत्वं प्रसज्येत।... नैष दोषः, अनादित्वात् संसारस्य। भवेदेष दोषो यद्यादिमान्संसारः स्यात्।" (ब्रह्मसूत्रम्, २/१/३५, शाङ्करभाष्यम्) इति शङ्कराचार्यमतेऽस्य संसारस्यानादित्वम्। एवं शङ्कराचार्येण ब्रह्मसूत्रद्वितीयाध्यायान्तर्गतानेकसूत्रव्याख्यानावसरे (ब्रह्मसूत्रम्, २/१/६,२५,३०,३२,३३,३६ इत्यादौ) सविस्तारं जगत्सृष्टिक्रमो विवचितोऽवलोक्यते। एवं मधुसूदनेन सिद्धान्तबिन्दौ च जगत्सृष्टिक्रमो विस्तरेण निरूपितोऽस्ति। "अविद्यातद्व्याप्यतत्कार्यात्मकः प्रपञ्चो दृश्यपदार्थः। तस्यापारमार्थिकत्वेऽपि व्यावहारिकसत्ताभ्युपगमान्न स्वाप्निकपदार्थवन्निरूपणं व्यर्थम्।" (सिद्धान्तबिन्दुः, ८ श्लोकः. पृ. १५०) मधुसूदनवचनेनापि शाङ्करजगत्प्रपञ्चस्य निरूपणं नानर्थकमिति प्रतिपादितम्। जगत्प्रपञ्चोऽयं त्रिविधोऽस्तीति स्वीक्रियते। तथा चोक्तं मधुसूदनेन- "सोऽपि त्रिविधः, अव्याकृतमूर्तामूर्तभेदात्। तत्र साभासाविद्या मूर्तामूर्तप्रपञ्च-बीजशक्तिरूपा। तदजन्यत्वेऽपि तन्निवृत्तौ निवर्तमानत्वेन तद्व्याप्यैश्चैतन्यतत्सम्बन्धजीवेश्वरविभागचिदाभासैः सहानादित्वादव्याकृतमित्युच्यते। अयञ्चाव्याकृत पदार्थ ईश्वरोपाधिः। सा च स्वयं जडाप्यजडेन चिदाभासेनो-ज्ज्वलिता पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती शब्द-स्पर्श-रूप-रस-गन्धात्मकान्याकाश-वायु-तेजो-जल-पृथिव्याख्यानि पञ्चमहाभूतानि जनयति। तत्र पूर्वपूर्वभूतभावापन्नाया अविद्याया उत्तरोत्तरं प्रति कारणत्वात् पूर्वपूर्वभूतगुणानामुत्तरोत्तरभूतेष्वनुप्रवेशः।" (सिद्धान्तबिन्दुः, ८ श्लोकः, पृ. १५०-१५१) अर्थात् सर्गाद्यकाले सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितशक्तिविशेषविशिष्टमायासहितः सन् परमात्मा नामरूपात्मकं जगत् बुद्धावाकलय्येदं करिष्यामीति सङ्कल्पयति, तत आकाशादीनि पञ्चभूतान्यपञ्चीकृतानि जायन्ते। तत्राकाशस्य गुणः शब्दः, वायोस्तु शब्दस्पर्शौ, तेजसस्तु शब्दस्पर्शरूपाणि, जलस्य शब्दस्पर्शरूपरसाः, पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः। तथा चोक्तं विद्यारण्यमुनिना- "शब्दस्पर्शौ रूपरसौ गन्धो भूतगुणा इमे। एकद्वित्रिचतुः-पञ्च गुणा व्योमादिषु क्रमात्॥" (पञ्चदशी, २/३३) एवमविद्यात एव भावरूपस्यान्धकारस्योत्पत्तिर्मन्यते। अन्धकारोत्पत्तिस्तु श्रुतिवाक्ये न श्रूयते इति चेन्न, "संसारहेतुदेहोपादानत्वाभावाच्च न श्रुतिषु सृष्टिप्रक्रियायामाम्नात इत्यविरोधः।" (सिद्धान्तबिन्दुः, ८. पृ. १५१) एवमव्याकृतप्रपञ्चसृष्ट्यनन्तरममूर्तप्रपञ्चस्य सृष्टिर्भवति। तथा चोक्तं मधुसूदनेन- "तानि च सूक्ष्माण्यपञ्चीकृतानि पञ्चमहाभूतान्यमूर्ताख्यानि कारणैक्यात् सत्त्व-रजस्तमोगुणात्मकानि सत्त्वांशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं स्वच्छद्रव्यं चित्ररूपमिव मिलित्वा जनयति। तस्य च ज्ञानशक्तिप्रधानांशोऽन्तःकरणम्, तच्च बुद्धिर्मन इति द्विधोच्यते। क्रियाशक्तिप्रधानांशः प्राणः। स च पञ्चधा प्राणोऽपानो व्यान उदानस्समान इति।" (सिद्धान्तबिन्दुः, ८. पृ.१५२) प्राणस्य पञ्चविधत्वं यथा चोल्लिखितम्- "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः॥" इति हृदयाद्यवच्छिन्न-क्रियाजनकत्वमेव प्राणत्वादिकमिति भावः। तथा चैकैकभूतेभ्यो ज्ञानशक्तिमदेकैकं क्रियाशक्तिमदेकैकञ्चेन्द्रियं जायते। इन्द्रियोत्पतिक्रमश्च यथा- "एवमेकैकभूतेभ्यो ज्ञानक्रियाशक्तिभेदात् प्रत्येकमिन्द्रियद्वयं जायते। आकाशाच्छ्रोत्रवाचौ, वायोस्त्वक्पाणी तेजसश्चक्षुष्पादौ, अद्भयो रसनपायू, पृथिव्याः घ्राणोपस्थौ।" (सिद्धान्तबिन्दुः ८, पृ.१५२) अर्थादेतैः सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तै पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसन-घ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते चेदेतैरेव रजोगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणीपाद-पायूपस्थाख्यानि कर्मेन्द्रियाण्युत्पद्यन्ते। एवमिन्द्रियसृष्ट्यनन्तरं तत्तदधिष्ठातृदेवतानामुत्पत्तिर्भवतीति स्वीक्रियते। तथा चोक्तम्- "श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः।... तेषां (कर्मेन्द्रियाणां) च क्रमेण बह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अधिष्ठातृदेवताः।" (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३३७) एवं तत्र ज्ञानशक्तिसमष्टिरन्तःकरणम्, क्रियाशक्तिसमष्टिः प्राणः। शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि। वचनादानगतिविसर्गानन्दजनकानि वाक्पाणियायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि। पञ्चप्राण-मनोबुद्धि-दशेन्द्रिय-समन्वितं लिङ्गशरीरमित्युच्यते। उक्तञ्च-"एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गं ज्ञानशक्तिप्राधान्येन। हिरण्यगर्भ इति क्रियाशक्तिप्राधान्येन सूत्रमिति चोच्यते।" (सिद्धान्तबिन्दुः ८, पृ. १५४) अयममूर्तपदार्थः। अमूर्तपदार्थसृष्ट्यनन्तरं मूर्तपदार्थसृष्टिर्भवति तथा च पञ्चीकरणप्रकारो मधुसूदनेन प्रतिपादितः। "तानि च तथाभूतानि भूतानि भोगायतनं शरीरं भोग्यं च विषयमन्तरेण भोगं जनयितुमशक्नुवन्ति जीवकर्मप्रयुक्तत्वात्स्थौल्याय पञ्चीकृतानि भवन्ति। तत्र च प्रत्येकं पञ्चभूतानि द्विधा विभज्यन्ते। तत्रैकको भागश्चतुर्धा विभज्यते। तद्भागचतुष्टयञ्च स्वभागं विहायेतरभूतचतुष्टयार्धभागेषु प्रविशतीति स्वस्यार्धभागेनेतरेषामष्टभागेन च पञ्चीकरणान्मेलनेऽप्याधिक्यादाकाशादिशब्दप्रयोगः।" (सिद्धान्तबिन्दुः ८, पृ.१५५) वियदादिकमेकैकं द्विधा विधाय, पुनरपि प्रथमं भागं भागचतुष्टयं विधाय, स्वस्वेतरद्वितीयांशैः चतुर्णामेकैकस्य योजनात् ते वियदादयः पञ्चपञ्चात्मका भवन्ति। तथा चोक्तं विद्यारण्यमुनिना- "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥" (पञ्चदशी, तत्त्वविवेकप्रकरणम्, २७) एवं धर्मराजाध्वरीन्द्रेणापीत्थं पञ्चीकरणप्रकारः प्रदर्शितोऽस्ति- "आकाशमादौ द्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम्। एवं वायुं द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम्। एवं तेज आदीनामपि। तदेवमेकैकभूतस्यार्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः।" (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ. ३३९) एवञ्च तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यश्चतुर्दशलोकानां सृष्टिर्भवतीति वेदान्तसिद्धान्तः। तथा चोक्तं धर्मराजाध्वरीन्द्रेणैव- "एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्महर्जनस्तपःसत्यात्मकस्योर्ध्वलोक-सप्तकस्य,अतलवितलसुतलतलातलरसातलमहातलपातालाख्याधोलोकसप्तकस्य ब्रह्माण्डस्य, जरायुजाण्डज-स्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणामुत्पत्तिर्भवति।" (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३४१) एवं पञ्चभूतेभ्य एवेन्द्रियाणामधिष्ठानमुत्पद्यते। "तानि च पञ्चीकृतानि पञ्चमहाभूतानि मूर्ताख्यानि मिलित्वैकं कार्यमिन्द्रियाणामधिष्ठानं भोगायतनमुत्पादयन्ति।" (सिद्धान्तबिन्दुः, १०, पृ.१५६) तदेवेन्द्रियाधिष्ठानं शरीरमित्याख्यायते। शरीरं गुणभेदेन त्रिविधमङ्गीक्रियते। तथा हि- "तत्र सत्त्वप्रधानं देवशरीरम्, रजःप्रधानं मनुष्यशरीरम्, तमःप्रधानं तिर्यगादिस्थावरान्तम्।" (सिद्धान्तबिन्दुः, १० पृ.१५७) पुनश्चः स्थूलशरीराणां चतुर्विधत्वमङ्गीक्रियते, जरायुजाण्डजस्वेदजोद्भिज्जभेदात्। तथा चोक्तम्- "तत्र जरायुजानि- जरायुभ्यो जातानि मनुष्यपश्वादिशरीराणि। अण्डजानि-अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि। स्वेदजानि-स्वेदाज्जातानि यूकामशकादीनि। उद्भिज्जानि-भूमिमुद्भिज्य जातानि वृक्षादीनि। वृक्षादीनामपि पापफलभोगायत्वेन शरीरत्वम्।" (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३४१)। एतत्सर्वं ब्रह्माण्डाख्यं विराडिति मूर्तमिति चोच्यते। अयमेवाद्वैतवेदान्तसम्मतो भूतभौतिकसृष्टिक्रमः।

सृष्टिविपरीतो लयक्रमः। त्रैलोक्यस्य विनाश एव लयः। स च नित्यप्राकृतनैमित्तिकात्यन्तिकभेदाच् चतुर्विधः। तत्र नित्यः प्रलयः सुषुप्तिरित्युच्यते। कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाश एव प्राकृतिकः प्रलय इत्युच्यते। हिरण्यगर्भस्य दिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलय इत्युच्यते। ब्रह्मज्ञानादात्यन्तिक उच्छेदस्त्वात्यन्तिकः प्रलय इत्युच्यते। भूतभौतिकानां लयः कारणक्रमेणैव भवति, कारणोच्छेदादेव कार्योच्छेदः। तथा च पृथिव्या जले, जलस्य तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्यापञ्चीकृतभूतेष्वित्यादिरीत्या प्रलयो भवति। तदुक्तं विष्णुपुराणे- "जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥१॥ वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्! निष्कले संप्रलीयते॥२॥" (समुद्धतम्,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३५१) एवं जगत्प्रपञ्चस्य प्रलयक्रमोऽपि संक्षेपेण विवेचितः। एवं भूतभौतिकविस्तार एव जगत्प्रपञ्च इति शाङ्करवेदान्तसिद्धान्तो वर्तते। वेदान्तसिद्धान्तानुसारमेतज्जगत् परमात्मनो लीलामात्रमस्ति। प्राणिनां भोगार्थमेवादृष्टवशादीश्वरे सिसृक्षालीला भवति, तथा चाविद्याशक्त्यैव जगदेतद् भाति। अद्वैतवेदान्तान्तर्गतैकजीववादे दृष्टिसृष्टिवादः, अनेकजीववादे च सृष्टिदृष्टिवाद इति जगत्प्रपञ्चसम्बद्धं मतद्वयं प्रसिद्धमस्ति। अतिदीर्घभयात् तद्विश्लेषणमत्र नैव विधीयते। अस्य च दृश्यमानजगत्प्रपञ्चस्याभिन्न-निमित्तोपादानकारणं ब्रह्मैवेति शाङ्करवेदान्तदर्शनाभिमतजगत्स्वरूपविवेकः।

उपसंहृतिस्तथा निष्कर्षः

जीवस्य भोगभूमित्वेन प्रसिद्धमेतज्जगत्तत्त्वं पौरस्त्यदर्शनेषु सर्वत्र विवेचितम्। तत्र वेदप्रमाण्यवादिभि-रास्तिकदर्शनैर्दृश्यादृश्यात्मकस्य विश्वब्रह्माण्डस्य चर्चा विहिताऽस्ति। पौरस्त्यैरीश्वरवादिदर्शनेषु जगतः कारणत्वेनेश्वर एवाङ्गीकृतोऽस्ति। "ईक्षणादिप्रवेशान्ता सृष्टिरीशेन निर्मिता। जाग्रदादिविमोक्षान्तः संसारः परिकल्पितः।" (पञ्चदशी, ६/२१३) इत्यभियुक्तेश्च। परमाणव एव चतुर्विधानां पृथिव्यप्तेजोवायूनां भूतानां कारणमिति न्यायवैशेषिकमतम्। तत्र परमाणुद्वयसंयोगेन त्र्यणुकं जायते, तदेव जालसूर्यमरीचिस्थं सूक्ष्मं रज इत्युच्यते। आकाशं तु तत्त्वान्तरमस्ति, पृथिव्यादीनां चतुर्णां परमाणवो यथा नित्याः सन्ति तथैवाकाशतत्त्वञ्च नित्यमस्ति। न्यायदर्शने वैशेषिकदर्शनेऽपि जगत्प्रपञ्चस्यास्योपादनकारणत्वेन तत्तत्परमाणुरेवाङ्गीक्रियते। तत्परमाणुसञ्चालनार्थमीश्वरस्यावश्यकत्वादीश्वरस्य जगत्प्रति निमित्तकारणत्वमेवेति तार्किकमतम्। न्याय-वैशेषिकयोर्द्वयोर्दर्शनयोः परमाणुकारणवादोऽत्यन्तो वैज्ञानिको विद्यत इति निष्कर्षोऽत्र संस्थापितः। पूर्वमीमांसकैर्दार्शनिकैः परमाणुनामप्यनित्यत्वं मन्यमानैः पृथिव्यप्तेजोवाय्वाकाशानां मध्ये पूर्वपूर्वस्योत्तरोत्तरं कारणत्वमङ्गीकृतमस्ति। मीमांसादर्शनेऽस्मिन्नाकाशस्याप्यनित्यत्वमेव, शब्दस्य तत्कारणत्वेनाङ्गीकारात्। तथा च शब्द एव निखिलजगत्प्रपञ्चस्य मूलकारणमङ्गीकृतमवलोक्यते। क्षित्यादीनामनादित्वान्नित्यत्वमेवेति मीमांसादर्शनाभिमतजगत्प्रपञ्च इति निष्कर्षः। एवं साङ्ख्यदर्शने योगदर्शने च मीमांसाभिमतः शब्दो नैव मूलकारणमपि तु शब्दोऽपि कार्य एवाङ्गीक्रियते। शब्दस्य कारणमहङ्कारः, तादृशाहङ्कारस्य कारणं महत्तत्त्वमस्ति। महत्तत्त्वस्य कारणं त्रिगुणात्मकं प्रधानमस्ति। एतच्च प्रधानं न कस्यापि कार्यमतस्तस्य नित्यत्वमेवेति साङ्ख्ययोगसिद्धान्तः। तदेव प्रधानमखिलस्य जगत्प्रपञ्चस्य मूलकारणमिति साङ्ख्ययोगदर्शनाभिमतसिद्धान्तः। एवमद्वैतवेदान्तदर्शने तु प्रकृतिपदवाच्यं प्रधानमपि न मूलकारणं भवितुमर्हति। तस्यापि ब्रह्मकार्यत्वाङ्गीकारात्। ईक्षणपूर्वकमेवास्य जगत्प्रपञ्चस्य सृष्टिप्रतिपादकश्रुतिवाक्यानामुपलभ्य-मानत्वाज्जडस्वरूपस्य प्रधानस्य चेक्षणसंभवाभावाच्च प्रधानकारणवादो नैवोपयुक्त इत्यद्वैतदर्शनसिद्वान्तः। "सदेव सोम्येदमग्र आसीत्" (छान्दोग्योपनिषद्, ६/२/२), "कथमसतः सज्जायेत" (छान्दोग्योपनिषद, ६/२/२), "आत्मावा इदमेक एवाग्र आसीत्" (ऐतरेयोपनिषद्, १/१) इत्यादिश्रुतिवाक्येष्वसन्निराकरणपूर्वकसत्तत्त्वप्रतिपादनात्। आत्म-शब्दादेकशब्दाच्चात्मतत्त्वमेवास्य जगत्प्रपञ्चस्य मूलं कारणम्। ब्रह्मण एवाभिन्नानिमित्तोपादानकारणत्वादस्य जगतः नैव परिणामत्वमपि तु विवर्तत्त्वमेव। ब्रह्मविवर्तत्वाच्चास्य जगतो मिथ्यात्वमित्यद्वैतदर्शनाभिमत-जगत्स्वरूपं सुनिश्चितम्। अन्ते च निष्कर्षायमाणानि विन्दुवाक्यान्यत्र समुपस्याप्य लेखोऽयं पूर्णतामधिगच्छति।

शोधनिष्कर्षायमाणानि बिन्दुवाक्यानि

१) जगदीश्वरजीवाविद्यामोक्षादितत्त्वप्रतिपादनाय पौरस्त्यदर्शनं प्रवृत्तम्,

२) दृश्यमानोऽयं जगत्प्रपञ्चो जीवानां कर्मफलभोगार्थमिति पौरस्त्यदर्शनमतम्,

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) वेदोपनिषदादिपौरस्त्यप्राचीनवाङ्मय एव जगद्विषयकं चिन्तनमुपलब्धम्,

४) न्यायवैशेषिकदर्शनद्वयेऽपि जगद्विवेचनक्रमे आरम्भवादोऽङ्गीकृतः,

५) न्यायवैशेषिकाभ्यां जगतो मूलकारणत्वेन परमाणवस्तथा निमित्तकारणत्वेनेश्वरश्चेत्यङ्गीकृतम्, आकाशतत्त्वस्य तत्तद्परमाणूनामिव नित्यत्वञ्चाङ्गीकृतम्,

६) ईश्वरतत्त्वान्येषामपि कालाकाशादीनां नित्यत्वं न्यायवैशेषिकचिन्तकैरङ्गीकृतम्,

७) पृथिव्यादिकं कर्तृजन्यं कार्यत्वाद् घटवदित्यनुमानेन न्यायवैशेषिकदर्शनद्वये जगत्कर्तृरूपमीश्वरतत्त्व-मङ्गीकृतम्,

८) साङ्ख्ययोगदर्शनद्वये जगत्प्रपञ्चस्य मूलकारणत्वेन प्रकृतेरस्तित्वमङ्गीकृतम्,

९) कारणभूतायाः प्रकृतेस्त्रिगुणत्वात् तत्कार्यभूतजगत्प्रपञ्चस्यापि सत्त्वरजस्तमस्त्रिगुणात्मकत्वं साङ्ख्ययोगदर्शनद्वयेऽप्यङ्गीकृतम्,

१०) त्रिगुणानां साम्यावस्थायाः प्रकृतेर्भङ्गात् (गुणवैषम्याद्वा) जगत्सृष्टिरिति साङ्ख्ययोगदर्शनाभिमतं मतम्,

११) जगत्प्रपञ्चसृष्टिप्रसङ्गे साङ्ख्ययोगदर्शनद्वयेऽपि सत्कार्यवाद एव युक्तिबलेन साधितः,

१२) साङ्ख्यदर्शने योगदर्शने च जगद्विचारप्रसङ्गे परिणामवादोऽङ्गीकृतः,

१३) पूर्वमीमांसादर्शने जगत्प्रपञ्चस्यानादित्वमनादित्वाच्चेश्वराकर्तृत्वमुपपादितम्,

१४) वेदविहितकर्मसम्पादनार्थं स्वकृतकर्मफलोपभोगार्थञ्चास्य जगत्प्रपञ्चस्य सप्रयोजनत्वं मीमांसकैरङ्गीकृतम्,

१५) शाङ्कराद्वैतवेदान्तदर्शने जगत्प्रपञ्चस्याभिन्ननिमित्तोपादानं कारणं मायासबलं ब्रह्मैवाङ्गीकृतम्,

१६) ब्रह्मतत्त्वत्स्यातात्त्विकरूपान्तरणभूतविवर्तत्वाज्जगत्प्रपञ्चस्य मिथ्यात्वं शाङ्करवेदान्तेऽङ्गीकृतम्,

१७) ब्रह्मणोऽज्ञानवशादेव जगत्प्रपञ्चोऽयं प्रतीत इति ब्रह्मज्ञानानन्तरं सर्वमपि ब्रह्मभिन्नं दृश्यजातं विलीयत इत्यद्वैतसिद्धान्तः प्रतिपादितः,

१८) "सर्वं खल्विदं ब्रह्म" इति विधिमुखेन "नेह नानास्ति किञ्चन" इति निषेधमुखेन च ब्रह्मतत्त्वातिरिक्तस्य समस्तदृश्यप्रपञ्चस्य मिथ्यात्वं श्रुतिप्रमाणैर्युक्तिबलैश्चोपपादितम्,

१९) जगत्प्रपञ्चविचारप्रसङ्गे कारणस्यातात्त्विकोऽन्यथाभावः कार्यमित्येष विवर्तवाद इत्यद्वैतवेदान्तिनां सुस्पष्टं मतम्,

२०) जडतत्त्वप्रधानकारणदेव जगत्सृष्टिरिति साङ्ख्ययोगाभिमतुाज्जुगुच्चिन्तनात्, ईश्वरस्य निमित्तत्वेन परमाणूनाञ्चोपादानत्वेन जगत्सृष्टिरिति न्यायवैशेषिकाभिमतुजगच्चिन्तनात्, जगत्कर्तृत्वेनेश्वरास्तित्व-मसहमानान्मीमांसादर्शनाभिमताज्जगत्स्वरूपचिन्तनात्, चेतनस्येश्वरस्याभिन्ननिमित्तकारणत्वेन, जगत्सृष्टिस्थितिप्रलयवत्वेन, जगत्कर्तृत्वेन वा चेतनस्येश्वरस्यास्तित्वमभ्युपगच्छदद्वैतदर्शनाभिमतं जगद्विषयकं चिन्तनमेवोपयुक्तं सुन्दरं प्रामाणिकञ्चेति शोधनिष्कर्षः।

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भग्रन्थसूची

अन्नंभट्टः (ई.सं. २००३), तर्कसङ्ग्रहः, वाराणसी : चौखम्बा संस्कृत संस्थान।

ईश्वरकृष्णः (ई.सं. २००१), साङ्ख्यकारिका, वाराणसी : चौखम्बा विद्याभवन।

उदयनाचार्यः (ई.सं. २०१०), न्यायकुसुमाञ्जलिः, वाराणसी : चौखम्बा विद्याभवन।

ऋग्वेदसंहिता (ई. २००७), सायणभाष्यसहिता, वाराणसी : चौखम्बा विद्याभवन।

केशवशरणोऽर्यालः (२०७५), न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन, काठमाडौं : नेपाल प्रज्ञा प्रतिष्ठान।

कौण्डिन्न्यायनः, शिवराज आचार्यः (ई.सं.२००२), ब्रह्ममीमांसासूत्रम्, कौण्डिन्न्यायनवृत्तिसहितम्, वाराणसी : चौखम्बा विद्याभवन।

गौतमः, न्यायसूत्रम् (ई.सं. २००४), (वात्स्यायनभाष्येण, हिन्दीव्याख्यया च समन्वितम्), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

घिमिरे, उमेशप्रसादः (२०८०), तुलनात्मकदृशादर्शनान्तराद्वैतदर्शनाभिमतमोक्षतत्त्वविवेकः (अ.प्र.शो.प्र.) दाङ : नेपालसंस्कृतविश्वविद्यालयः।

घिमिरे, दीर्घराजः (सम्पा.२०४९), षड्दर्शनी-संङ्ग्रहः, दाङ : महेन्द्रसंस्कृतविश्वविद्यालयः।

तिवारी, ओंकारनाथः (ई.सं.२००४), ऋग्वेदस्य दार्शनिकधरातलम्, दिल्ली : नागप्रकाशन।

त्रिपाठी, रामशरणः (२०२८), ब्रह्मसूत्रप्रमुखभाष्यपञ्चकसमीक्षणम्, वाराणसी : चौखम्बा संस्कृत संस्थान।

त्रिपाठी, ब्रह्मनाथः (सम्पा.ई.१९९७) न्यायकुसुमाञ्जली, वाराणसीः चौखम्बा विद्याभवन।

त्रिपाठी, श्रीधरः (सम्पा. २०४४), वैशेषिकदर्शनम्, दरभङ्गा : मिथिला विद्यापीठ।

धर्मराजाध्वरीन्द्रः, (ई.सं.१९८३), वेदान्तपरिभाषा, वाराणसी : चौखम्बा विद्याभवन।

पाठकः,रङ्गनाथः(२०४६), षड्दर्शनरहस्य, पटना : बिहार राष्ट्रभाषा परिषद्।

पाण्डेयः,जनार्दनः (ई.सं.१९८९), साङ्ख्यदर्शनम्, वाराणसी : मोतीलाल बनारसी दास।

पाण्डेयः,मुरलीधरः (ई.सं. १९९८), शाङ्करवेदान्तकोशः, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

प्रशस्तपादाचार्यः, (ई.सं. १९९७), प्रशस्तपादभाष्यम् (श्रीधराचार्यकृतन्यायकन्दलीयुतम्), वाराणसीः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

भट्टः, कुमारिलः, (ई.सं.१९९०), श्लोकवार्तिकम्, वाराणसी : रत्ना पब्लिकेसन।

भट्टाचार्यो रमाशङ्करः (ई.सं. १९६३), पातञ्जलयोगसूत्रम् (व्यासभाष्यसहितम्), वाराणसी : भारतीयविद्याप्रकाशनम्।

मधुसूदनसरस्वती, (ई.सं. १९९७), सिद्धान्तबिन्दुः, वाराणसी : महेशानुसन्धानसंस्थानम्।

माधवाचार्यः (सम्पादकः- शर्मा, उमाशङ्करः, ई.सं.२००४), सर्वदर्शनसङ्ग्रहः, वाराणसी : चौखम्बा विद्याभवन।

विद्यारण्यः (सम्पादकः- मिश्रः, श्रीनारायणः, ई.सं.२०१२) पञ्चदशी, हरिद्वार : रणधीर प्रकाशन।

शङ्कराचार्यः, (ई.सं.१९९६), ब्रह्मसूत्रशाङ्करभाष्यम्, दिल्ली : परिमल पब्लिकेशन।

शास्त्री, उदयवीर, (ई.सं.२०१२), साङ्ख्यसिद्धान्त, दिल्ली : विजयकुमार गोविन्दराम हासानन्द।

शास्त्री, उदयवीर, (ई.सं.२०१०), वैशेषिकदर्शनम्, दिल्लीः विजयकुमार गोविन्दराम हासानन्द।

शास्त्री,उदयवीर, (ई.सं.२०१४), न्यायदर्शनम्, दिल्लीः विजयकुमार गोविन्दराम हासानन्द।

शास्त्री, उदयवीर, (२०६७), योगदर्शनम्, दिल्लीः विजयकुमार गोविन्दराम हासानन्द।

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नान्दीमुखीश्राद्धविवेचना

उपप्रा.डा. प्रकाशढकालः

वाल्मीकिविद्यापीठम्

लेखसारः

अस्माकं सनातनहिन्दुपरम्परानुसारेण जीवनं व्यतियापनं कुर्वतां जनानां कृते धर्मशास्त्रे विभिन्नानां विधीनां निषेधानाञ्च निर्देशनं कृतमस्ति। एतादृशयोर्विधिनिषेधयोर्मध्ये पूर्वपुरुषाणां तृप्त्यर्थं कर्तव्यं श्राद्धप्रकरणमतीव महत्त्वपूर्णं प्रकरणं वर्तते। विषयेऽस्मिन् धर्मसूत्रगृह्यसूत्रस्मृतिब्राह्मणाऽऽरण्यकग्रन्थेषु, रामायणमहाभारतादिषु तथैवैतिहासिकग्रन्थेषु च महर्षिभिः स्वमतमभिव्यक्तं वर्तते। विशेषरूपेण मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, नारदस्मृतौ, विष्णुस्मृत्यादौ च श्राद्धस्य विषये महती चर्चा समुपलभ्यते। श्राद्धं नित्यं नैमित्तिकं काम्यञ्चेति प्राथमिकरूपेण त्रिधा विभक्तं वर्तते। तदनन्तरम् एकोद्दिष्ट-पार्वण-वृद्धि-आदिषु बहुभागेषु विततं वर्तते। माङ्गलिककार्याणां विशेषाऽङ्गं नान्दीश्राद्धं वर्तते। नान्द्या अर्थः समृद्धिरेव वर्तते खलु। विशेषतो विवाहादि-विशेषयज्ञाऽनुष्ठानात् पूर्वम् उक्तकर्मणामङ्गस्वरूपेण पितृपूजाया उद्देश्यरूपेण क्रियमाणं श्राद्धं नान्दीमुखीश्राद्धम् आभ्युदयिकश्राद्धं वा वर्तते। गौर्यादिमातृकापूजनञ्च नान्दीश्राद्धस्याऽङ्गं मन्यते। नान्दीमुखीश्राद्धस्य विषय ऋषिमुनिभिस्तथैवाऽऽचार्यैः प्रकटितं मतं निर्णयं वा लेखेऽस्मिन् यथासम्भवं विवेचितं वर्तते।

शब्दकुञ्जिका– *आभ्युदयिकम्, आमान्नम्, उत्तानहस्तौ, नीविः, सिद्धान्नम्।*

विषयप्रवेशः

वैदिकी सनातनसभ्यता विश्वस्य प्राचीनैवम् उत्कृष्या, वैज्ञानिकसभ्यतारूपेण सुप्रसिद्धा च वर्तते। धर्मशास्त्रस्य प्रवर्तकैर्महर्षिभिर्वैदिकपरम्परां तथैव संस्कारञ्च मर्यादितकरणार्थं विभिन्नानि योगदानानि विहितानि वर्तन्ते। तस्मादेव योगदानकारणाद् अद्यपर्यन्तं शास्त्रीयपरम्परा तथैव संस्कारश्च जीवितो वर्तते। मरीचिकाया मतानुसारं स्वस्य प्रियं भोज्यपदार्थं, प्रेतमेवं पितृनुद्दिश्य श्रद्धापूर्वकं क्रियमाणं कर्म श्राद्धमेवेति।

> **प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मानः।**
> **श्रद्धया दीयते यत्र, तच्छ्राद्धं परिकीर्तितम्॥ (निर्णयसिन्धुः, पृ.७६५)**

देहविमुक्तेष्वभिभावकेषु समस्तेषु पितृषु प्राप्येतेत्येवं कामनया योग्याय, पूज्यव्यक्तये श्रद्धया दानकरणमेव श्राद्धमित्यभिधीयते। सत्यार्थकाच् श्रत्-धातोः श्रद्धाशब्दस्य निष्पत्तिर्भवति। सत्यं ददातीति श्रद्धा, अर्थात् स्वान्तर्हदयात् सत्येन विश्वासेन भक्तिभावेन क्रियमाणं कर्मैवञ्च प्रदत्तं वस्त्वेव श्रद्धा वर्तते। श्रद्धया दीयते क्रियते यत् तच् श्राद्धम्, अर्थाच् श्रद्धया भक्त्या च स्वपितरं प्रत्यभिव्यक्तं सदाचारयुक्तं यदपि कार्यं श्राद्धमभिधीयते। श्राद्धस्य विषये शास्त्रीयमतं किम्? आधारश्च को वर्तते? इत्यस्मिन् विषये यथाशक्ति विश्लेषणं लेखेऽस्मिन् विहितं वर्तते।

समस्याकथनम्

विश्वस्य सर्वप्राचीनसंस्कृतिरूपेण वैदिकसनातनसंस्कृतिः सुप्रसिद्धा वर्तते। अर्थाद् अस्माकं वैदिकसनातनसंस्कृतिरेव विश्वस्य सर्वप्राचीनतमा संस्कृतिर्वर्तते। अस्मत्पितॄणां दिवङ्गतसमये वार्षिकतिथौ, अमावस्यायां तथा च विशेषरूपेण पितॄणां सन्तारणार्थं तृप्त्यर्थं वा क्रियमाणं दानं, तर्पणं, पूजनं, यज्ञकरणञ्चा-ऽस्माकं धार्मिककर्तव्यमेव वर्तते। तथैव पितरं प्रति श्रद्धामभिव्यक्तुमस्माकं वैदिकसंस्कारे श्राद्धस्याऽत्यन्तमहत्ता

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्तते। श्राद्धान्यपि विविधप्रकारकाणि सन्ति। तथैव तेषु बहुप्रकारकेषु श्राद्धेषु विशेषरूपेण नान्दीमुखी-श्राद्धस्य विधिविश्लेषणक्रमेऽधोलिखिताः समस्या दृग्गोचरीभवन्ति :-

(क) नान्दीमुखीश्राद्धस्य शास्त्रीयचिन्तनं विधिः प्रक्रिया च का?

(ख) नान्दीमुखीश्राद्धस्य कालाऽवधिः कः?

अध्ययनस्योद्देश्यम्

प्रस्तुतशोधलेखस्य प्रमुखोद्देश्यानि च यथा :-

(क) नान्दीमुखीश्राद्धस्य शास्त्रीयचिन्तनं, विधिप्रक्रिययोश्च विश्लेषणम्,

(ख) नान्दीमुखीश्राद्धस्य कालाऽवधिविवेचनम्।

पूर्वकार्यसमीक्षणम्

पारस्करेण रचिते पारस्करगृह्यसूत्र आभ्युदयिकश्राद्धस्य सङ्क्षेपीकृतं वर्णनमस्ति। पारस्करगृह्यसूत्रस्य षष्ठकण्डिकायाम् आभ्युदयिकश्राद्धस्य चर्चा विहिता वर्तते। प्रस्तुतकण्डिकायां पितृसूक्तं, तिलं, स्वधा तथा च सम्पन्नमित्यादिप्रश्नश्च निषिद्धो वर्तते। मानवजीवनस्य विविधपक्षाणां सुसंस्कृतीकरणाय सृष्टोऽयं पारस्करगृह्य-सूत्रग्रन्थः। अयं च ग्रन्थः सूत्रात्मको वर्तते।

याज्ञवल्क्यस्मृतौ याज्ञवल्क्येन नान्दीमुखीश्राद्धं पार्वणश्राद्धविधिनैव कर्तव्यमिति विवेचितं वर्तते। सङ्क्षिप्तरूपेण वर्णितेऽस्मिन् नान्दीमुखीश्राद्धे दध्ना यवेन सहितो बदरीफलमिश्रितपिण्डो दातव्य इति सङ्क्षिप्तरूपेण वर्णितो वर्तते। श्राद्धादिकर्मणः प्रतिपादनं याज्ञवल्क्यस्मृतिग्रन्थ आचाराध्याये वर्तते। तस्मिन् चाऽऽचाराध्याये श्राद्धमहिमा, प्रकारो विधिर्निषेधश्च उल्लिखितो विद्यते।

वीरमित्रोदयश्राद्धप्रकाशे मित्रमिश्रवर्येण श्राद्धादिविषया विवृताः। वीरमित्रोदयो निबन्धग्रन्थो वर्तते। तेनैव तस्मिन् विभिन्नानां विद्वद्वर्गाणां मतानि सङ्कलितानि सन्ति। वीरमित्रोदयश्राद्धप्रकाशाऽनुसारं पितृपितामह-प्रपितामहा अश्रुमुखा वर्तन्ते। प्रपितामहादेः पूर्वपुरुषाश्च नान्दीमुखा अर्थाद् देवस्वरूपा भवन्तीति विवृतं वर्तते।

निर्णयसिन्धुग्रन्थे कमलाकरभट्टमहोदयेन नान्दीमुखीश्राद्धस्य कृत्यादिविषये वर्णनं विहितं वर्तते। निर्णयसिन्धुर्निबन्धात्मको ग्रन्थो वर्तते। तस्मादपि वीरमित्रोदयाद् अस्मिन् ग्रन्थे बहूनां विद्वद्वर्गाणां मतमुल्लिखितं वर्तते। क्रमाऽनुसारेण मात्रादीनां श्राद्धं, पित्रादीनां श्राद्धं, सपत्निकमातामहादीनां श्राद्धं च कर्तव्यम्। मातृश्राद्धं पूर्वाह्णे, पितृश्राद्धं मध्याह्ने, मातामहश्राद्धञ्चाऽपराहणकाले कर्तव्यमित्यादौ विविधश्राद्धविषये निर्णयसिन्धुग्रन्थे वर्णितमस्ति।

धर्मसिन्धुग्रन्थे काशीनाथोपाध्यायेन नान्दीमुखीश्राद्धस्य कृत्यादीनां विषये सरलरूपेण वर्णनं विहितं वर्तते। काशीनाथोपाध्यायेन नान्दीमुखीश्राद्धे कृत आशौचादिदोषो न जायते इति उल्लिखितमस्ति। नान्दीमुखीश्राद्धपश्चात् कार्यस्य प्रकृत्यनुसारं निश्चिते समयावधौ उक्तकार्यं सम्पादयितुं शक्यत इति काशीनाथोपाध्यायस्य मतं वर्तते।

नान्दीमुखीश्राद्धविषये बहुभिर्विद्वद्भिश्चर्चा विहिता वर्तते। विभिन्नैर्विद्वद्भिर्नान्दीमुखीश्राद्धस्य विषये एकस्मिन्नेवाऽऽलेखे, तस्य सिद्धान्त-कृत्य-उपयोगीतादिके विषय उल्लिखितो न प्राप्यते। लिखिताः कतिपया लेखा अप्रामाणिकाः सन्ति। सनातनवैदिकपरम्पराया मूलाद् खण्डित-लेखा वैदिकपरम्पराया विरुद्धा एव भवन्ति। तेनैव कारणेन प्रस्तुतविषयो लोकोपयोगी स्यादिति धिया तस्य प्रामाणिकरूपेण सारल्येन विश्लेषणमत्र कृतं वर्तते।

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शोधविधिः

यं कमपि शोधं प्रामाणिकं विधातुम् अधिकानां शोधसामग्रीणां चाऽवश्यकता भवति। प्रस्तुताय लेखायाऽपि प्राथमिकसहायकसामग्रीरूपेण धर्मशास्त्रस्य मूलो वेदः, सूत्रग्रन्थः, स्मृत्यादिग्रन्थश्चाऽऽधाररूपेण गृहितो वर्तते। तथैव धर्मशास्त्रस्य विभिन्ना ग्रन्थास्तदनु पुराणादिग्रन्थाश्च सहायकस्रोतोरूपेण गृहीता वर्तन्ते। कतिपयानि तथ्यानि पुष्टीकरणाय च धर्मशास्त्राणां मूलग्रन्थानां वृत्तयो भाष्यानि हिन्दी-नेपालीभाषायाष्टीका स्वीकृता वर्तन्ते। पुस्तकालयस्रोतसस्तथैवाऽऽधुनिकसञ्चारमाध्यमानां स्रोतसश्च प्राप्तं विषयवस्त्वपि ह्यत्र प्रयुक्तं वर्तते। सङ्कलितसामग्रीणां मूलतो वर्णनात्मकविधौ, विश्लेषणात्मकविधौ, विवेचनात्मकविधौ, तुलनात्मकविधौ चाऽध्ययनं कृतं वर्तते।

स्मृतिषु, धर्मसूत्रेषु, पुराणेषु च विभिन्नप्रसङ्गेषु उल्लिखिता विशेषत आभ्युदयिकश्राद्धसम्बन्धिविचारा अस्मिन् शोधकार्ये प्रस्तुता वर्तन्ते। सङ्कलितसामग्रीः सुव्यवस्थितकरणाय तथैव लेखं च प्रामाणिक-करणायौचित्याऽनुसारम् आवश्यकतानुसारं वा 'गर्भे टिप्पणीविधिः' (एपीए) इत्याख्यविधिरवलम्बितो विद्यते।

सैद्धान्तिकाधारः

गृहस्थिना कुशलतया गृह्यकर्म सम्पादनं कर्तव्यम्। गृहस्थैर्विशिष्टं गृह्यकर्म पञ्चमहायज्ञोऽस्ति। पञ्चप्रकाराद् गृहस्थदोषान्मुक्त्यर्थं गृहस्थिना पञ्चमहायज्ञः कर्तव्यः। धर्मशास्त्रादिषु ग्रन्थेषु गृहस्थेभ्यो देवयज्ञः, ऋषियज्ञः, पितृयज्ञः, भूतयज्ञः, अतिथियज्ञश्चाऽनिवार्य एवेति समुपदिष्टः। अध्ययनम्, अध्यापनं च ब्रह्मयज्ञो वर्तते। तर्पणं, श्राद्धकरणं च पितृयज्ञो वर्तते। देवेभ्यो हवनादिकर्मकरणं च दैवयज्ञो वर्तते। बलिवैश्वदेवकर्म च भूतयज्ञो वर्तते। अतिथीनां तथैवाऽभ्यागतानां च स्वागतसत्कारकरणम् अतिथियज्ञो वर्तते।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम्।
होमो दैवो बलिर्भौतस्तथाऽन्योऽतिथिपूजनम्॥ (भविष्यपुराणम् ,ब्रह्मपर्व १६/७, पृ.४४)

श्राद्धयज्ञो पितृयज्ञाऽन्तर्गतो वर्तते। दिवङ्गतान् पितृगणान् एवञ्च बान्धवान् तृप्तीकरणाय तथा सन्तुष्टीकरणाय शास्त्रीयविध्यनुसारेण श्रद्धया क्रियमाणं पितृकर्म एव श्राद्धं वर्तते। यस्मै कस्मा अपि जीविताय जनाय श्रद्धया क्रियमाणः सत्कारः श्रद्धा श्राद्धं वा। 'श्रद्धया क्रियते विधीयते इति श्राद्धम्' इत्यस्माद् विग्रहाच् श्राद्ध-शब्दस्य निष्पत्तिर्जायते। वैदिकपरम्परायां दिवङ्गत-पितॄणां स्मरणे श्रद्धाऽर्पणं सम्मानाऽर्पणञ्च श्राद्धमेव। वैदिकपरम्परायां यस्मात् कस्मादपि माङ्गलिककर्मकरणात् पूर्वं पूर्वपुरुषं प्रति पितरं प्रति वा श्रद्धाभावो व्यक्तव्यो भवति। धर्मशास्त्राचार्यैः श्राद्धस्य विभिन्ना भेदा उल्लिखिता वर्तन्ते। मत्स्यपुराणे मूलतो नित्यं, नैमित्तिकं, काम्यञ्चेति प्रकारात् श्राद्धस्य त्रिधा भेदा उल्लिखिता वर्तन्ते (मत्स्यपुराणम् १६/१५)। प्रत्येके दिने, अमावस्यायां तिथौ तथा अष्टम्यां तिथौ च क्रियमाणम् अष्टकाश्राद्धं नित्यं श्राद्धं वर्तते। स्वस्य दिवङ्गतेभ्यः पितृभ्यः क्रियमाणं च श्राद्धं नैमित्तिकं श्राद्धं वर्तते। यस्य कस्यापि मङ्गलस्याऽभीष्टेः कामनापूर्वकं क्रियमाणं श्राद्धं च काम्यं श्राद्धं वर्तते। आभ्युदयिकश्राद्धं वृद्धिरेवं नान्दीमुखीश्राद्धनाम्नाऽपि बोध्यते। विश्वामित्रेण नित्यश्राद्धं, नैमित्तिकश्राद्धं, काम्यश्राद्धं, वृद्धिश्राद्धं, सपिण्डनश्राद्धं, पार्वणश्राद्धं, गोष्ठीश्राद्धं, शुद्धिश्राद्धं, कर्माङ्गश्राद्धं, दैविकश्राद्धं, यात्राश्राद्धं, पुष्टिश्राद्धं चेति प्रकारेण द्वादशभेदान्युल्लिखितानि वर्तन्ते।

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्।
पार्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्॥

कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्॥ (निर्णयसिन्धुः, पृ.७७०)

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नित्यश्राद्धे विश्वेदेवब्राह्मणस्य स्थापना, हस्तार्घपात्रनिर्माणं, पिण्डदानादिकं कार्यं च नैव करणीयम्। केवलं अन्न-जल-फलमूलादिकं पितृप्रियवस्तु प्रदाय नित्यश्राद्धं विधीयते।

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमावहन्॥ (मनुस्मृतिः ३/८२)

नान्दीमुखीश्राद्धम्

नान्दीमुखीश्राद्धम् आभ्युदयिकश्राद्धनाम्ना वृद्धिश्राद्धनाम्ना वाऽपि स्वीक्रियते। नान्दीमुख्याः, आभ्युदयिकस्य, वृद्धेश्च सामान्यार्थोऽभ्युदय एवाऽस्ति। काम्यश्राद्धान्तर्गतं श्राद्धं मङ्गलमयीकामनयाऽपि क्रियते। पुत्रजन्मनि, विवाहे, नामकरणे, चूडाकर्मणि, गृहप्रवेशे, जातकर्मणि क्रियमाणं वृद्धिश्राद्धं नान्दीश्राद्धमपि कथ्यते। श्रीमद्भागवतादीनां पुराणानां श्रवणाऽभीष्टेन, मननाभीष्टेन च कर्मणि यज्ञकरणात् पूर्वं नान्दीमुखीश्राद्धं करणीयमेव। तच्चाऽनिवार्यमेव। गर्भाधान-पुंसवन-सीमन्तोन्नयन-आधान-सोमयागकरणाऽवस्थासु श्राद्धमिदं कर्माङ्गश्राद्धम् इष्टिश्राद्धं वा कथ्यते। शास्त्रेषु श्राद्धस्य नैका भेदाः सन्ति। अत्र तेषां श्राद्धानामुल्लेखनं क्रियते, येषां चाऽत्यन्तावश्यकता, अनुष्ठेयता च वर्तते। नित्यं, नैमित्तिकं, काम्यं, वृद्धिः, पार्वण इति भेदेन यमस्मृतौ पञ्चप्रकारकाणां श्राद्धानामुल्लेखनं प्राप्यते।

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम्।
पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधैः॥ (यमस्मृतिः, ८२)

गृहे क्रियमाणे श्राद्धे, तीर्थयात्रादावेवञ्च गृहे यस्य कस्यापि मङ्लोत्सवस्य पूर्वसन्ध्यायां पितृभिः स्वसन्तत्याश्चाऽपेक्षाः क्रियन्ते । ब्रह्मपुराणे पिता, पितामहः, प्रपितामहश्चाऽश्रुमुखरूपेण तिष्ठन्तीति वर्णनं प्राप्यते। प्रपितामहादिपूर्वपुरुषपितरश्च नान्दीमुखरूपेण तिष्ठन्तीति वर्णनं प्राप्यते। प्रपितामहात् पूर्वपितरश्च नान्दीमुखाः, अर्थाद् देवतारूपेणाऽपि स्वीक्रियन्त इति।

पिता पितामहश्चैव तथैव प्रपितामहः।
त्रयो ह्यश्रुमुखा ह्येते पितरः सम्प्रकीर्तिताः॥

तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः।
ते तु नान्दीमुखा नाम पितरः परिकीर्तिताः॥ (वीरमित्रोदयः, श्राद्धप्रकाशः, पृ.२९५)

वराहपुराणानुसारेण पितॄणां नान्दीमुखीश्राद्धं प्रतिवर्षं सूर्ये कन्याराशौ प्रविष्टे पूर्णिमायां तिथौ कर्तव्यम्। पितृपितामहप्रपितामहात् पूर्वैः पुरुषैः प्रापितसुखशान्तिसमृद्धेः कारणात् प्राप्तवृद्धित्वपितरश्च नान्दीमुखा वृद्धिमुखाः कथ्यन्ते। नान्दीमुखीश्राद्धे पित्रादिद्वाराऽर्घ्याय योग्यपितरं प्रसन्नमुखोऽपि कथ्यते। नान्दीमुखानां पितृणां विशेषणं नास्ति। मात्रादितिस्रस्तथा मातामहादित्रयोऽपि देवसिद्धा वर्तन्ते। माता पितरो मातामहपक्षश्च विश्वेदेवाश्च ऊर्ध्वमुखीरूपेण बुद्ध्यन्ते। ऊर्ध्वमुखादिरूपो नान्दीमुखो भवति। ऊर्ध्वमुखदेवं पितरञ्च नान्दीमुखदेवोऽपि कथ्यते। मातामहवर्गान् सपत्नीकपदेन संयुज्य मातामहीपक्षस्याऽपि सङ्केतनमस्माकं प्रचलनं विद्यते। त्रिपक्षपितृभ्यो यथाभागं श्रद्धाऽर्पणाय विश्वेदेवब्राह्मणानामाऽऽह्वानं स्थापनञ्च क्रियते। विश्वेदेवानां नाम श्राद्धानुसारेण पृथक्-पृथग् एव भवति। नान्दीश्राद्धे शङ्खस्य मताऽनुसारेण सत्यस्य वसोश्च विश्वेदेवानां स्थापना विधीयते (वीरमित्रोदयः श्राद्धप्रकाशः, पृ.२३)। वृद्धिश्राद्धे प्रथमतस्त्रिपक्षपितॄणां तथा च विश्वेदेवानां पूजाऽर्चना च विधीयते। यस्य वर्गस्य यः कोऽपि जीवितो वर्तते, तं विहाय नान्दीश्राद्धं कर्तव्यम्। मातामही जीविताऽस्ति चेत् तत्र मातामहादौ सपत्नीकपदं न युज्यम्। पितरि जीविते, मातरि मृते सति मातृपार्वणस्यैव श्राद्धं कर्तव्यम्। विश्वेदेवस्य च स्थापना नैव कर्तव्यम्।

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेत्। (धर्मसिन्धुः, पृ.२३१)

प्रत्येके संवत्सरे शरदृतौ पार्वणश्राद्धकरणपश्चादेव विजयादशमीपर्व, यमपञ्चकपर्व च हर्षोल्लासेन मन्यत इत्यस्माकं वैदिकी परम्परा विद्यमाना वर्तते। एवञ्च रीत्या विवाहादौ, व्रतबन्धादौ, अनुष्ठानादौ, पुराणादौ, विशेषकार्याणामादौ पूर्वपुरुषपितृणां स्मरणसहितश्रद्धाभावो व्यक्तीकर्तव्यः। विशेषत उत्सवादौ, आनन्दादौ, सन्तानप्राप्त्यादौ, यज्ञादौ, विवाहादौ, व्रतबन्धादौ च क्रियमाणं श्राद्धं नान्दीमुखीश्राद्धं कथ्यते। एतादृशे माङ्गलिककार्ये विधीयमानं श्राद्धविशेषकार्यं नान्दीमुखीश्राद्धम्, आभ्युदयिकश्राद्धं, वृद्धिश्राद्धं वा कथ्यते। यस्मिन् पूर्वपुरुषं पितरं वा देवस्वरूपं तेषां मत्वा सविधि पूजा विधीयते।

मातृकापूजा

माङ्गलिककर्मणोऽभीष्टमभ्युदय उन्नतिरेव वर्तते। माङ्गलिककर्मणो विशिष्टाङ्गरूपेण स्वीकृते नान्दीमुखीश्राद्धे पूर्वपुरुषाणां पितृणां पूजनस्वरूपेण विधीयमानं नान्दीमुखीश्राद्धं मातृकायाः पूजां विधाय कर्तव्यम्।

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥

धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह॥ (पारस्करगृह्यसूत्रम्, गदाधरभाष्यम्, पृ.३२)

पूर्वपुरुषाणां पितृणां पूजनस्वरूपेण विधीयमानं नान्दीमुखीश्राद्धञ्च मातृकानां पूजां विधाय कर्तव्यम्। मातृकान् प्रति यज्ञोपवीतादिकं विशेषार्घ्यञ्च नैवाऽर्पणीयम्। गौर्यादिषोडशमातृकाणां मातृगणमपि कथ्यते। एताभिर्मातृकाभिः सहितानामादित्यादिसप्तदशगोमयमातृकाणां, गौर्यादिदशतोरणमातृकाणां, नन्दादिसप्तद्वार-मातृकाणां, श्री-आदिवसोर्धारामातृकाणां, ब्रह्मादिसप्तमातृकानां च पूजा विधातव्या।

अदित्यादिसप्तदशगोमयमातृकाः

अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती।
कीर्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥
बुद्धिर्लज्जा वपुः शान्तिरेता गोमयमातरः।

गौर्यादिदशतोरणमातृकाः

गौरी च धनदा नन्दा विमला मङ्गला बला।
गङ्गा च यमुना धात्री विधात्री तोरणाम्बिका॥

द्वारमातृकाः

नन्दा नन्दिनी वासिष्ठी वसुदेवा च भार्गवी।
जया च विजया चैव सप्तैता द्वारमातरः॥

वसोर्धारामातृका

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः॥

ब्राह्म्यादिसप्तमातृपूजनम्

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः॥ (कर्मकाण्डभाष्कर, मातृकापूजन, पृ.२१-२६)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मातृकाश्चतुषष्टिसङ्ख्यका वर्तन्ते। इमा मातृकाश्चतुषष्टिकलाया विद्यायाश्च प्रतीकं मन्यते। स्वस्यैवं वंशस्याऽभ्युदयार्थिना जनेन मातृकाः प्रसन्ना विधातव्याः। माङ्गलिकशुभकर्मणि, मातृकापूजनं चाऽनिवार्यमेव मन्यते। शुभकर्मणि मातृकानां स्मरणं, पूजां न क्रियते चेन्मातृगणाः क्रुद्धा जायन्ते। तदनु कृतानां कर्मणां फलमपि न प्राप्यते। अतः सर्वप्रथमं मातृकायाः पूजनं विधायैव आभ्युदयिकश्राद्धं प्रकर्तव्यम्।

अकृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत्।
तस्य क्रोधसमाविष्य हिंसामिच्छन्ति मातरः॥ (पारस्करगृह्यसूत्रम्, गदाधरभाष्यम्, पृ.७९७)

श्राद्धविधिः

गर्भाधानादिसंस्कार-वापीतडागादिप्रतिष्ठा-देवप्रतिष्ठा-सन्न्यासदीक्षाग्रहण-काम्यवृषोत्सर्ग-गृहप्रवेश-तीर्थयात्रा-राज्याभिषेक-पुराणादिश्रवणकर्म-सर्पवली-पाकशालादिकर्मणां प्रारम्भे नान्दीमुखीश्राद्धं कर्तव्यम्। महामहोपाध्यायेन रुद्रधरेण कृते *श्राद्धविवेक*ग्रन्थे त्रिपार्वणस्य नान्दीमुखीश्राद्धस्य विधानं वर्तते। पितैवं मातामहादिपितृगणा वसुस्वरूपा भवन्ति। पितामहैवं प्रमातामहादिपितृगणा रुद्रस्वरूपा भवन्ति। प्रपितामहैवं वृद्धप्रमातामहादिपितृगणा आदित्यस्वरूपा भवन्ति।

आत्माऽभिमुखमासीना ज्ञानमुद्रा निरायुधाः।
वसवः पितरो ज्ञेया रुद्रास्तत्र पितामहाः॥
पितुः पितामहाः प्रोक्ता आदित्या बर्हिषि स्थिताः। (वीरमित्रोदयः श्राद्धप्रकाशः, पृ.३०८)

वृद्धिश्राद्धं त्रिप्रकारकं भवति। क्रमानुसारं मात्रादीनां श्राद्धं, पित्रादीनां श्राद्धं, सपत्नीकमातामहादीनां श्राद्धं प्रकर्तव्यम्। मातृश्राद्धं पूर्वाह्णकाले, पितृश्राद्धं मध्याह्नकाले, मातामहश्राद्धं च अपराह्णकाले कर्तव्यम्। पृथक्-पृथग् दिनेषु श्राद्धेऽकर्तव्ये प्रतिकूले समये परिस्थितौ वा एक एव दिने वृद्धिश्राद्धं कर्तुं शक्यते।

मातृश्राद्धं तु पूर्वं स्यात् पितॄणां तदनन्तरम्।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्॥ (निर्णयसिन्धुः, पृष्ठ.१०२०)

वृद्धिश्राद्धं प्रातःकाले, अपराह्णकाले चाऽऽब्दिकश्राद्धं कर्तव्यम्। प्रातःकालकथनात् प्रहरैकस्य वाऽर्धप्रहरस्य काल इति बोद्धव्यम्। प्रातःकाले विधीयमानं श्राद्धं पुत्रजन्मादि-सहितायाऽन्यमाङ्गलिककार्याय भवति। गर्भाधानादि-कतिपय-संस्कारे करणे तु यस्मिन् कस्मिन्नपि समये कर्तुं शक्यते। समयस्याऽभावे वाऽन्यस्थान-परिस्थित्यादीनां कारणे भिन्ने भिन्न एव कर्तव्ये सति नान्दीश्राद्धं प्रथमदिन एव पूर्वाह्णकाले मातृश्राद्धवद् अपि कर्तुं शक्यत इति वृद्धमनोर्मतम् अस्तीति।

अलाभे श्राद्धकालानां नान्दीश्राद्धत्रयं बुधः।
पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्। (पारस्करगृह्यसूत्रम् १/२, गदाधरभाष्यम्, पृ.३२)

महर्षे आश्वालयनस्य मते तु मात्रादित्रयाणां, पित्रादित्रयाणां, मातामहादित्रयाणां चाऽभ्युदयिकश्राद्धे नवदैवत्यस्य स्वरूपं मत्वाऽर्चना विधातव्या इति।

माता पितामही चैव सम्पूज्या प्रपितामही।
पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः॥
एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः। (वीरमित्रोदयः, श्राद्धप्रकाशः, पृ.२९६)

नान्दीमुखीश्राद्धे करणे कर्त्रोत्तराभिमुखस्तथैव ब्राह्मणेन पूर्वाभिमुखश्च भवितव्य इति। श्राद्धाङ्गतर्पणस्या-ऽपसव्येन कृत्यकर्मणश्च वृद्धिश्राद्धे व्यवस्था नैव कृता। पितृश्राद्धे श्वेतानि, पीतानि पुष्पाणि प्रयुज्यन्ते, तथैव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्वेताः पीताश्चाऽक्षताः प्रयुज्यन्ते। तत्र श्वेतस्य चन्दनस्यापि प्रयोगो जायते। परन्त्वस्मिन् श्राद्धे, मालती-मल्लिका-केतकी-कमल-पुष्पाणां पुष्पमाला प्रयुज्यन्ते। एवञ्च कुङ्कुम-चन्दन-पुष्पाणाम् एवम् अक्षतादीनाञ्च वस्तूनां प्रयोगो जायते। मङ्गलकामनया वृद्धिश्राद्धे कुशसहितदूर्वाया अपि प्रयोगो जायते (धर्मसिन्धुः, पृ.२४२)।

अस्मिन् श्राद्धे कृते पितृतीर्थस्य प्रयोगं विनैव देवतीर्थस्यैव प्रयोगो जायते। अन्यश्राद्धसदृशमस्मिन् श्राद्धे मन्त्रोच्चारणपूर्वकम् आवाहनम् अर्घ्यदानं पिण्डदानम् अक्षय्योदकदानं च न भवति। गदाधरभाष्य उल्लिखितस्य *ततः पित्र्यमन्त्रवर्जं जपः* इत्यस्याऽऽशयो वृद्धिश्राद्धे पितृसूक्तपठनाय निषेध एव। कुशानाञ्च मोटकं विनैव दर्भस्वरूपेण प्रयोगः कर्तव्य इति। *तृप्ताः स्थः* इत्यस्य स्थाने *सुसम्पन्नम्* इत्यस्य शब्दस्य प्रयोगः कर्तव्यः इति। *पितॄनावाहयिष्ये* इत्यस्य स्थाने *नान्दीमुखान् पितॄनावाहयिष्ये* इत्यस्य प्रयोगः कर्तव्यः। स्वधा इति शब्दस्य च नान्दीमुखीश्राद्धे प्रयोगो नैव भवति। युग्म-ब्राह्मणौ भोजयितव्यौ। स्वस्य च कुलपरम्परानुसारेण, देशाचारानुसारेण च वृद्धिश्राद्धं सपिण्डकं वाऽपिण्डकं भवतीति स्पष्टम् एव। (पारस्करगृह्यसूत्रम्, षष्ठकण्डिका, पृ.४९०-४९२) सिद्धान्नदानपश्चात् विकिरदानं प्रकर्तव्यम्। स्वस्य कुलपरम्परानुसारं च दधि बदरिर्मधु च सम्मिश्र्य विल्वफलपरिमितं पिण्डदानकरणस्य प्रचलनमस्त्येव। श्राद्धे तिलानि सत्यपि प्रमुखवस्तुनि वृद्धिश्राद्धे तिलस्थाने यवानां (यवस्य वा)प्रयोगो विधीयते। पारस्करादि-विभिन्नानां विद्वद्वर्गाणां मतं च याज्ञवल्क्येनाऽपि स्वीकृतं वर्तत इति (याज्ञवल्क्यस्मृतिः १/२५०)। अपिण्डक-नान्दीश्राद्धेऽग्नौकरणम्, आवाहनम्, अवनेजनञ्च न भवति। स्वस्य परम्परानुसारं पिण्डेऽदत्ते सत्यपि विकिरार्थं घृते यवस्तण्डुलञ्च सम्मिश्र्य पुटके निधाय श्राद्धस्थलात् पूर्वभागे आसनञ्च दत्त्वा आसनस्योपरि विकिरदानं कर्तव्यम्।

अग्नौकरणमर्घ्यं चाऽऽवाहनं चाऽवनेजनम्।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने विवर्जयेत्॥ (याज्ञवल्क्यस्मृतिः, मिताक्षरा, पृ.३०९)

पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते।
स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते। (पारस्करगृह्यसूत्रम्, नवकण्डिका पृ.४९३)

नान्दीमुखीश्राद्धस्य कृत्ये विषये विविधानां विदुषां मते वा लोकचारानुसारं पृथक्-पृथग् एव दृश्यते। समस्त-परिवाराणां मङ्गलमयस्य एवं समृद्धेः कामनया वृद्धिश्राद्धं क्रियते। विद्वांसो नान्दीमुखीश्राद्धञ्च काम्यश्राद्धम् अपि कथयन्ति। अमुककामना पूर्णा स्यादिति रीत्या क्रियमाणं यत् किमपि कार्यं काम्यकर्मान्तर्गतं वर्तते। विशेषतः पुत्रस्य जन्म-चूडाकर्म-उपनयनसंस्कार-विवाहसंस्कार-श्रीमद्भागवतादिपुराणसप्ताहश्रवण-विधीत्यादीनि काम्यकर्मणि । ममाऽमुकाऽभीष्टपूर्तये, मया प्रारम्भितादमुष्माद् कार्याद् इच्छानुरूपं प्रतिफलं लभ्येतेत्येव कामनया पूर्वोक्तकाम्यकर्मप्रारम्भे श्राद्धमिदं कर्तव्यम्। पितरि जीविते सत्यपि यदि पुत्रो वृद्धिश्राद्धं प्रकुरुते चेत्, स्वपिता यस्य कस्यापि येन नाम्ना श्राद्धं कुरुते तेन तेनैव नाम्नोच्चारणपूर्वकं नान्दीमुखीश्राद्धं कर्तव्यम् (निर्णयसिन्धुः, पृ. २९४)। शातातपस्य वचनानुसारं यस्मिन् कस्मिन्नपि वृद्धिकर्मणि पूर्वपुरुषाणां तृप्तिर्न जायते चेत्तर्हि यस्य कस्यापि कार्यस्य फलं लब्धुं न शक्यते। सा विधिश्चाऽसुरा विधिः सञ्जायते।

वृद्धौ न तर्पिता ये न पितरो गृहमेधिभिः।
तद्धीनमफलं ज्ञेयमासुरो विधिरेव च॥ (निर्णयसिन्धुः, चतुर्थः परिच्छेदः, पृ.१०२०)

नान्दीश्राद्धस्य कालावधिः

नान्दीश्राद्धं नाम माङ्गलिकस्यैवं शुभकार्यस्य प्रारम्भो बोद्धव्यः। पूजादि-विशेषकर्मणोऽङ्गरूपमेव नान्दीश्राद्धम् अस्ति। कार्यस्याऽऽरम्भे विधीयमाने सति, मध्य आशौचादि-दोषा आपतन्ति चेत् कृतेन नान्दीश्राद्धेन तदाशौचादिदोषो न प्रवर्तत इति। नान्दीश्राद्धे कृते पूर्वसङ्कल्पितस्य यज्ञस्य प्रारम्भो मन्यते, अतः स यज्ञः शीघ्रमेव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादनीयो भवति। आशौचादिदोषरहितत्वाद् यज्ञकर्मणश्च विशिष्टाङ्गभूतत्वाद् अपि नान्दीश्राद्धकरणम् अनिवार्यमेव। नान्दीमुखीश्राद्धस्य पश्चात् कार्यस्य प्रकृतिं विलोक्य निश्चिते समयाऽवधौ कार्यं सम्पादयितुं शक्यते। कृतनान्दीश्राद्धदिनाच् श्रौतयज्ञा एकविंशतिदिनादौ, विवाहश्च दशमदिनादौ, चूडाकर्म च तृतीयदिनादौ, उपनयनसंस्कारश्च षष्ठदिनादौ सम्पदयितव्यः। निश्चिते समये च निर्दिष्टानां कर्मणां पूर्णता न भवेच् चेत् पुर्नवृद्धिश्राद्धं कर्तव्यम् इति।

व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥

एकविंशत्यहर्यज्ञे विवाहे दसवासराः।
त्रिषड्चौलोपनयने नान्दीश्राद्धं विधीयते। (धर्मसिन्धुः, पृ.३९९)

वृद्धिश्राद्धं प्रातःकाल एव कर्तव्यम्। जन्मनिमित्तिकसमयं विहाय अन्यासु अवस्थासु वृद्धिश्राद्धं पूर्वाह्णकाल एव कर्तव्यम्। जन्मनिमित्तिकं वृद्धिश्राद्धं तु पुत्रस्य जन्मसमय एव कर्तव्यम्। विशेषतो विवाहव्रतबन्धचूडाकर्मगृहप्रवेश-विविधश्रौतयज्ञादिकार्येषु पूर्वाङ्ग-रूपमेव नान्दीश्राद्धं वर्तते। विशिष्ट -श्रौतयज्ञेषु च देवतानामेव पूजनं परन्तु पित्र्यर्चनस्याऽकरणं तु पितॄन् प्रति कृतघ्नो भवनमेव।

नान्दीश्राद्धे विधीयमाने तु मुख्यकर्तृरूपेण स्थीयमानं कर्तृपरिवारं विहाय अन्यत आपतित-आशौचादि-दोषजन्यदोषाः स्थूलयज्ञयागादावकृतऽवभृथस्नाने, विवाहादावसमापितचतुर्थीकर्मणि, चूडोपनयन-संस्कारेऽकृतपुष्पादिविसर्जने च न प्रवर्तन्ते। अतश्चैवं प्रतिज्ञासङ्कल्पादौ *आपतितसूतकादिदोषनिवृत्त्यर्थम्* इत्यस्य शब्दस्य प्रयोग उचित दृश्यते। इदं च नान्दीश्राद्धं कर्त्राऽभीप्सितानि देवध्यानज्ञानचूडोपनयन-विवाहोत्सवादिकर्माणि दोषं विनैव सम्पन्नानि स्युरिति धिया क्रियमाणानां माङ्गलिककार्याणां पूर्वाङ्गरूपम् अभिन्नाङ्गमेव। एतस्मिन् श्राद्धे विधीयमाने (कृते) सति भूकम्पादिदोषो न जायते। यज्ञयागादौ च वृद्धश्राद्ध-सम्पादनकाले जायाया रजोधर्मेण भर्तारं दोषं न समुपैतीति। जायया एव रजोधर्म आचरणीयः। पुत्रस्य चूडाकर्मणि, उपनयनकर्मणि, विवाहकर्मणि माता यदि रजस्वला जायते तर्हि पञ्चदिवसात् पूर्वं तत्कर्म नैवाऽऽचरणीयम्। नान्दीश्राद्धे क्रियमाणेऽसामयिकमेघेषु गर्जत्स्वपि वृष्टिर्न जायेत तदाऽप्युपनयनसंस्कारं कर्तुं शक्यते। विना वृष्टिं मेघो गर्जति चेद् वेदारम्भसंस्कारश्च निषिद्ध एव। (निर्णयसिन्धुः, पृ.७६४) बृहस्पतिमते तु पुत्रस्य संस्कारदशायाम् आभ्युदयिकश्राद्ध आरब्धे पुत्रस्य माता यदि रजोवती स्यात् तर्हि पिता वा यः कोऽपि कर्ताऽऽभ्युदयिकश्राद्धं कर्तुं न शक्नोति, तच्च निषिद्धमेव। यदि माता गर्भिणी स्यात्तर्हि पुत्रस्य क्षौरकर्माऽपि निषिद्धं वर्तते।

विवाहोत्सव-यज्ञेषु माता यदि रजस्वला।
तदा स मृत्युमाप्नोति पञ्चमं दिवसं विना॥

पुत्रचूडाकृतौ माता यदि सा गर्भिणी भवेत्।
शस्त्रेण मृत्युमाप्नोति तस्मात्क्षौरं विवर्जयेत्॥

गर्भे मातुः कुमारस्य नकुर्याच्चौलकर्म तु।
पञ्चमासादधःकुर्यादत ऊर्ध्वं न कारयेत्॥

प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कार-कर्मणि।
पत्नीरजस्वला चेत्स्यान्न कुर्यात्तत्पिता तदा॥ (निर्णयसिन्धुः, पृ.५३४)

वैदिकशास्त्राणि मातापितरौ देवते मन्वते। पितामात्रो एव स्वस्य सृष्टिरभूदिति धियाऽपि देवते स्तः। प्रारम्भिकशिक्षादिकं पितृमातृभ्यां लब्धत्वात् तेषु श्रद्धासुमनाऽर्पणकार्यं वैदिकसनातनधर्मेणाऽपि महत्त्वं दत्तमिति।

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निष्कर्षः

अस्माकं परम्परायां जन्मदात्रोर्मातापित्रोर्जीवितौ सति सेवाकरणं, सम्मानप्रदानम्, आदरकरणं सन्ततेः कर्तव्यं मन्यते। जीवितदशायां सेवासदृशं सम्मानसदृशं, मृत्यपश्चादपि दाहसंस्कार एवम् और्ध्वदेहिककर्म च कर्तव्यम्। दिवङ्गतयोर्मातापित्रोः स्मृतौ तृप्तिकामनया श्राद्धकरणमपि सन्ततीनां विशिष्टकर्तव्यम् अस्ति। पूर्वपुरुषान् तथा दिवङ्गतान् पितृन् प्रति श्रद्धाभावस्य व्यक्तीकरणमपि श्राद्धमेव वर्तते। श्राद्धं पाकप्रधानकर्म वर्तते। वृद्धिश्राद्धं मूलतः पूर्वपुरुषार्थात् पितृकार्ये सत्यपि कार्यमिदं देवकार्यरूपेणाऽपि स्वीक्रियते। मङ्गलोत्सवानां प्रारम्भात् पूर्वं विधीयमाने नान्दीमुखीश्राद्धे पितरं देवस्वरूपं मत्वा विधिपूर्वकं पूज्यते। अस्माकं कस्मादपि कर्मणः पूर्वं पूर्वपुरुषं पितरं प्रति श्रद्धाभावो व्यक्तीकर्तव्य इति शास्त्रीय-निर्देशनम् अपि वर्तते। मातापितरौ वसुस्वरूपौ, पितामहीपितामहौ रुद्रस्वरूपौ, प्रपितामहीप्रपितामहौ आदित्यस्वरूपौ च वर्तेते। विशेषत उत्सवादौ, आनन्दादौ, सन्तानप्राप्त्यादौ, यज्ञादौ, विवाहादौ, व्रतबन्धादिमाङ्गलिककार्यादौ च नान्दीश्राद्धं कर्तव्यमिति विभिन्नानां शास्त्राणां मतमैक्यम्। नान्दीमुखीश्राद्धे त्रिपार्वणस्य विधानं प्रचलितं वर्तते। नान्दीमुखीश्राद्धे क्रमाऽनुसारं मात्रादित्रयाणां, पित्रादित्रयाणां, सपत्निकमातामहादित्रयाणां तथैव विश्वेदेवानामर्चना विधातव्या। नैपालिकसमाजेऽपि नान्दीमुखीश्राद्धविधौ नवदैवत्यमेव प्रचलितो वर्तते। कतिपयासु कुलपरम्परासु द्वादशदैवत्यविधिनाऽपि नान्दीमुखीश्राद्धं विधीयते। तत्तूत्तमविधिरेव वर्तते। नान्दीश्राद्धे नवदैवत्यविधिः, द्वादशदैवत्यविधिश्च उभे मान्ये वर्तेते। तथा चाऽपिण्डकविधिः, सपिण्डकविधिरपि उभे प्रचलिते, मान्ये च वर्तेत इति।

सन्दर्भग्रन्थसूची

(ई. १९९२), कल्याण, वर्ष ६६, गोरखपुर : गीताप्रेसः।

उपाध्यायः, काशीनाथः (वि.सं.२०७५), धर्मसिन्धुः, टीकाकारः मिहिरचन्द्रः, बम्बई : खेमराज-श्रीकृष्णदासप्रकाशनम्।

पारस्करः (वि. सं.२०७५),पारस्करगृह्यसूत्रम्, टीकाकारः डा. सुधाकरः मालवीयः, चतुर्थ संस्करणम्, वाराणसी : चौखम्बाप्रकाशनम्।

भट्टः, कमलाकरः (वि.सं. २०७१), निर्णयसिन्धुः, अनु. प्रा.डा. वेणीमाधवः ढकालः, काठमाडौँ : विद्यार्थिपुस्तकभण्डारः।

मनुः (ई.२००७), मनस्मृतिः, अनु. शिवराज आचार्यः कौण्डिन्न्यायनः, वाराणसी : चौखम्बा विद्याभवनम्।

मरासिनी, पं. दधिरामः (वि.सं.२०७४), कर्मकाण्डभास्करः, काठमाडौं : दधिराम-मरासिनी-स्मृति-प्रतिष्ठानम्।

मिश्रः, मित्रः (वि.सं. १९९१), वीरमित्रोदयः, श्राद्धप्रकाशः, अनु. पं. पद्मप्रसाद उपाध्यायः, वाराणसी : चौखम्बासंस्कृतसिरिजः।

याज्ञवल्क्यः (वि.सं. २०५४), याज्ञवल्क्यस्मृतिः, द्वि. संस्करणम्, वाराणसी : चौखम्बासंस्कृतसीरीज-आफिसः।

व्यासः (वि.सं. २०७६), मत्स्यपुराणम् चतुर्दशं पुनर्मुद्रणम्, गोरखपुर : गीताप्रेसः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भारविकालिदासयोः काव्यस्वरूपम्

उपप्रा. विष्णुप्रसादः पन्थी
वाल्मीकिविद्यापीठम्

सारः

संस्कृतवाङ्मयं सर्वसमृद्धमस्ति, यतो हि संस्कृतवाङ्मये वैदिकवाङ्मयाल्लौकिकसंस्कृतसाहित्यान्तो निधिर्विराजमानो वर्तते। वैदिकपौराणिकवाङ्मये ज्ञानकोशत्वेन विश्वस्मिन् विश्वे सुप्रसिद्धे स्तश्चेत् लौकिकसंस्कृतसाहित्यं सौन्दर्यतत्त्वानां निधानेन, तेषां समुचितव्यवस्थापनेन च संसारे ख्यातिङ्गतं वर्तते। कालिदासादयः कवयः सौन्दर्यतत्त्वानां निधानेन रघुवंशादीनि काव्यानि विरच्य संस्कृत–साहित्यमुत्कर्षपथं निन्युश्चेद् भरतभामहादयः सौन्दर्यतत्त्वानां व्यवस्थापनेन नाट्यशास्त्र–काव्यालङ्कारादीनि काव्यशास्त्राणि विरच्य संस्कृतसाहित्यस्य स्थानमुन्नतं चक्रुः। काव्यशास्त्राणि काव्यात्मतत्त्वनिश्चये, काव्यसौन्दर्याधायकानां तत्त्वानां स्वरूपादिविनिर्णये च प्रायेण यतन्ते।। काव्यस्वरूपप्रयोजनादिनिरूपणे प्रायेण सर्वाण्यपि काव्यशास्त्राणि दत्तावधानानि सन्ति। काव्यतत्त्वानां निर्धारणे भामहादिभिः प्रायेण कालिदासादीनां काव्यान्यनुशीलितानि सन्ति चेदर्वाचीनैः कतिपयैः कविभिर्भामहादीनां काव्यस्वरूपाण्यधीत्य काव्यतत्त्वानां यथायथं प्रयोगेण काव्यानि रचितानि विद्यन्ते। परस्परं भावयन्तः कवयः काव्यशास्त्रिणश्च संस्कृतसाहित्यस्य समृद्धौ अयतन्तेत्यत्र नास्ति कश्चन सन्देहः। आलेखोऽयं काव्यस्वरूपनिर्धारणे एव यतमानं विद्यते, परमत्र काव्यशास्त्रिणां न अपि तु कवीनां मतसमीक्षणमिष्टमस्ति, यतो हि कवयोऽपि यथाप्रसङ्गं वाग्वैशिष्ट्यं प्रतिपादयन्तः काव्येषु बहुत्र व्यञ्जनया काव्यस्वरूपचर्चां कृतवन्तो विद्यन्ते। कविष्वप्यत्र कविकुलगुरोः कालिदासस्य, काव्येषु वैचित्र्यमुद्भाव्य ख्यातिं गतस्य भारवेश्च मतानि समीक्षितानि सन्ति। कालिदासः काव्यं शब्दार्थयोः साहचर्येणैव स्रष्टुं वाञ्छति। तन्मते शब्देनार्थेन च केवलं काव्यसृष्टिर्न सम्भवति। कालिदासस्य मतं यद्यनुस्रियते तर्हि काव्ये शब्दोऽर्थानुगामी अर्थश्च शब्दसामर्थ्याभिधायी प्रयोक्तव्यः। कालिदासो यादृशं काव्यमरचयत् तत्स्वरूपमेव काव्यं तेन काव्यस्वरूपचर्चायामभ्यैषि। स परिष्कृतां काव्यभाषां प्रायुङ्क्त, अतः स काव्ये परिष्कृतामेव काव्यभाषां वाञ्छति। स यथाशक्ति दोषराहित्येन रसानुगुणतया गुणप्रयोगेण च काव्यमरचयत्, अतः दोषरहितस्य रसानुगुणतया गुणसंवलितस्य शब्दस्य प्रयोगेण काव्यं कर्तुमन्यान् निर्दिशति। स मञ्जुलैः पदैः प्रसादगुणगुम्फिताया भाषायाः प्रयोगेण वैदर्भ्या रीत्या काव्यं चकार, अतः स काव्यभाषायां तादृग्वैशिष्ट्यमेव वाञ्छति। समग्रतः कालिदासः काव्यभाषायां श्रुतिमाधुर्यं सहजबोध्यत्वं कान्तत्वं चापेक्षितवानस्ति। गूढार्थ–द्योतनक्षमायाः सुपरिष्कृतायाः भाषायाः प्रयोगेण काव्यस्य वैशिष्ट्यं वर्धितवता कालिदासेन काव्यस्वरूपचर्चया काव्ये तादृश्येव भाषाऽपेक्षिता वर्तते। अर्थगौरववान् महाकविर्भारविः काव्यस्वरूपचर्चायां च बहुत्र काव्येऽर्थगौरवमेवापेक्षितवान् वर्तते। शब्दे स्पष्टता, अर्थे च गभीरता भारविणा काव्यवाचि प्रायेण सर्वत्रापेक्षितं वर्तते, यतो हि विचित्रमार्गमनुसृतवतापि भारविणा स्वकाव्ये बहुशः स्थलेषु स्फुटतया साकमर्थगौरवं प्रयुक्तमस्ति।। भारविः शब्दे मनोहारितां वाञ्छति, अर्थे चेतःसमाह्लादकारितामभिलषते, पदानां विन्यासे पौर्वापर्यसामञ्जस्यमिच्छति, परिपाकावस्थायाञ्च काव्यवस्तुनः सुखकरत्वमीप्सते, पदसंरचनायां च सौष्ठवमपेक्षते। औदार्यगुणविशिष्टानां शब्दानामर्थानां च प्रयोगेणार्थेऽसन्दिग्धतामुद्भाव्य काव्यं रचितवान् भारविर्व्युत्पत्त्या परिशुद्धानां पदानां प्रयोगेण, याथार्थ्यसंवलितया वाण्या, प्रसादगुणभरया शैल्या च विलसितं काव्यं कविलेखनीं भूषयितुं वाञ्छति।

शब्दबीजानि– *क्रान्तद्रष्टृत्वम्, सचेतसः, नवनवोन्मेषशालिनी, उपमा, अर्थगौरवम्, वैदर्भी, प्रसादः।*

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१. विषयपरिचयः

विश्वस्यापि विश्वस्य सर्वप्राचीनं वाङ्मयं संस्कृतवाङ्मयमस्ति। वेदानामपौरुषेयत्वेनैव संस्कृतवाङ्मयस्य सर्वप्राचीनत्वं सिद्ध्यति। ऋग्वेदस्य प्राचीनतमत्वं तु पाश्चात्त्या अपि प्रायेण सर्वे स्वीकुर्वन्ति।चतुर्णामेव वेदानां संहिताः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च वैदिकसंस्कृतवाङ्मयस्य निधित्वेन विराजमानाः सन्ति। लौकिकसंस्कृते विरचिताः पुराणादयोऽपि संस्कृतवाङ्मये ज्ञानकोशत्वेन भासन्ते। वाल्मीके रामायणं व्यासस्य महाभारतं चेत्युभयमपि पौरस्त्यसभ्यताया यथार्थमैतिह्यं ख्यापयति। महाभारतस्यैव 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचिद्' इति सूक्तिर्महाभारतस्य सर्वज्ञानभाण्डागारत्वं प्रमाणयति। संस्कृतवाङ्मयस्य वैदिकं युगं पौराणिकं युगं चानु विकसितमस्ति संस्कृतस्य साहित्यिकं वाङ्मयम्। संस्कृतस्य साहित्यिकं वाङ्मयं प्रायेण वैदिकेन पौराणिकेन च युगेनानुप्राणितं वर्तते, यतो हि साहित्यिकवाङ्मयस्य कालिदासादयः कवयो वैदिकस्य पौराणिकस्य च वाङ्मयस्याधारशिलायां स्वसाहित्यभवनं निर्मितवन्तः सन्ति। अतः संस्कृतसाहित्यस्य काव्यनाटकादीनां प्रायेण समेषामपि विषया वैदिकात् पौराणिकाच्च वाङ्मयाद् गृहीताः सन्ति।पुनः काव्यतत्त्वानि च कविभिः सौन्दर्यसृष्ट्ये यानि प्रयुक्तानि, तानि बहुशस्तु वैदिकपौराणिकवाङ्मयेषु लभ्यन्त एव। कविभिः साकमेव संस्कृतवाङ्मयस्य साहित्यपरम्परायां भरतादयोऽनेके काव्यशास्त्रिणश्च समभवन्। तेऽपि काव्यतत्त्वानां प्रवर्तनं प्रवर्धनं च प्रायेण वैदिकपौराणिकवाङ्मयाभ्यामेव चक्रुरिति तत्तद्वाङ्मयग्रन्थानां परिशीलनेन ज्ञायते।पश्चात् कवयः काव्य-शास्त्रिणश्च परस्परं भावयन्तोऽनेकानि काव्यानि काव्यशास्त्राणि च प्रवर्तयामासुः। कालिदासादीनां कवीनां काव्यानि समीक्ष्य काव्यशास्त्रिणः काव्यसिद्धान्तान् प्रतिपादयामासुश्चेत् भरतभामहादीनां काव्यशास्त्रिणां काव्य-सिद्धान्तान् विलोक्यार्वाचीनाः कतिपये कवयश्च नैकानि काव्यानि रचयामासुः। अद्यपर्यन्तं संस्कृतकाव्यपरम्पराया उन्नयनं कवीनां काव्यशास्त्रिणां च परस्परं भावनेनैव निरवच्छिन्नतया जायमानमस्ति। 'काव्यं किम्' इति प्रश्नस्योत्तरं ददानाः सर्वेऽपि प्रायेण काव्यशास्त्रिणां काव्यशास्त्राण्यनुशील्यैव मुखमुद्घाटयन्ति। अद्यास्मिन्नालेखे ममाप्यभीष्टो विषयः। स एव। अत्राहमपि 'काव्यं किम्' इति प्रश्नस्यैवोत्तरं प्रस्तौमि, परं न भामहादादीनां काव्यशास्त्राण्यनुशील्य, अपि तु कालिदासादीनां काव्यान्यनुशील्यैव मयाऽत्र काव्यस्वरूपं निश्चीयते। कालिदासादिभिः प्रसङ्गवशात् कतिपयेषु स्थानेषु काव्यस्वरूपं वर्णनविषयीकृतं वर्तते। अद्याहमत्र भारविकालिदासयोर्मते तमेव विषयं प्रस्तुवन्नस्मि।

२. समस्याकथनम्

विश्वसाहित्ये संस्कृतसाहित्यस्य प्रमुखं स्थानमस्ति। संस्कृतसाहित्ये समग्रमपि साहित्यं काव्यपदेनाभिधीयते। काव्यं किम् ? इति प्रश्नस्योत्तरमनेके काव्यशास्त्रिणः अनुसंहितवन्तः सन्ति। तेषां काव्यस्वरूपसम्बद्धानां मतानां चर्चा बहुभिर्बहुत्र विहितमस्ति। अत्रालेखे काव्यशास्त्रिणां न, अपि तु कवीनां काव्यस्वरूपसम्बद्धानां मतानां समीक्षणमुद्दिष्टं वर्तते। कविष्वपि उपमाविलासस्य कालिदासस्य, अर्थगौरववतो भारवेश्च काव्येषु प्रसङ्गवशाद् विहिता तात्पर्यतोऽन्विष्य काव्यस्वरूपचर्चाऽत्र विषयीकृता विद्यते। अतोऽस्मिन्नालेखे विशेषतो निम्नसमस्ययोः समाधानार्थं यत्नो विहितो विद्यते-

क) कालिदासः स्वकाव्येषु काव्यस्वरूपं कीदृशं निर्दिष्टवानस्ति ?

ख) भारविः काव्यस्वरूपसम्बद्धं स्वमतं कथमुपस्थापितवान् विद्यते ?

३. उद्देश्यम्

काव्यं संस्कृतवाङ्मयस्य विशिष्टो निधिरस्ति, यदाश्रितं संस्कृतवाङ्मयं विश्वस्मिन् विश्वे ख्यातं विद्यते। तादृशस्य काव्यस्य स्वरूपादीनां निर्धारणार्थं विविधैर्विद्वद्भिर्विविधाः प्रयासा विहिताः सन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालिदासादीनां काव्यादिसमीक्षणेन वस्तुतस्तैः काव्यस्वरूपादीनां यथामतं निर्णयो विहितो दृश्यते। ते कालिदासादयः कवयः काव्यस्वरूपादीनां चर्चायै एव काव्यस्वरूपादीनामुपस्थापनं तु न कृतवन्तः, परं यथाप्रसङ्गं वाग्वैशिष्ट्यादिकं प्रतिपादयद्भिस्तैः काव्यस्वरूपादीनां विषया बहुत्र विषयीकृताः सन्ति। तेषु कविषु भारवि-कालिदासयोः काव्यस्वरूपसम्बद्धमतानां समीक्षणमस्यालेखस्य प्रमुखमुद्देश्यं वर्तते। तदेव प्रमुखमुद्देश्यमाधृत्य समाधेयोद्देश्यत्वेनास्यालेखस्योद्देश्यनिर्धारणमित्थं विहितमस्ति-

क) कालिदासमते काव्यस्वरूपनिर्धारणम्।

ख) काव्यस्वरूपविषये भारविमतसमीक्षणम्।

४. सीमा

काव्यस्वरूपादीनां निर्धारकाणि तु वस्तुतो भामहादीनां काव्यशास्त्राण्येव। तैः काव्यस्वरूपादीनां निर्धारणे कालिदासादीनां काव्यानां समीक्षणं विहितम्। अतः काव्येषु वाग्वैशिष्ट्यादिकं प्रतिपादयद्भिः कालिदासादिभिरपि व्यञ्जनया काव्यस्वरूपादीनां चर्चा बहुत्र विहिता वर्तते। अत्र तेष्वेव कालिदासादिषु कविषु भारविकालिदासयोः काव्यस्वरूपसम्बद्धानि मतानि समीक्ष्यन्ते। कालिदासस्य कृतिष्वपि अत्र विशेषेण रघुवंशं कुमारसम्भवं चेति महाकाव्यद्वयं विषयीक्रियते। भारवेस्तु किरातार्जुनीयमेवात्र समीक्षणीयत्वेन गृहीतमस्ति। महाकाव्यत्रयस्यापि अत्र काव्यस्वरूपसम्बद्धानामेव मतानां समीक्षणं क्रियते। अयमेवास्यालेखस्य सीमाऽस्ति।

५. अध्ययनविधिः

कविमते काव्यस्वरूपस्य समीक्षणमूलेऽस्मिन्नध्ययने सामग्रीसङ्कलनाय पुस्तकालयीयकार्यं सम्पादितं विद्यते। पुस्तकालयविधिप्रयोगे च भौतपुस्तकालयेन साकं साञ्जालिकपुस्तकालयस्याप्युपयोगोऽत्र विहितोऽस्ति। तथा सङ्कलितानां सामग्रीणां विश्लेषणेनात्रोक्तयोः समस्ययोः समाधानार्थं यत्नो विहितो वर्तते। अत्र कालिदासस्य रघुवंशम्, कुमारसम्भवं चेति द्वे महाकाव्ये, भारवेः किरातार्जुनीयमहाकाव्यं चेति त्रीणि महाकाव्यानि प्राथमिकसामग्रीरूपेण प्रयुक्तानि सन्ति चेत् काव्यस्वरूपसमीक्षणसम्बद्धा ग्रन्था आलेखाश्च द्वैतीयिकसामग्रीरूपेण प्रयुक्ताः सन्ति। काव्यमहिमप्रतिपादका अन्ये ग्रन्था अत्र सहायकसामग्रीरूपेण कृतोपयोगा विद्यन्ते। गुणात्मकविधिना विहितवस्तुविवेचनेऽस्मिन्नालेखे भारविकालिदासयोर्दृष्ट्या काव्यस्वरूपप्रतिपादने काव्यशास्त्रिणां मतैः सह तुलनायां तुलनात्मकविधिः प्रयुक्तो वर्तते चेत् प्रायेणावशिष्टस्थलेषु विश्लेषणविधिरेवात्र बहुधा प्रयुक्तो विद्यते। उक्तैर्विधिभिरुक्तानां सामग्रीणां सत्यापनेनात्र निष्कर्षणं विहितमस्ति।

६. भारविकालिदासयोर्मते काव्यस्वरूपम्

काव्यस्य स्वरूपविषये विशेषेण काव्यशास्त्रिणश्चर्चां कुर्वन्ति। अत्र काव्यशास्त्रिणां न, अपि तु कवीनां तत्रापि भारविकालिदासयोः काव्यसमीक्षणं काव्यस्वरूपचर्चायां क्रियते। तत्पूर्वप्रसङ्गत्वेन प्रथममत्र कविशब्दस्य काव्यशब्दस्य च व्युत्पत्तिर्निदर्श्यते।

६.१. कविशब्दस्य व्युत्पत्तिः, तदर्थश्च

कविशब्दस्य निष्पत्तिर्धातुद्वयाद् भवति। प्रथमं 'कवते श्लोकान् ग्रथते वर्णयति वा (राधाकान्तदेवबहादुरः, २०८१, पाना. ६८)' इत्यर्थे वर्णनार्थकात् कवृधातोः 'अच इ (उणादिः- ४/१३८)' इत्युणादिसूत्राद् इप्रत्ययविधानेन कविशब्दो निष्पद्यते। द्वितीयं च पुनः 'कौति कुवते वा शब्दायते (राधाकान्तदेवबहादुरः, २०८१, पाना. ६८)' इत्यर्थे शब्दार्थकात् कुधातोः इप्रत्ययेनापि कविशब्दो निष्पद्यते। कविशब्दस्य प्रयोगो विविधेष्वर्थेषु विहितो दृश्यते।

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पण्डितार्थे, श्लोककर्तृत्वार्थे, सृष्टिकर्तृत्वार्थे, सर्वज्ञार्थे, सर्ववर्णकार्थे चानेकत्र कविशब्दस्य प्रयोगः प्राप्यते। 'कविर्मनीषी परिभूः स्वयम्भूः (उदासीनः, २०७०, पाना. २१०)' इति कथयता शुक्लयजुर्वेदेन कविशब्दः परमेश्वरार्थे प्रयुक्तो विद्यते। पुनः 'तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः (वेदव्यासः, श्रीमद्भागवत-महापुराणम्, २०८०, पाना. ३१) इत्यत्र आदिकविशब्देन परब्रह्म बोधितमस्ति। विष्णुसहस्रनामस्तोत्रस्य 'वेदो वेदविदव्यङ्गो वेदान्तो वेदवित् कविः (वेदव्यासः, विष्णुसहस्रनामस्तोत्रम्, २०१०, पाना. १०४) इति वाक्ये कविशब्दो विष्णुपर्यायत्वेन गृहीतो वर्तते। अमरकोशे चार्थद्वये कविशब्दः प्रयुक्तोऽस्ति। दिग्वर्गे 'शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः (अमरसिंहः, २००९, पाना. १३)' इत्यत्र कविशब्दः शुक्राचार्यार्थे प्रयुक्तो विद्यते। पुनर्ब्रह्मवर्गे 'धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः (अमरसिंहः, २००९, पाना. ८९)' इति वाक्ये कविशब्दो विद्वदर्थे प्रयुक्तोऽस्ति। 'कवते इति रूपं गत्यर्थकधातुषु पठितम्, गत्यर्थाः सर्वे ज्ञानार्था इति न्यायेन कविशब्दस्य क्रान्तदर्शी मेधावी वेत्यर्थः सङ्गच्छते' इति वाक्येन वैदिकनिघण्टौ कविशब्दो मेधावित्वेन क्रान्तदर्शित्वेन चार्थापितो विद्यते (विकिस्रोतः)। मनुस्मृत्या 'अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः (मनुः, २०२४, पाना. १७१)' इत्यत्र कविशब्दः पण्डितार्थे एव प्रयुक्तो विद्यते। काव्यव्यवहारे तु कविशब्दो विशेषेण रसालङ्कारादीनां प्रयोगेण श्लोकादिकर्तृत्वे व्यवह्रियते। अतः'यः स्वस्य क्रान्तद्रष्टृत्वेन मेधावित्वेन पाण्डित्येन वा जीवनं जगच्च यथातथं सरसं वर्णयितुं समर्थो भवति, वस्तुतः स कविरस्ति' इति निष्कर्षेण वक्तुं शक्यते।

केवलं विद्यावत्त्वं न कवित्वम्, यतो हि कवित्वं सर्वेषु विद्वत्सु न सुलभम्। अत एव कथयति अग्निपुराणे व्यासः- 'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥ (शास्त्री, ई. १९५९, पाना. २५) इति। वाङ्मयसृष्टौ कवेः स्थानं तथा वर्तते, यथा जगतः सृष्टौ ब्रह्मणः स्थानमस्ति। ब्रह्मणः सृष्टौ यन्नोपलभ्यते, कविसृष्टौ तदपि लभ्यते, यतो हि जगत्सृष्टौ ब्रह्मणोऽपि पारतन्त्र्यं सुनिश्चितं भवति, परं वाङ्मयसृष्टौ कविः कथञ्चन परतन्त्रो न भवति। स नियतेर्नियमेनापि न बध्यते। अतः स स्वच्छन्दतया कल्पनाऽऽकाशे उड्डीयते। ब्रह्मणः सृष्टौ षडेव रसा भवन्ति। परं कविसृष्टौ नव रसा प्रसिद्धा एव। ब्रह्मणः सृष्टे रसाः सर्वेऽपि सर्वेभ्यो रुचिरा न भवितुं शक्नुवन्ति परं कविसृष्टेः सर्वे रसाः सहृदयेभ्यो रोचन्ते एव, यतो हि करुणादयोऽपि रसाः सहृदयानां हृदि आह्लादमेव जनयन्ति। उक्तं चास्ति विश्वनाथेन- 'करुणादावपि रसे जायते यत् परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्॥ (विश्वनाथः, ई. २०१६, पाना. ५२) इति। ब्रह्मणः सृष्टौ क्वचित् सुखस्य, क्वचिच्च दुःखस्यानुभूतिर्भवति। परं कविसृष्टौ केवलं सुखमेवानुभूयते, न कुत्रचिद् दुःखानुभूतिस्तत्र। अत एवोक्तं मम्मटेन मङ्गलाचरणे एव- 'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्। नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति। (मम्मटः, ई. १९८३, पाना. २)' इति। रचनाशिल्पे कविना कालानुरोधवशात् प्रतिभानवत्ववशाद् वा स्वकीया मौलिकता अन्वर्थीक्रियते। यः कविः प्रज्ञावान् भवति, स स्वसंस्कृतिं स्वपरम्परां च प्रति श्रद्धां करोति, नवीनतां समसामयिकतां च प्रति पुनर्जिज्ञासुर्भवति। मालविकाग्निमित्रे 'पुराणमित्येव न साधु सर्वम्' इति कथयता कालिदासेन, तथा च किरातार्जुनीये 'कालानुरोधः प्रतिभानवत्वम्' इति कथयता भारविणा च तत् तथ्यं स्वीकृतं वर्तते (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. भूमिका ११)।

६.२. काव्यशब्दाभिप्रायः

काव्यशब्दः कविशब्दात् ष्यञ्प्रत्ययविधानेन निष्पद्यते। 'कवेर्भावः कर्म वा (राधाकान्तदेवबहादुरः, २०८१, पाना. ११६)' इत्यर्थे कविशब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि ष्यञ् च (पा.सू. ५/१/१२४)' इति सूत्रेण ष्यञ्प्रत्ययो भवति। तथा निष्पन्नः काव्यशब्दः कविकृतं कर्म द्योतयति। कविकृतं तत् कर्म कवेः क्रान्तदर्शित्वेन मेधावित्वेन च विशिष्टं भवति। स्वच्छन्दतामावहतः कवेर्भावनया विशिष्टं तथाविधं काव्यं सहृदयानां हृदये साह्लादं स्थानमावहति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऋग्वेदः सर्वैः सर्वप्राचीनग्रन्थत्वेन स्वीकृतोऽस्ति। तत्रापि 'मधुमद्वचः शंसीत काव्यः कविः, प्रकाव्यमुशनेव ब्रुवाणो, प्रत्नं निपाति काव्यम्' इति वाक्ये प्रयुक्तः काव्यशब्दः काव्यगतं वैशिष्ट्यं द्योतयति, यतो हि वचसो विशेषणत्वेन मधुमच्छब्दः सम्प्राप्तोऽस्ति (द्विवेदी, काव्यस्वरूप और उसके स्रोत, ई. २०१०, पाना. २२५)'। 'विधुं दद्राणं समने बहूनां युवानं सन्तं पतितो जगार। देवस्य पश्य काव्यं महित्वाद्यो ममार स ह्यः समानः' इति ऋग्वेदवाक्यं 'अपारे काव्यसंसारे कविरेकः प्रजापतिः। यथास्मै रोचते विश्वं तथैव परिवर्तते।' इत्यग्निपुराणकथनं सत्यं प्रमाणयति (द्विवेदी, काव्यस्वरूप और उसके स्रोत, ई. २०१०, पाना. २२५)। वाल्मीकिरामायणे व्यासकृते महाभारते, तत्कृतेषु पुराणेषु च काव्यस्वरूपादिविषये यथाप्रसङ्गं बहुत्र चर्चा लभ्यते। रामायणं महाकाव्यमस्तीति तत्र बहुशो महाकाव्यसम्बद्धा विषयाः समनुप्राप्यन्ते। महाभारते तु साहित्यस्य विविधविधानां चर्चा सन्दृश्यते। कविभिः काव्ये वर्णनीया विषयास्तु प्रायेण महाभारतरामायणपुराणादिभ्य एव सङ्गृहीताः सन्ति। अतः काव्यस्य काव्यशास्त्रादीनां चोपजीव्यत्वं वेदेषु रामायणमहाभारतपुराणादिषु चास्ति (द्विवेदी, काव्यस्वरूप और उसके स्रोत, ई. २०१०, पाना. २३१)।

समाजस्य समेषां कर्मणां सर्वेषां विचाराणां सकलानां च मनोवृत्तीनां प्रभावः साहित्ये भवति, यतो हि साहित्यं समाजस्य दर्पणोऽस्ति। अतः सामाजिकीनां समासामपि गतिविधीनां प्रतिबिम्बनं साहित्ये सञ्जायते। शब्दार्थयोर्माध्यमेन सकलस्यापि समाजस्य यथावच्चित्रं प्रस्तोतुं प्रायेण कवयः प्रभवन्ति। समाजचित्रणे समर्थयोस्तयोरेव शब्दार्थयोः सहभावः साहित्यं कथ्यते विद्वद्भिः, यतो हि 'सहितयोर्भावः' इत्यर्थे सहितशब्दाद् भावार्थकष्यञ्प्रत्ययविधानेनैव साहित्यशब्दो निष्पद्यते। पौरस्त्यैः काव्यशास्त्रिभिरुच्यमानं काव्यमपि अर्वाचीनानां साहित्यमेव। तत् काव्यं तत् साहित्यं वा तादृशीं रचनां बोधयति, यया कविः स्वान्तःसुखाय, सर्वजनहिताय, सकलानन्दाय, सदुपदेशाय च नवनवोन्मेषशालिन्या प्रज्ञया जगतः प्रपञ्चं सहृदयसंवेद्यं लोकोत्तरं विधाय प्रस्तौति (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. भूमिका ७)। प्रायेण भरतादयः सर्वेऽपि पौरस्त्याः काव्यशास्त्रिणो-ऽर्वाचीनानां साहित्यशब्दस्य पर्यायत्वेनैव काव्यशब्दस्य प्रयोगं चक्रुः। तैर्नाटकानि, आख्यायिकाः, कथाः, चम्प्वः, महाकाव्यादयश्च सर्वेऽपि काव्यपदवाच्यत्वेन गृहीताः। समग्रा कृतिरेव न, अपि तु एकस्मिन्नेव वाक्ये एव सहृदयहृदयाह्लादकत्वेन समन्वितः शब्दार्थसहभावो वर्तमानोऽस्ति चेत् तदेकं वाक्यमपि काव्यमभिधीयत इति भरतादीनां विचारोऽस्ति। अर्वाचीनास्तु साहित्यपदेन समग्रमपि रसालङ्कारादिभरितं वाङ्मयं गृहीत्वा काव्यपदेन केवलं महाकाव्यादीनां बोधं कारयितुमिच्छन्ति। तेषां विचारे तु काव्यं साहित्यान्तर्गतं वर्तते।

६.३. काव्यस्वरूपचर्चा

पुरा विद्वांसः साहित्यस्याप्रामाण्यं मत्त्वा तस्य शास्त्रवन्महत्त्वाख्यापनं न कुर्वन्ति स्म। राजशेखरः साहित्यस्यापि शास्त्रवन्महत्त्वप्रतिष्ठापने दत्तावधानो विद्वानस्ति। तेन कथितमस्ति- 'अलङ्कारशास्त्रं सप्तमं वेदाङ्गम् (राजशेखरः, ई. १९७३, पाना. २५), काव्यं पञ्चदशं विद्यास्थानम् (राजशेखरः, ई. १९७३, पाना. १६), पञ्चमी साहित्यविद्या (राजशेखरः, ई. १९७३, पाना. १८)' इति। वेदस्य षडङ्गानि प्रसिद्धानि। राजशेखरानुसारेण वेदस्य सप्तममङ्गं काव्यशास्त्रमस्ति, विद्यास्थानानि च चतुर्दशैव ख्यातानि सन्ति। राजशेखरानुसारेण काव्यं पञ्चदशं विद्यास्थानं वर्तते। विद्याश्च कौटिल्येन चतस्र एवोदीरिता विद्यन्ते। राजशेखरानुसारेण साहित्यविद्या पञ्चमी विद्या विद्यते। एवं रीत्या राजशेखरः साहित्यस्य शास्त्रत्वप्रतिपादनायोद्यतो दृश्यते। आचार्येण भरतमुनिनापि नाट्यशास्त्रस्य प्रथमाध्याये एव नाट्यशास्त्रस्य वेदमूलकत्वमेवं प्रमाणितमस्ति- 'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणानपि॥ (भरतमुनिः, २०४०, पाना. ६)' इति। पुनश्च वृत्तिसङ्ग्रहस्यापि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदाधृतत्वं प्रमाणयताऽऽचार्येणोक्तमस्ति– 'ऋग्वेदाद् भारती वृत्तिर्यजुर्वेदात्तु सात्वती। कैशिकी सामवेदाच्च शेषाश्चाथर्वणात्तथा॥ (भरतमुनि, २०४०, पाना. १५) इति। एवं भरतवाचामनुशीलने नाट्यं तु सर्वमपि प्रायेण वेदानुप्राणितं दृश्यते। न केवलं नाट्यम्, गद्यपद्याद्याधारितमन्यत् सर्वमपि। काव्यजगदपि विषयादिदृष्ट्या शैल्यादिदृष्ट्या च वेदवेदाङ्गेभ्यो प्रभावितमेवास्ति। काव्यान्येव न, काव्यशास्त्राणि च वैदिकवाङ्मयाद् वैदिकदर्शनेभ्यश्च प्रभावितानि सन्ति।

काव्यशास्त्राणि प्रायेण काव्यादीनामनुशीलनेन निर्मितानि अभवन्। वाल्मीकिव्यासकालिदासादीनां काव्यादीनां समीक्षणेनैव काव्यशास्त्रिभिः काव्यनियमानुद्भाव्य काव्यशास्त्राणि ग्रथितानीत्यत्र न कोऽपि सन्देहं करोति, यतो हि काव्यशास्त्रादीनां प्रवर्तनात् पूर्वमेव काव्यानि रचितान्यासन्। भामहोऽपि काव्यालङ्कारे तदेवैवं स्वीकृतवानस्ति– 'अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म। सुजनावगमाय भामहेन ग्रथितं रक्रिलगोमिसूनुनेदम्॥ (भामहः, २०४२, पाना. १७३) इति। पश्चवर्तिभिः कविभिस्तु काव्यशास्त्राणामध्ययनं विधाय काव्यानि रचितानि स्युः।

काव्यस्वरूपविषयिणी चर्चा तदैवारब्धा यदा काव्यशास्त्रस्य प्रादुर्भावो जातः। प्रायेण सर्वैरपि काव्यशास्त्रिभिः काव्यस्वरूपविषयिणी चर्चा विहितैवास्ति। तत्र विदुषां सर्वेषामैकमत्यं तु नास्त्येव, अपि तु खण्डनमण्डनादिभिः पूर्वपूर्वविदुषामपेक्षया परपरवर्तिनां विदुषां काव्यस्वरूपसम्बद्धं मतं सुदृढं तथ्यपरकं च दृश्यते। अत्र काव्यशास्त्रिणां काव्यस्वरूपविषया उद्दिष्टा न सन्ति, अपि तु कवीनां काव्यस्वरूपसम्बद्धविचारा अनुशील्यन्ते। यद्यपि कालिदासादिभिः कविभिः काव्यशास्त्राणि रचितानि न सन्ति, तथापि तेषां काव्येषु यथाप्रसङ्गं तेषां काव्येषु काव्यस्वरूपादिविषयका विचारा लभ्यन्ते। अत्र भारविकालिदासयोः काव्यस्वरूप-सम्बद्धानि मतानि समीक्ष्यन्ते।

६.३.१. कालिदासः

कविकुलगुरुरुपमाविलासः कालिदासः सौन्दर्यस्य प्रयोक्ता महान् कविरस्ति। स स्वकाव्येषु स्वनाट्येषु च बहुत्र काव्यस्वरूपचर्चां विहितवानस्तीति तस्य काव्यादीनामनुशीलनेन ज्ञायते। भामहादयो बहवः काव्यशास्त्रिणः कालिदासस्य काव्यस्वरूपसम्बद्धं मतं पूर्णतोंऽशतो वा स्वीकृतवन्तः सन्ति (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. १५)।

रघुवंशमहाकाव्यस्य मङ्गलाचरणे एव पार्वतीपरमेश्वरयोरौपम्येन शब्दार्थौ प्रस्तुतवान् कालिदासस्तात्पर्यतः शब्दार्थयोः सम्पृक्तत्वमेव काव्यत्वेनैवमङ्गीकृतवानस्ति– 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. २)' इति। शब्दः काव्यस्य वाचको भवति चेदर्थो वाच्यः। कालिदासः काव्ये तयोर्द्वयोर्वाच्यवाचकयोस्तथा सम्पृक्तिमिच्छति, यथा जगतः पित्रोः पार्वतीपरमेश्वरयोः नित्यं सम्पृक्तिर्वर्तते। यथा पार्वतीपरमेश्वरयोः सम्पृक्तत्वेन जगदुद्भवति, तथैव शब्दार्थयोः सम्पृक्तत्वेन काव्यमुद्भवति। जगत्सृष्ट्यै पार्वतीपरमेश्वरयोरिव काव्योद्भवाय शब्दार्थयोः सम्पृक्तत्वं नितरामपरिहार्यं भवतीति कालिदासस्य मतं वर्तते। तेन कालिदासः काव्ये सदैव शब्दार्थयोर्नित्यसाहचर्यमपेक्षते।

कुमारसम्भवे तारकासुरस्य पीडनेन भृशं पीडिता देवा ब्रह्माणमुपगम्य तद्वन्दनं चक्रुरिति कथयता कालिदासेन निगदितं वर्तते– 'अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखाः। वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥ (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. ८)' इति। अत्र महाकविना वाक्छब्दस्य विशेषणत्वेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रयुक्तः अर्थ्यशब्दः काव्ये शब्दार्थयोः सम्पृक्तिमेव समर्थयति। पुनर्वसिष्ठस्य कुशलप्रश्नानन्तरं दिलीपस्योत्तरप्रदानोपक्रमं सूचयता कालिदासेनोक्तं वर्तते– 'अथार्थवनिधेस्तस्य विजितारिपुरःसरः। अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. २७)' इति। अत्रापि वाक्छब्दस्य विशेषणत्वेन अर्थ्यशब्दं प्रयुक्तवता कालिदासेन काव्ये शब्दार्थसाहचर्यमेव समर्थितमस्ति।एवं च शिवस्य पार्वतीभर्तृत्वस्य युक्तत्वं प्रतिपादयता कालिदासेनोक्तं वर्तते– 'तमर्थमिव भारत्या सुतया योक्तुमर्हसि। अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिका॥' (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. ३९४)' इति। 'यथा कविवागर्थेन योक्तुं युज्यते, तथैव पार्वत्यपि शिवेन योक्तमर्हृते' इति पद्यस्यास्याशयो वर्तते। अनेनापि पद्येन पुना रघुवंशमहाकाव्यस्य मङ्गलाचरणोक्तं काव्यस्य शब्दार्थसाहचर्यरूपं स्वमतं समर्थितं विद्यते। 'शब्दार्थौ सहितौ काव्यम् (भामहः, २०४२, पाना. ९)' इत्यत्र भामहेन, 'शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि। बन्धे व्यवस्थितं काव्यं तद्विदाह्लादकारिणि॥ (कुन्तकः, २०७८, पाना. ७)' इत्यत्र कुन्तकेन चापेक्षितं शब्दार्थयोः साहित्यं वस्तुतः कालिदासाभिमतं शब्दार्थयोः सम्पृक्तत्वमेवास्ति। साहित्यं व्याचक्षाणः कुन्तकस्तु पुनः शब्दार्थयोरन्यूनानतिरिक्तत्वेन मनोहारितया व्यवस्थापनं साहित्यमुक्तवानस्त्येवम्– 'साहित्यमनयोः शोभाशालितां प्रति काप्यसौ। अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥ (कुन्तकः, २०७८, पाना. १३)' इति। वागर्थयोरुपमानत्वे पार्वतीपरमेश्वरयोश्चोपमेयत्वं रघुवंशस्य मङ्गलाचरणोक्तं कालिदासवर्णितं यदि स्वीक्रियते तर्हि कुमारसम्भवानुसारेणार्थं प्राप्तुं वाक् तपश्चरति, अन्ततोऽर्थश्च वाचः क्रीतदासो भवति (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. १९)। काव्यस्यैतदन्यूनानतिरिक्तत्वेन साहचर्यमेव तादृशेन प्रतिभाविशेषेणाभिव्यज्यते, यः स्वादु तदर्थवस्तु निस्यन्दितुमलोकसामान्यं व्यक्तीकर्तुं च क्षमो भवति। कथयति चानन्दवर्धनोऽत्र– 'सरस्वती स्वादु तदर्थवस्तु निस्यन्दमाना महतां कवीनाम्। अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥ (आनन्दवर्धनः, ई. २०१३, पाना. २९)।इति।

पुनः कुमारसम्भवे पर्वतस्य पार्वतीपितृत्वं विशिष्य पार्वत्या वैशिष्ट्यं ख्यापयता कालिदासेनोदितं वर्तते– 'प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः। संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥ (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. ३९)' इति। अत्र महाकविर्वाचः परिष्कारं काव्ये वाञ्छति। तथैव भगवतो वाचि सरस्वत्याश्चरितार्थत्वं वर्णयता कविना पुनरुक्तं वर्तते– 'पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता। बभूव कृतसंस्कारा चरितार्थेव भारती ॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. ३३०)' इति। प्रकृतेन पद्येन 'भगवतो वाणी कृतानुभवस्य कवेर्वाणीव स्थानप्रयत्नादिभिः संस्कृताऽऽसीत्' इति कथयता कविनाऽत्रापि काव्यभाषायाः परिष्कारोऽपेक्षितो वर्तते।। एवं च रघुवाचं प्रशंसता कालिदासेन पुनरुक्तमस्ति– 'इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य। स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद् वरतन्तुशिष्यः॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. १४२)' इति। अत्र वागर्थे गोशब्दं प्रयुक्तवान् कालिदासस्तद्विशेषणेन उदारशब्देन काव्यवाचि दोषराहित्यमपेक्षितवानस्ति। पुनरपि रघोः स्वयंवरप्रसङ्गे तद्वाचः प्रशंसायां स कथितवानस्ति– 'निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च।। कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. १७९)' इति। 'राजकुमारे अजे सरस्वत्या श्रियश्चोपस्थितिरेकत्र वर्तते। अतः श्रिया शोभया सरस्वत्या सूनृतया गिरा समायुक्ता इन्दुमती राजकुमारं वरीतुमर्हति' इति कथयता कविनात्र गिरो विशेषणत्वेन सूनृतशब्दस्य प्रयोगं विधाय काव्यगिरो माधुर्यगुणविलसितत्वं सत्याधारितत्वं चापेक्षितं वर्तते।

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं च राजकुमारस्याजस्य वन्दनां कुर्वतां वन्दिनां मुखात् कविः कथयति– 'भवति विरलभक्तिर्म्लान–पुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः। अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. १६५)' इति। अत्र कालिदासेन वाचो विशेषणत्वेन गृहीतं मञ्जुपदं काव्यवाचि सौन्दर्यमपेक्षते। पुनः 'आत्तशास्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः। उच्चचार पुरस्तस्य गूढरूपा सरस्वती॥ (कालिदासः, रघुवंशम्, ई. १९०३, पाना. ५१०)' इति पद्ये रामस्यायोध्याप्रत्यवर्तनवेलाया आकाशवाणीं सूचयता कालिदासेन काव्यवाचि गूढार्थवत्त्वावश्यकत्वं निरूपितं विद्यते। तथा च आकाशभाषितस्य प्रामाणिकत्वं निरूपयता कविना कुमारसम्भवे पुनः कथितमस्ति– 'इत्थं रतेः किमपि भूतमदृश्यरूपं मन्दीचकार मरण–व्यवसायबुद्धिम्। तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुमभिवृद्धरसैर्वचोभिः॥ (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. २४३)' इति। अत्र महाकविना काव्यवाचो रसिकत्वं निरूपितं विद्यते। एवं च 'दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति (कालिदासः, मेघदूतम्, ई. २००२, पाना. २७६)' इति पद्येऽपि पुनः काव्ये वर्णनीयत्वेन गृहीते वस्तुनि रससमृद्धेरावश्यकत्वं सूचितं वर्तते।

एवं च पुनः पार्वत्याः वाङ्माधुर्यं निरूपयता कविना निगदितमस्ति– 'स्वरेण तस्याममृतस्रुतेव सञ्जल्पितायामभिजातवाचि। अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना॥ (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. ५९)' इति। पार्वत्याः श्रुतिमधुराया वाचः पुरः कोकिलध्वनिरपि अज्ञैर्वादिता तन्त्रीरिव श्रुतिकटुदोषजनको भवतीति निरूपयता कालिदासेनात्र काव्यवाचः श्रुतिमाधुर्यं दोषराहित्यं च निर्दिष्टमस्ति। सप्तर्षिभिः श्रुतस्य हिमालयवचसो वैशिष्ट्यं प्रतिपादयता कालिदासेन कुमरसम्भवमहाकाव्ये वचसो विशेषणत्वेन निर्दिष्टम् 'ईप्सितार्थक्रियोदारम्' इति पदं काव्यवाचोऽभीष्टार्थप्रदत्वं सूचितवदस्ति। पद्यमेवंविधं वर्तते– 'ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः। आशीभिरेधयामासुः पुरः पाकाभिरम्बिकाम्॥ (कालिदासः, कुमारसम्भवमहाकाव्यम्, २०६०, पाना. ४०१)' इति।

एवं बहुत्र वाग्वैशिष्ट्यं प्रतिपादयता कालिदासेन तात्पर्यतः काव्यस्वरूपं विषयीकृतमस्ति। कालिदासस्य काव्यवाग् यादृशी वर्तते तादृश्येव वाक् कालिदासेन काव्येषु वर्णिता विद्यते। कालिदासानुसारेण काव्यवागेवंविधा भवति–

कल्पनालतांशुकेषु विच्छित्तिशेषैर्वर्णैर्विचिन्त्य कृते गीतिक्षमेऽर्थबन्धे चिरव्यवस्थापिता वाक्, वर्णस्थानसमीरितायां ललितविधानेन योजितायां यस्यां वाचि शब्दानां चतुष्टयी प्रवृत्तिर्जातिगुणक्रियायदृच्छारूपा चरितार्था भवति, ... यत्र चान्तर्निहितैर्वचनैरङ्गैः सम्यगर्थः सूचितो भवति, यस्याः पादन्यासो लयमनुगतः सन् रसेषु तन्मयत्वं याति। विषयात् स एव रागबन्धो भावो भावं नुदति (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. २५)।

६.३.२. भारविः

यथा कालिदास उपमाविलासस्तथैव भारविरर्थगौरववानस्ति। अत एवोक्तं विद्वद्भिः– 'भारवेरर्थगौरवम् (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. ३३)' इति।। अर्थगौरववतस्तस्य भारवेः 'किरातार्जुनीयम्' इति महाकाव्यं संस्कृतसाहित्यस्य बृहत्त्रय्यामन्यतमं विद्यते। सोऽपि महाकविर्यथाप्रसङ्गं किरातार्जुनीयमहाकाव्ये बहुधा काव्यस्वरूपचर्चां विहितवानस्ति। सोऽपि वाग्वैशिष्ट्यं प्रतिपादयन् काव्यस्वरूपविषयि स्वमतमुपस्थापितवान् विद्यते। प्रथमं तेन कथितमस्ति– 'स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे (भारविः, २०५८, पाना. ४)'। युधिष्ठिरं प्रति सन्देशं श्रावयतो वनेचरस्य वाग्वैशिष्ट्यं प्रतिपादयता भारविणाऽस्मिन् पद्यखण्डे वाचि सौष्ठवस्य, औदार्यस्य, अर्थविनिश्चयस्य च वैशिष्ट्यमभ्यर्थितम्। अत्र तात्पर्येण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भारविणा काव्यवाचः सौष्ठवेन, औदार्येण, अर्थविनिश्चयेन च युक्तत्वं वाञ्छितमस्ति। वामनेन प्रस्तुतेषु दशसु काव्यगुणेष्वन्यतममिदमौदार्यम्। तन्मते विकटत्वमुदारता। विकटत्वं च विच्छेदात् पदानां नृत्यप्रायत्वम्। अर्थगुणदृष्ट्या चोदारताऽग्राम्यत्वमस्तीति पुनस्तेनैव सङ्केतितमस्ति (द्विवेदी, साहित्यविमर्शः, ई. २००२, पाना. ३४)। युधिष्ठिरमुखाद् भीमवाक्यं प्रशंसता भारविणा तात्पर्यतः काव्यवैशिष्ट्यमेवं निरूपितं विद्यते– 'स्फुटता न पदैरपाकृता न च स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥ (भारविः, २०५८, पाना. ५४) इति। वाक्यस्यस्यानुसारेण काव्ये पदैः विशदार्थानां स्पष्टता नापकरणीया, अर्थगौरवस्यास्वीकारोऽपि न विधेयः, वाक्येषु पदानामन्योन्य-साकाङ्क्षत्वेन पूर्वापरसम्बन्धो यथावत् स्थाप्यः, आवश्यकतानुसारेण पदानामर्थवैविध्यसम्पादनं विधेयम्, तत्र पदानामर्थबोधनसामर्थ्यस्य गोपनं न कथञ्चित् कर्तव्यम्, पदानां सार्थको विन्यासः कार्यः। भीमवाक्यप्रशंसायामेव तेन वाचि मतेः प्रतिबिम्बनमेवमपेक्षितं वर्तते– 'विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते (भारविः, २०५८, पाना. ५२)' इति। एतदनुसारेण काव्यवाचि सौन्दर्यशास्त्रेणान्वितताया बुद्धेर्विलासोऽपेक्षितो भवति।

भारविः पुनर्भीममुखाद् द्रौपदीवाणीं प्रशंसन् कथयति– 'इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती (भारविः, २०५८, पाना. ४०)' इति। अत्र कविर्भारत्या विशेषणत्वेन रुचिरार्थवत्त्वं गृहीत्वा 'काव्यवाक् सदैव रुचिरार्था प्रयोक्तव्या' इति निश्चितवानस्ति। काव्यस्वरूपं प्रतिपादयन् पण्डितराजो जगन्नाथश्च शब्दस्य विशेषणत्वेन रमणीयार्थप्रतिपादकत्वं (जगन्नाथः, २०६२, पाना. ८) गृहीत्वा तस्य रुचिरार्थवत्त्वं समर्थितवानस्ति। एवं च किरातार्जुनयोर्युद्धप्रसङ्गे जयमिच्छतोऽर्जुनस्य बाणानां शब्दैरौपम्यं प्रदर्शयता भारविणोक्तं वर्तते– 'संस्कारवत्त्वाऽमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु। जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे॥ (भारविः, २०५८, पाना. ४८४)' इति। अत्र कविः काव्ये प्रयोज्यानां शब्दानां संस्कारवत्त्वम्, चेतोरञ्जकत्वम्, व्यवहारे प्रयोज्यत्वम्, शिक्षाप्रदत्वम्, गुणगुणितत्वम्, अलङ्कारालङ्कृतत्वम्, अर्थवत्त्वं चापेक्षितवानस्ति।

किरातस्यार्थगभीरां वाचं श्रुत्वा कुपितोऽप्यर्जुनो धैर्यमपरित्यज्य तद्वाचमेवं प्रशंसति– 'विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्। प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती॥ (भारविः, २०५८, पाना. ३९९)' इति। अत्र महाकविना भारविणा किरातमुखनिःसृतां सरस्वतीं विशिष्य काव्यवाचि स्फुटोच्चारणीयत्वम्, सुखश्रवणीयत्वम्, सकलहृदयप्रसादकत्वम्, प्रसादगुणयुक्तत्वम्, गम्भीरार्थवाहकत्वं चाभीप्सितमस्ति। पुनः वाग्वैशिष्ट्येन भरितस्य जनस्य दुर्लभतां प्रतिपादयता तेन निगदितमस्ति– 'भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये। नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित् प्रकाशताम्॥ (भारविः, २०५८, पाना. ३९९)' इति। अत्रापि यदि काव्यस्वरूपानुसन्धानदृष्ट्याऽनुसन्धीयते चेदत्र तात्पर्यतः कविः काव्यभाषायां साभिप्रायत्वम्, मनोभावप्रकाशकत्वम्, गूढार्थस्पष्टीकरणक्षमत्वं च वाञ्छितवान् विद्यते। तदनु च पुनर्विद्वद्भिरपेक्षितं वाग्वैशिष्ट्यं प्रतिपादयन् कविराह– 'स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः। इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः॥ (भारविः, २०५८, पाना. ४००) इति। अत्र च कविः केषाञ्चिद् विदुषां मतं समर्थयन् काव्यवाचोऽर्थे गौरवापेक्षितत्वं निरूपितवानस्ति। पुनरत्रैवान्येषां मतालोचकेन तेन काव्यवाक्प्रयुक्तानां शब्दानां शुद्धिरपेक्षिता वर्तते। पुनश्च काव्यगिरां सकलमनोरञ्जकत्वमपेक्ष्य तेन तादृक्सकलवैशिष्ट्यभरितायाः काव्यवाचः प्रयोगकर्तॄणां दुर्लभत्वं च सूचितं वर्तते।

द्वितीयसर्गस्यादिमे पद्ये एव भारविणा भीमसेनवचोवैशिष्ट्यं प्रदर्शयता काव्यवाग्वाञ्छिततत्त्वानि निरूपितानि विद्यन्ते– 'विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम्। उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वृकोदरः॥ (भारविः, २०५८, पाना. ३७)' इति। अत्र प्रथमं द्रौपदीगिरो गरीयस्त्वं मनःप्रियत्वञ्च संसूच्य काव्यवाचो गौरववत्ता मनोहारिता च निर्दिष्टा वर्तते। पुनर्भीमवचनस्य उपपत्तिमत्त्वमूर्जिताश्रयत्वं च निर्दिष्टवता कविनाऽत्र काव्यवाचो युक्तियुक्तत्वमुदारार्थवत्त्वं च निरूपितं विद्यते। पुनरपरस्मिन् पद्ये काव्यवाचो बृहस्पतेरपि विस्मयकारित्वं संसूचयन् कविः कथयति– 'यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा। अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्॥ (भारविः, २०५८, पाना. ३८)' इति। पुनर्भीमसेनमुखाद् द्रौपदीवाच एव वैशिष्ट्यं प्रतिपादयता भारविणा सुकविकृतस्य काव्यस्य सुवैद्यकृतेनातिवीर्यवताऽल्पीयसा भैषज्येन सहौपम्यं विहितं वर्तते– 'परिणामसुखे गरीयसी व्यथकेऽस्मिन् वचसि क्षतौजसाम्। अतवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः॥ (भारविः, २०५८, पाना. ३९)' इति।प्रकृतपद्यानुसारेण यथा औषधस्याल्पीयानपि अंशो शरीरव्यथां निवारयति तथैव स्वल्पयापि काव्यवाचा सचेतसां चेतोव्यथा निराकरणीया। यथा आदौ तिक्तादिविशिष्टमपि औषधं परिणामे रोगनिवृत्त्या सुखं प्रददाति, तथैव काव्यवाचापि परिपाकावस्थायां सुखकर्या भवितव्यम्। एतादृश्यां काव्यवाचि तादृशे औषधे इवानेके गुणा भवन्ति।

स्वस्यानुपदेश्यत्वं सूचयताऽर्जुनेन देवराजं प्रति कथितेऽस्मिन् वचस्यपि काव्यस्वरूपसम्बद्धं किमपि मतं दृश्यते– 'अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि। व्रजत्यफलतामेव नयद्रुह इवेहितम्। (भारविः, २०५८, पाना. ३१९)' इति। बृहस्पतेर्वागपि पूर्वापरप्रसङ्गस्यासामञ्जस्ये वैफल्यं यातीति सूचयन् कविः काव्यवाचः प्रतिशब्दं पूर्वापरसामञ्जस्यं वाञ्छितवानस्ति। एवं प्रसङ्गवशाद् वाग्वैशिष्ट्यं प्रतिपादयता महाकविना किरातार्जुनीये बहुत्र तात्पर्येण काव्यस्वरूपविषयिणी चर्चा विहताऽस्ति।

७. उपसंहारः

काव्यस्वरूपचर्चायां काव्यशास्त्रिण एव उद्यता न सन्ति, अपि तु व्यञ्जनया कवयोऽपि तत्स्वरूपचर्चां कृतवन्तो दृश्यन्ते। कविषु चोपमाविलासः कविकुलगुरुः कालिदासः कीर्तिप्रभया रवितुल्योऽर्थगौरवेण ख्यातिं गतो भारविश्चोभौ स्वकाव्येषु बहुत्र प्रसङ्गवशाद् वाग्वैशिष्ट्यं प्रतिपादयन्तौ दृश्येते। तयोर्वाग्वैशिष्ट्यप्रतिपादनं समीक्ष्यात्र तन्मते काव्यस्वरूपं निर्धारितं विद्यते।

कालिदासानुसारेण काव्यं शब्दार्थयोः साहचर्येणैव सृज्यते। न केवलं शब्देन, न च केवलमर्थेन काव्यसृष्टिः सञ्जायते। काव्ये शब्दोऽर्थानुगामी प्रयोज्यः, अर्थश्च शब्दसामर्थ्याभिधायी। अतः कालिदासदृष्ट्या काव्ये शब्दार्थयोरुभयोरपि समानं महत्त्वं विद्यते। एतदेव समर्थयता भवभूतिनापि उत्तररामचरिते राममुखादष्टावक्रप्रशंसां विदधानेन निगदितमस्ति– 'लौकिकानां हि साधूनामर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ (भवभूतिः, ई. २०११, पाना. १५)' इति। कालिदासः काव्यभाषां परिष्कृतां वाञ्छति। दोषरहितस्य गुणसंवलितस्य शब्दस्य प्रयोगं काव्ये करणीयमिति विचारः कालिदासस्य वर्तते। मञ्जुलैः पदैः प्रसादगुणगुम्फिताया भाषायाः प्रयोगेण वैदर्भ्या रीत्या काव्यं चिकीर्षुः कालिदासः काव्यभाषायां श्रुतिमाधुर्यं सहजबोध्यत्वं कान्तत्वं चापेक्षितवानस्ति। गूढार्थद्योतनक्षमायाः सुपरिष्कृतायाः भाषायाः प्रयोगेण काव्यस्य वैशिष्ट्यं वर्धितवता कालिदासेन काव्यस्वरूपचर्चया काव्ये तादृश्येव भाषाऽपेक्षिता वर्तते।

अर्थगौरवेण विश्वस्मिन् विश्वे ख्यातिं गतो भारविः काव्यस्वरूपचर्चायां च बहुत्र काव्येऽर्थगौरव-मेवापेक्षितवान् वर्तते। शब्दे स्पष्टता, अर्थे च गभीरता भारविणा काव्यवाचि प्रायेण सर्वत्रापेक्षितमस्ति। भारवेरनुसारेण शब्दस्य मनोहारिता, अर्थस्य चेतःसमाह्लादकारिता, पौर्वापर्यसामञ्जस्यम्, परिपाकावस्थायां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुखकरत्वम्, पदसंरचनायां सौष्ठवम्, शब्दे चार्थे चौदार्यविशिष्टत्वम्, अर्थविषयेऽसन्दिग्धता, व्युत्पत्त्या परिशुद्धानां पदानां प्रयोगः, याथार्थ्यसंवलिता वाणी, प्रसादगुणभरता चेत्यादिभिरनेकैर्वैशिष्ट्यैः काव्यं विलसितं भवेत्।

सन्दर्भग्रन्थसूची

अमरसिंहः. (२००९). अमरकोशः. बम्बईः खेमराज श्रीकृष्णदास।

आनन्दवर्धनः. (ई.२०१३). ध्वन्यालोकः. (आचार्य रेवाप्रसाद द्विवेदी, सम्पा.) वाराणसीः कालिदाससंस्थानम्।

कालिदासः. (२०६०). कुमारसम्भवमहाकाव्यम् (प्रथमः सम्पाद.). (प्रा. रेवाप्रसाद द्विवेदी, सम्पा.) वाराणसीः सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

कालिदासः. (ई. १९०३). रघुवंशम् (तृतीय सम्पाद.). वाराणसीः चौखम्बा सुरभारती प्रकाशन।

कालिदासः. (ई. २००२). मेघदूतम्. (वैद्यनाथ झा, अनु.) वाराणसीः कृष्णदास अकादमी।

कुन्तकः. (२०७८). वक्रोक्तिजीवितम् (प्रथम सम्पाद.). काठमाडौँ: अनिता नेपाल।

जगन्नाथः. (२०६२). रसगङ्गाधरः (द्वितीय सम्पाद., भा. प्रथमः). (डा. शशिनाथ झा, अनु.) वाराणसीः चौखम्बा कृष्णदास अकादमी।

द्विवेदी, रहसविहारी (ई. २००२). साहित्यविमर्शः. वाराणसीः सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

द्विवेदी, रहसविहारी (ई. २०१०). काव्यस्वरूप और उसके स्रोत. (डा. त्रिभुवननाथ शुक्ल, सम्पा.) साहित्यशास्त्र के सौ वर्ष, २२५–२३७।

भरतमुनि. (२०४०). नाट्यशास्त्रम् (तृतीयो भागः) (प्रथम सम्पाद., भा. तृतीय). (बाबुलाल शुक्ल शास्त्री, सम्पा.) वाराणसीः चौखम्भा संस्कृत संस्थान।

भरतमुनिः. (२०४०). नाट्यशास्त्रम् (प्रथमो भागः) (द्वितीय सम्पाद., भा. प्रथमः). (बाबुलाल शुक्ल शास्त्री, सम्पा.) वाराणसीः चौखम्भा संस्कृत संस्थान।

भवभूतिः. (ई. २०११). उत्तररामचरितम्. (डा. प्रेरणा माथुर, अनु.) दिल्लीः विशाल प्रकाशन।

भामहः. (२०४२). काव्यालङ्कारः. पटनाः विहार राष्ट्रभाषा परिषद्।

भारविः. (२०५८). किरातार्जुनीयम् (प्रथमः सम्पाद.). (डा. सुधाकर मालवीय, अनु.) वाराणसीः कृष्णदास अकादमी।

मनुः. (२०२४). मनुस्मृतिः. कलकत्ताः गुरुमण्डल ग्रन्थमाला।

मम्मटः. (ई. १९८३). काव्यप्रकाशः (अष्टम सम्पाद.). पुणेः भण्डारकर प्राच्यविद्या संशोधन मन्दिर।

राजशेखरः. (ई. १९७३). काव्यमीमांसा (प्रथमः सम्पाद., भा. प्रथम). (डा. रमाशङ्कर त्रिपाठी, सम्पा., ७ डा. रमाशङ्कर त्रिपाठी, अनु.) वाराणसीः मोतीलाल बनारसीदास।

रालाल वर्मा शास्त्री. (ई. १९५९). अग्निपुराण का काव्यशास्त्रीय भाग. दिल्लीः नेसनल पब्लिसिंग हाउस।

विश्वनाथः. (ई. २०१६). साहित्यदर्पणः. (शालिग्रामशास्त्री, अनु.) दिल्लीः मोतीलाल बनारसीदास।

वेदव्यासः. (२०१०). विष्णुसहस्रनामस्तोत्रम् (पञ्चम सम्पाद.). (भोला, अनु.) गोरखपुरः गीताप्रेस।

वेदव्यासः. (२०८०). श्रीमद्भागवतमहापुराणम्. गोरखपुरः गीताप्रेस।

स्वामी गङ्गेश्वरानन्द उदासीनः (सम्पा.). (२०७०). शुक्लयजुर्वेदः (द्वितीय सम्पाद.). मूम्बईः स्वामी गङ्गेश्वर फाउन्डेसन।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्यायदर्शने प्रमेयनिरूपणम्

उपप्रा.डा. सीतारामः खतिवडा

वाल्मीकिविद्यापीठम्

१. लेखसारः

पौरस्त्यदर्शने न्यायदर्शनस्य स्थानं महत्त्वपूर्णमस्ति। षडास्तिकदर्शनेषु मध्ये न्यायदर्शनमपि एकम्। न्यायदर्शने प्रमाणादिषोडशपदार्थानां वर्णनं प्राप्यते। तत्र प्रमाणादिषोडशपदार्थेषु मध्ये द्वितीयं प्रमेयम्। प्रमेयाणि च 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेय'मिति न्यायसूत्रे एव परिगणितानि सन्ति। तत्रापि विशेषत आत्मतत्त्वस्य ज्ञानं निःश्रेयसस्य कारणमिति नैयायिकानां मान्यताऽस्ति। तत्त्वज्ञानं कथं भवतीति विषये न्यायदर्शने अविद्यानाशेन तत्त्वज्ञानेन च निःश्रेयसस्य प्राप्तिर्भवतीति प्रतिपादितं विद्यते। कस्य तत्त्वज्ञानेनापवर्गप्राप्तिर्भवतीति जिज्ञासायां प्रमाणप्रमेयादीनां षोडशपदार्थानां तत्त्वज्ञानेन आत्मतत्त्वसाक्षात्कारेण च शरीरादीनां एकविंशतिप्रभेदात्मकानां दुःखानां नाशे सति निःश्रेयसापराभिधस्यापवर्गस्य प्राप्तिर्भवतीति यथाशास्त्रं व्यवस्थापितम्।

अज्ञानमेव दुःखस्य कारणम्। यदा च प्रत्यक्षादीनां प्रमाणानां साहाय्येन आत्मादिद्वादशविधप्रमेयस्य ज्ञानं जायते, तदा अज्ञाननिवृत्तिर्भवति। अज्ञाननिवृत्तिश्च दुःखाभावः। दुःखाभाव एव मोक्ष इति नैयायिकानां मतम्। निःश्रेयसं दृष्यादृष्टभेदेन द्विविधम्। तत्र प्रमाणादिपदार्थतत्त्वज्ञानाद् दृष्टं निःश्रेयसं भवति। अदृष्टं पुनरात्मादेः प्रमेयस्य तत्त्वज्ञानाद् भवति। अर्थात् सदेहविदेहमोक्षभेदेन निःश्रेयसं द्विविधमित्यर्थः। श्रवण-मनन- निदिध्यासनेन चात्मतत्त्वसाक्षात्कारो भवति। तस्य कृते योगदर्शनेन निर्दिष्यानां यमनियमासनप्राणायामादीनामनुसरणं साहायकं भवतीति प्रतिपादितम्। तथा च दुःखात्यन्ताभाव एव मोक्ष इति नैयायिकानां मान्यता वरीवर्तीति।

शब्दकुञ्जी— *न्यायदर्शनम्, प्रमेयम्, आत्मा, प्रमाणादि, निरूपणम्।*

२. विषयपरिचयः

प्रेक्षणार्थाद् दृशधातोर्ल्युटि कृते दर्शनशब्दो निष्पद्यते। परन्तु प्रायो विद्वद्भिः करणे कदाचन भावे च दर्शनशब्दस्य व्युत्पत्तिः प्रतिपाद्यते। यथा— *दृश्यते यथार्थतया ज्ञायते पदार्थोऽनेनेति दर्शनम्, दर्शनमेव वा दर्शनम्* (भट्टाचार्यः, २०१८ : ३४४७)। पौरस्त्यवाङ्मये आस्तिक-नास्तिकभेदेन दर्शनशब्दो द्विधा विभज्यते। तत्र च न्याय-वैशेषिक-मीमांसा-वेदान्त-साङ्ख्य-योगदर्शनान्यास्तिकानि, तथैव बौद्ध-जैन-चार्वाकादीनि नास्तिकान्युच्यन्ते। तत्र महामुनिगौतमप्रणीतं न्यायदर्शनमप्यास्तिकदर्शनत्वेन विराजते दार्शनिकक्षेत्रे।

नि—ईयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति (भीमाचार्यः,१९७८:४४६) व्युत्पत्त्या न्यायपदं प्रतिपाद्यं भवति। दर्शनस्याऽस्य प्रमुखः सिद्धान्तः प्रमाणप्रमेयादीनां षोडशपदार्थानां सम्यग्ज्ञानेन मोक्षप्राप्तिरेव। प्रत्यक्षाऽऽगमाभ्यामीक्षितस्य अनु पश्चादीक्षणं मननमन्वीक्षा, तत्प्रतिपादकं शास्त्रमान्वीक्षिकी न्यायविद्येत्युच्यते। न्यायदर्शनस्य प्रथमसूत्र एवोक्तं वर्तते— *प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्यान्त-सिद्धान्ता-ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः* (न्यायसूत्रम्, १।१।१) इति । एतेषां षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसमिति नैयायिकानां प्रमुखः सिद्धान्तः। तत्र षोडशपदार्थेषु मध्ये द्वितीयः प्रमेयपदार्थः। प्रमेयाणि च द्वादशविधानि स्वीकृतानि सन्ति। अतश्च लेखेऽस्मिन् तान्येव प्रमेयाणि निरूपितानि सन्तीति।

३. प्रमेयपदार्थः

प्रमाणेन योऽर्थः प्रमीयते— ज्ञायते तत् प्रमेयम्। आत्मादेः खलु द्वादशविधप्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाऽधिगमः। यथोक्तं न्यायमञ्जर्याम्—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातं सम्यगसम्यग्वा यन्मोक्षाय भवाय च।
तत्प्रमेयमिहाभीष्टं न प्रमाणार्थमात्रकम्॥ (भट्टः, १९७१: २)

द्वादशविधं प्रमेयम्। यथोक्तं सूत्रे- *आत्मशरीरेन्द्रियाऽर्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफल-दुःखाऽपवर्गास्तु प्रमेयम्* (न्यायसूत्रम्, १।१।९)। एतच्च साक्षान्मोक्षोपयोगित्वाद् विशेषप्रमेयत्वेन ह्युपदिष्टम्।

३.१ आत्मा

ज्ञानाधिकरणमात्मा। स द्विविधो जीवात्मा परमात्मा च। ईश्वरः सर्वज्ञः परमात्मा एक एव। जीवात्मा तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च । तस्य भोगाऽधिष्ठानं शरीरम्, भोगसाधनानीन्द्रियाणि, भोक्तव्या इन्द्रियार्थाः, भोगो बुद्धिः, आन्तरं हि भोगकरणं मनः। आत्मा तु सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी। आत्मा प्रत्यक्षतो न गृह्यते, आप्तोपदेशाद् अनुमानाच्च गृह्यते। यथोक्तम् आत्मनः साधकानि लिङ्गानि चेत्थं सूत्रकारेण निर्दिष्टानि– *इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति* (पूर्ववत्, १।१।१०)। अर्थादिच्छादिभिरात्माऽनुमीयते। अत्रा-ऽऽत्मपदेन जीवात्मा गृह्यते। प्रज्ञानादिमत्त्वेन च परमात्मा प्रतिपाद्यते। नैयायिका ज्ञानादीनामात्मविशेषगुणत्वं मन्यन्ते। गुणगुणिनोः सम्बन्धः समवायः। तथा च ज्ञानसमवायिकारणमात्मा भवतीति न्यायसिद्धान्तः। तथा चाऽऽत्मा प्रत्यक्षगम्यः, सुखादिहेतुनाऽनुमेयः, शब्दप्रमाणगम्यश्च। एतादृश आत्मा नित्योऽनादिश्च।

३.२ शरीरम्

आत्मनो भोगायतनं शरीरम्। तच्च चेष्टेन्द्रियाऽर्थाऽऽश्रयः। यथोक्तं सूत्रे– *चेष्टेन्द्रियार्थाश्रयः शरीरम्* (पूर्ववत्, १।१।११)। हिताऽहितप्राप्तिपरिहारार्था क्रिया चेष्टा। तेषामाश्रयः शरीरम्। भाष्येऽपि– *यस्मिन्नायतन इन्द्रियाऽर्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स एषामाश्रयस्तच्छरीरम्* (वात्स्यायनः, १९९८:३२) इत्युक्तम्। न्यायमञ्जरीकारेण शरीरनिरूपण उक्तम्- *आत्मप्रयत्नाऽतिरिक्त-प्रेरकनिरपेक्षहिता-ऽहितोपादानपरित्यागोपाधिक-चेष्टाविशेषाऽऽश्रयः शरीरमित्यर्थः* (भट्टः, १९७१:४५)।

३.३ इन्द्रियम्

शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियम् इन्द्रियम्। आत्मनो भोगसाधनानीन्द्रियाणि। यथोक्तं भाष्ये– *स्वविषय-ग्रहणलक्षणानीन्द्रियाणीति* (वात्स्यायनः,१९९८:३३)। सूत्रेऽपि- *घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः* (न्यायसूत्रम्, १।१।१२)। षडिन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि इति।

३.४ अर्थः

आत्मनो भोगसाधनानीन्द्रियाणि भवन्ति चेद् भोक्तव्या इन्द्रियाऽर्थाः। अत्राऽर्थपदेन विषया गृह्यन्ते। ते च गन्धरसरूपस्पर्शशब्दाः। यथोक्तं सूत्रे– *गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः* (पूर्ववत्, १।१।१४)। तत्र गन्धः पृथिव्या गुणः, रसो जलस्य, स्पर्शो वायोः, शब्दस्तावद् आकाशस्य। अनया रीत्या पृथिवीजलवाय्वाकाशगता एते विषया तत्तदिन्द्रियग्राह्याः।

३.५ बुद्धिः

अर्थप्रकाशो बुद्धिः। सर्वव्यवहारहेतुर्ज्ञानं वा बुद्धिः। सा द्विविधा– स्मृतिरनुभवश्चेति। सूत्रकारेण बुद्धिः, उपलब्धिः, ज्ञानमिति पर्यायवाचित्वेन देशितम्। यथा– *बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्* (पूर्ववत्, १।१।१५)। यथोक्तं न्यायवार्तिकेऽपि– *एतैः पर्यायशब्दैर्योऽभिधीयते पदार्थः, सा बुद्धिरिति* (उद्योतकरः, १९९७:७५)। सा च समवायेनाऽऽत्मनिष्ठा भवति चेद् विषयतासम्बन्धेन घटादिनिष्ठा। विषयप्रकाशत्वेनाऽपि ज्ञानस्या-ऽस्तित्वं स्वीक्रियते। तत्र ज्ञायतेऽनेनेति करणव्युत्पत्त्या ज्ञानपदं ज्ञानसाधनार्थकं चेद् भावव्युत्पत्त्या ज्ञानमित्यर्थः। यद् वा तद् वा भवतु ज्ञानं विषयाणां प्रकाशकं भवति। अतो ज्ञानविषययोः सम्बन्धो विषयविषयिभावः।

 ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.६ मनः

आत्मन आन्तरं हि भोगकरणं मनः। सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च। अन्तरिन्द्रियं मनः। मनसो लिङ्गानि तु— *स्मृत्यनुमानाऽऽगमसंशयप्रतिभास्वप्नोहज्ञानानि अनन्तरसुखदुःखेच्छाद्वेषादिविषयग्राहीणि च ज्ञानानि मनसो लिङ्गानि* (भट्टः, १९७१:६८) इति। यथोक्तं सूत्रेऽपि— *युगपज्ज्ञानाऽनुत्पत्तिर्मनसो लिङ्गम्* (न्यायसूत्रम्, १।१।१६)। अत एव सर्वोपलब्धिसाधनमिन्द्रियं मनः।

३.७ प्रवृत्तिः

वाग्बुद्धिशरीरारम्भो व्यापारविशेष एव प्रवृत्तिः। सा च धर्माऽधर्ममयी। यागादिक्रियाणां प्रवृत्तिरूपत्वं मन्तव्यम्। सेयं प्रवृत्तिः कुत्सितस्याऽभिपूजितस्य च जन्मनः कारणम्। सा द्विविधा पुण्यात्मिका पापात्मिका च। तत्र पापात्मिका— वाचा चतुर्विधा, मनसा त्रिविधा, शरीरेण त्रिविधैवेति सङ्कलय्य दशविधा। पुण्यात्मिका च दशविधैव भवति। यथोक्तं प्रवृत्तेर्लक्षणं सूत्रे— *प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः* (न्यायसूत्रम्, १।१।१७) इति।

३.८ दोषः

रागद्वेषमोहानां प्रवर्तकत्वेन दोषा गृह्यन्ते। अतः प्रवर्तनालक्षणत्वं दोषत्वमिति तल्लक्षणमुक्तम्। धर्माऽधर्मविहितो हि शरीरादिदुःखाऽधिष्ठानसम्बन्धः, तद्बीजस्य च कर्मणः कारणरूपा दोषाः कर्माणि पुमांसं प्रवर्तयन्तीति प्रवर्तनालक्षणा दोषाः। यथोक्तं सूत्रे— *प्रवर्तनालक्षणा दोषाः* (न्यायसूत्रम्, १।१।१८)। भाष्यकारेणाऽपि— *मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषो रागद्वेषाधिकाराच्चाऽसत्येर्ष्यामायालोभादयो दोषा भवन्ति* (वात्स्यायनः, १९९८:१४) इत्युक्तं वर्तते।

दोषाणां त्रयो राशयो भवन्ति— रागो द्वेषो मोह इति, तत्राऽनुकूलेष्वर्थेष्वभिलाषलक्षणो रागः, प्रतिकूलेष्वसलक्षणो द्वेषः, वस्तुपरमार्थाऽपरिच्छेदलक्षणो मिथ्याऽवसायो मोह इति।

३.९ प्रेत्यभावः

उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। स चात्मनः पूर्वदेहनिवृत्तिः, अपूर्वदेहसङ्घातलाभः। मरणमात्मनो भोगायतनदेहेन्द्रियादिवियोगश्चेज् जन्म तु तेषां सम्बन्धः, ते च विपच्यमान-कर्माऽऽशयाऽनुसारेण देहेन्द्रियादित्यागोपादान एव मरणजन्मनी क्रियाभ्यावृत्त्या भवन्ती इति प्रेत्यभाव इत्युच्यते (भट्टः, १९७१:७२)। यथोक्तं सूत्रे— *पुनरुत्पत्तिः प्रेत्यभावः* (न्यायसूत्रम्, १।१।१९), तथा च वार्तिकेऽपि- *पूर्वोपात्त-शरीरादिपरित्यागादन्यशरीराद्युपसङ्क्रान्तिः प्रेत्यभाव इति* (उद्योतकरः, १९९७:७९)। तत्स्वरूपं स्फुटीकृतम्।

३.१० फलम्

फलं नाम भोगः, सुखदुःखाऽन्यतरसाक्षात्कारो वा। प्रवृत्तिदोषाभ्यां जनितोऽर्थः फलमित्युच्यते। यथोक्तं सूत्रे— *प्रवृत्तिदोषजनितोऽर्थः फलम्* (न्यायसूत्रम्, १।१।२०)। तथोक्तं वार्तिकेऽपि— *शरीरादिजन्यं सर्वं फलम्, धर्माऽधर्मपूर्वकत्वात्* (उद्योतकरः, १९९७:७९) इति।

३.११ दुःखम्

सर्वेषां प्रतिकूलतया वेदनीयं दुःखम्। बाधना— पीडनम्, सन्तापनं सा लक्षणमस्येति बाधनालक्षणं दुःखम्। यथोक्तं सूत्रे— *बाधनालक्षणं दुःखम्* (न्यायसूत्रम्, १।१।२१)। तथा च वार्तिकेऽपि— *एतदेव शरीरादि बाधनानुषङ्गाद् दुःखमित्युच्यते* (उद्योतकरः, १९९७:८०)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.१२ अपवर्गः

तेन दुःखेन जन्मनाऽत्यन्तवियोगोऽपवर्गः। स चैकविंशतिप्रभेदभिन्नस्य दुःखस्याऽऽत्यन्तिकी निवृत्तिः। एकविंशतिभेदास्तु शरीरं, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखञ्चेति गौणमुख्यभेदात्। यथोक्तं सूत्रे– *तदत्यन्तविमोक्षोऽपवर्गः* (न्यायसूत्रम्, १।१।२२)। तथा चोक्तं वार्तिकेऽपि – *तेन शरीरादिना दुःखाऽन्तेनाऽऽत्यन्तिको वियोग इति* (उद्योतकरः, १९९७:८१)।

तत्प्राप्तिप्रक्रियाश्चेत्थम्– *दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः* (न्याय-सूत्रम्, १।१।२)। अस्य कथनस्याऽभिप्रायोऽस्ति यद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानेषु क्रमेणोत्तरोत्तरविनाशे सति पूर्वस्य पूर्वस्य नाशो जायते, तदनन्तरमपवर्गः प्राप्यत इति। सूत्राऽनुसारेण दुःखस्य कारणं जन्म, जन्मनः कारणं प्रवृत्तिः, प्रवृत्तेः कारणं दोषः, दोषस्य कारणं मिथ्याज्ञानमिति। कारणनाशे सति कार्यनाश इति नियमाऽनुसारेण नष्टे च मिथ्याज्ञाने दोषनाशः, नष्टे च दोषे प्रवृत्तेर्नाशः, प्रवृत्तौ नष्टायां सत्यां जन्मनाशः, जन्मनि नष्टे सति दुःखनाशो भवति। अपवर्गस्य प्राप्तिं प्रति मुख्यतया बाधकरूपेण दुःखमेव प्रतिभाति। न्यायदर्शने दुःखस्य एकविंशतिप्रभेदा वर्णिताः। ते च– षडिन्द्रियाणि, षड्विषयाः, षड्ज्ञानानि, सुखम्, दुःखम्, शरीरञ्चेति (उद्योतकरः, १९९७:)।

सोऽयमेकविंशतिप्रभेदभिन्नदुःखहानिर्मोक्षः। स एवाऽपवर्ग इत्युच्यते। इति नैयायिकानां प्रमेयनिरूपणम्।

४. उपसंहारः

न्यायदर्शने अविद्यानाशेन तत्त्वज्ञानेन च निःश्रेयसस्य प्राप्तिर्भवतीति प्रतिपादितं विद्यते। कस्य तत्त्वज्ञानेनाऽपवर्गप्राप्तिर्भवतीति जिज्ञासायां प्रमाणप्रमेयादीनां षोडशपदार्थानां तत्त्वज्ञानेन आत्मतत्त्वसाक्षात्कारेण च शरीरादीनां एकविंशतिप्रभेदात्मकानां दुःखानां नाशे सति निःश्रेयसाऽपराभिधस्याऽपवर्गस्य प्राप्तिर्भवतीति यथाशास्त्रं व्यवस्थापितम्।

अज्ञानमेव दुःखस्य कारणम्। यदा च प्रत्यक्षादीनां प्रमाणानां साहाय्येनाऽऽत्मादिद्वादशविधप्रमेयस्य ज्ञानं जायते, तदाऽज्ञाननिवृत्तिर्भवति। अज्ञाननिवृत्तिश्च दुःखाऽभावः। दुःखाभाव एव मोक्ष इति नैयायिकानां मतम्। निःश्रेयसं दृष्टाऽदृष्टभेदेन द्विविधम्। तत्र प्रमाणादिपदार्थतत्त्वज्ञानाद् दृष्टं निःश्रेयसं भवति। अदृष्टं पुनरात्मादेः प्रमेयस्य तत्त्वज्ञानाद् भवति। अर्थात् सदेहविदेहमोक्षभेदेन निःश्रेयसं द्विविधमित्यर्थः। श्रवण–मनन–निदिध्यासनैश्चाऽऽत्मतत्त्वसाक्षात्कारो भवति। तस्य कृते योगदर्शनेन निर्दिष्टानां यमनियमाऽऽसनप्राणायामादीना–मनुसरणं साहाय्यं भवतीति प्रतिपादितम्। तथा च दुःखाऽत्यन्ताऽभाव एव मोक्ष इति नैयायिकानां मान्यता वरीवर्तीति निष्कर्षः।

सन्दर्भग्रन्थसूची

उद्योतकरः, भारद्वाजः (सन् १९९७), *न्यायभाष्यवार्तिकम्*, (अनन्तलालठक्कुरेण संस्कृतम्), नवदेहली : भारतीयदार्शनिकानुसन्धानपरिषद्।

गौतमः (वि.सं. २०२४), *न्यायदर्शनम्*, भाष्य–वार्तिक–तात्पर्यटीका–परिशुद्धिरूपचतुर्ग्रन्थिकासमलङ्कृतम्, प्रथमो भागः, (अनन्तलालठक्कुरेण संस्कृतम्), वैशालि : साधारणसम्पादकेन मिथिलाविद्यापीठप्रधानेन प्रकाशितम्।

भट्टः, जयन्तः (ई. १९७१), *न्यायमञ्जरी–२*, (विवरणकारः सूर्यनारायणशुक्लः), वाराणसी : चौखम्बासंस्कृतसीरिज।

भट्टाचार्यः, श्रीतारानाथतर्कवास्पतिः(वि. सं. २०१८), *वाचस्पत्यम्*, वाराणसी : चौखम्बासंस्कृतसीरिज।

भीमाचार्यः, (ई. १९७८), *न्यायकोशः*, अभ्यङ्करोपाह्व–वासुदेवशास्त्रिणा समुपबृंहितः परिशोधितश्च, पुना : प्राच्यविद्यासंशोधनमन्दिरम्।

वात्स्यायनः, (ई. १९९८), *न्यायसूत्रम्*, वात्स्यायनभाष्यसहितम् सुदर्शनाचार्यशास्त्रिविरचितया प्रसन्नपदाख्यटीकया संवलितम्, अभिनव–संस्करणम्, (सम्पादकः द्वारिकादासशास्त्री), वाराणसी : बौद्धभारतीप्रकाशनम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मीमांसादर्शनाधारे कर्ममोक्षयोः अनुशीलनम्

दामोदरः रेग्मी

धर्मशास्त्राचार्यः

लेखसारः

दृश्यतेऽनेनेत्यर्थे दृश्धातोः करणे ल्युट् प्रत्यये कृते सति दर्शनशब्दो निष्पद्यते। दृश्यते यथार्थतत्त्वमनेनेति व्युत्पत्त्या दर्शनम् इति पदं सम्पद्यते। आस्तिकनास्तिकाभ्यां दर्शनं द्विविधमिति परिगण्यते। षडास्तिकदर्शनानि सन्ति। तेषु मध्ये मीमांसादर्शनमन्यतममस्ति। मीमांसादर्शनं वैदिकसत्यसनातनधर्मस्य मूलग्रन्थवेदेन सह सम्बद्धमस्ति। वेदस्याऽपरं नामाऽस्ति श्रुतिः, तेन कारणेन एतच् श्रौतदर्शनमप्युच्यते।

अनेनैव प्रकारेण मीमांसादर्शनेन वेदस्य प्रामाण्यं प्रतिपाद्य वेदविहितकर्मणा सह सम्बन्धितानां विभिन्नसिद्धान्तानां विश्लेषणं कृतम्। मोक्षार्थिभिर्ज्ञानिभिश्च यथाशक्ति विहितकर्माणि कर्तव्यानीत्येव सिद्धान्तः स्थापितो दर्शनेनाऽनेन। एतं वैदिककर्मसिद्धान्तमनुसरता भगवता कृष्णेनाऽपि भगवद्गीतायाम्– न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि। सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् इत्याद्युक्तम्। लेखेऽस्मिन् षड्दर्शनेषु मीमांसादर्शनस्य स्थाननिर्धारणं तथा मीमांसादर्शनदृष्ट्या कर्ममोक्षयोर्विश्लेषणं विहितमस्ति।

प्रमुखाः शब्दाः *:– मोक्षः, कर्म, दर्शनम्, मीमांसा, यज्ञः।*

विषयप्रवेशः

मीमांसादर्शनम् वैदिकसत्यसनातनधर्मस्य मूलग्रन्थवेदेन सह सम्बन्धितमस्ति। मीमांसादर्शनस्य वैदिकसत्यसनातनधर्माऽवलम्बिनां कृतेऽद्वितीयस्थानमस्ति। वैदिककर्माणि विविधप्रकारकाणि सन्ति। तेषु कर्मसु मुख्यानि सन्ति– नित्यं, नैमित्तिकं, काम्यं च। वेदविहितकर्मसु नित्यकर्माणि प्रमुखानि सन्ति। वेदेष्वग्निहोत्रं दर्शपूर्णमास इत्यादीनि कर्माण्यधिकारसमर्थैर्व्यक्तिभिः कर्तव्यानि नित्यकर्माणि मन्यन्ते। विषयेऽस्मिन् जैमिनिमुनिः– ब्राह्मणो जन्यताम् ऋषिऋणं, देवऋणं, पितृऋणं गृह्यते इति वेदवाक्यमाश्रित्य शास्त्रीयाधिकारयुक्तेन वेदाध्ययनं करणीयं, शास्त्रविहिताचाराणां पालनं च गृहस्थेन पर्याप्तधनयुक्तेन गृह्याग्नेराधानं कृत्वा तत्र कर्त्तव्यानि कर्माणि गृह्यसूत्रानुसारं पूर्णानि स्युरिति नियमोऽस्तीति वदति।

मोक्षविषये विभिन्नदर्शनैश्चिन्तितम्। मीमांसादर्शनसूत्रेषु मोक्षस्य विषयो नैव प्राप्यते, किन्तु वार्त्तिकग्रन्थेऽस्मिन् विषये विचारो विमर्शश्च कृतो विद्यते। वार्त्तिककारः कुमारिलभट्टः श्लोकवार्त्तिके सम्बन्धाऽऽक्षेपपरिहारवादप्रकरणे मोक्षविषयं विशेषतया प्रतिपादितवान्। मीमांसादर्शने जीवात्मा शरीरमिन्द्रियमन्तस्करणं च प्रपञ्चसङ्क्रमणाद् विलयिताऽऽत्मस्वरूपे स्थितो मोक्षं लभते इति मन्यते। अतो लेखेऽस्मिन् षड्दर्शनेषु मीमांसादर्शनस्य कीदृशं स्थानमस्ति? तथा मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपं च किम्? इत्यत्र चर्चा वर्णिताऽस्ति।

समस्याकथनम्

प्रस्तुतस्यास्य लेखस्य निम्नलिखिते समस्ये स्तः–

क) षड्दर्शनेषु मीमांसादर्शनस्य कीदृशं स्थानमस्ति?

ख) मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपं कीदृशमस्ति?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उद्देश्यम्

प्रस्तुतस्य लेखस्य कृते समस्याकथन उत्थापितयोरेव समस्ययोः समाधानं उद्देश्यरूपेण विद्यते। यथाः–

क) षड्दर्शनेषु मीमांसादर्शनस्य स्थाननिर्धारणम्,

ख) मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपस्य विश्लेषणम्,

अध्ययनविधिः सीमाङ्कनं च

प्रस्तुतेऽस्मिन् लेखे वर्णनात्मकविधेर्विश्लेषणात्मकविधेश्चाऽवलम्बनं कृतं विद्यते। पुस्तकालयात् प्राथमिकीं द्वितीयकीञ्च सामग्रीं सङ्कलय्य मीमांसादर्शनस्य तथा मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपाणामेव चर्चा कृता विद्यते। मीमांसादर्शनस्य तथा मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपाणां चर्चैव अस्य लेखस्य सीमाऽपि वर्तते नाऽन्या।

विषयविश्लेषणम्

मीमांसादर्शनं वैदिकवर्णाश्रमधर्मस्याऽऽधारग्रन्थभूतेन वेदेन सह सम्बन्धितोऽस्ति। वेदस्य अपरमभिधानं श्रुति इति वर्तते, तस्मात् कारणाद् दर्शनमिदं श्रौतदर्शनम् इत्यप्युच्यते। वेदस्य षडङ्गानि सन्ति। मीमांसाशास्त्रे वेदानां वेदाङ्गानां च प्राकरणिकार्थस्य निर्णयायाऽऽधाराणि विवेचितानि सन्ति। मीमांसाशास्त्रे विशेषतो वैदिकयज्ञसम्बन्धिषु सन्दिग्धवेदवाक्येषु विचारो विद्यते। तथा च न्यूनसन्देहग्रस्तानां वाक्यानां विशेषतात्त्विकार्थः कथं निश्चीयते? इत्यत्र सिद्धान्ताः स्थापिताः सन्ति। यदि मन्त्रब्राह्मणग्रन्थयोर्विचारः परस्परं विरुध्यते चेत्, तर्हि मन्त्रानुसारं अनुष्ठानं कर्तव्यम् इति मीमांसा कथयति इत्यत्रैवाऽस्याऽस्तित्वमपि वर्तते। लेखेऽस्मिन् मीमांसादर्शनस्यैवाऽनुशीलनमस्ति। मीमांसादर्शनस्य विश्लेषणं तथा च मीमांसादर्शनदृष्ट्या कर्ममोक्षयोः स्वरूपाणां यथार्थपरकं निष्कर्षप्रतिपादनमस्ति।

मीमांसादर्शनस्य स्थानम्

दृश्यतेऽनेनेत्यर्थे दृश् धातोः करणे ल्युट् प्रत्यये कृते सति दर्शनशब्दो निष्पद्यते। दृश्यते यथार्थतत्त्वमनेनेति दर्शनम्, दर्शनं च तच्छास्त्रं दर्शनशास्त्रम्। आस्तिकनास्तिकभेदेन दर्शने द्विविधे स्तः। आस्तिकदर्शनानि षट् सन्ति। तेषां मध्ये मीमांसादर्शनमप्येकं विद्यते। मीमांसादर्शनं वैदिकसत्यसनातनधर्मस्य मूलग्रन्थवेदेन सह सम्बन्धितमस्ति। वेदस्याऽपरं नाम श्रुतिरिति वर्तते, तस्माच् श्रतिसम्बद्धादिदं श्रौतदर्शनमप्युच्यते। (अभ्यङ्करः, सन् १९२४, सर्वदर्शनसङ्ग्रहस्य उपोद्घातः, पृ.७२–७४)।

वेदस्य षडङ्गानि सन्ति। मीमांसाशास्त्रे वेदानां वेदाङ्गानां च प्राकरणिकार्थस्य निर्णयायाऽऽधाराणि विवेचितानि सन्ति। वैदिकसनातनधर्मस्यानुयायिना नित्यस्वाध्याये वेदस्य वेदानां वाऽध्ययनं करणीयमिति शास्त्रीयविधिरस्ति। नित्यस्वाध्यायाध्ययने ऋमशः पठनीयेषु शास्त्रेषु मध्ये वेदमन्त्रसङ्ग्रहः, ब्राह्मणग्रन्थः, कल्पसूत्रम्, शिक्षाशास्त्रम्, व्याकरणम्, निरुक्तम्, छन्दस्सूत्रम्, ज्यौतिषम्, पूर्वमीमांसा, उत्तरमीमांसा च गण्यते (लौगाक्षिः, सन्.२०१३, पृ.२७५–२७६, २९९)।

वेदाध्ययनाधिकारसम्पन्नो व्यक्तिर्मीमांसाशास्त्रस्याऽप्यध्ययनं विदधाति यस्माज्ज्ञायते यद् वेदाऽर्थस्य निश्चयं कर्तुं मीमांसाशास्त्रस्य कीदृश्युपयोगिता महत्त्वं चास्तीति । वर्तमानकाले मीमांसादर्शनस्य जैमिनिमुनिना रचितं षोडशाऽध्यायपर्यन्तं धर्ममीमांसासूत्रमुपलब्धं विद्यते।

मीमांसाशास्त्रस्योपयोगित्वं महत्त्वं च कथमस्तीति वेदाध्ययनायाऽधिकृतजनैर्मीमांसाशास्त्रस्याऽध्ययनं करणीयमित्यास्माज्ज्ञायते। वेदार्थस्य निश्चयनं कर्तुं मीमांसाशास्त्रस्य प्रयोजनमस्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मीमांसादर्शनस्य शबरस्वामिद्वारा रचितं भाष्यमपि दृश्यते। शबरस्वामिनो भाष्यं द्वादशाध्यायपर्यन्तमेव प्राप्यते। अवशिष्टभागेषु मध्ये बहुषु भागेषु देवस्वामिकृतं भाष्यं कतिपयभागेषु च भवदासकृतं भाष्यं प्राप्यते। वैदिकपरम्पराया महच्चिन्तकस्य कुमारिलभट्टस्य श्लोकवार्त्तिकम् (जैमिनीयधर्ममीमांसासूत्रस्य शाबरभाष्यस्य प्रथमाऽध्यायस्य प्रथमपण्यस्य श्लोकात्मकव्याख्या), तन्त्रवार्त्तिकम् (प्रथमाऽध्यायस्य द्वितीयपण्यात् तृतीयाऽध्यायं यावद् गद्यपद्यात्मकव्याख्या) टुप्टीका (चतुर्थाऽध्यायाद् द्वादशाऽध्यायं यावद् सङ्क्षिप्तव्याख्या) च सम्मील्य मीमांसादर्शनस्य वार्त्तिकग्रन्थो भवति। 'गुरुः' इति नाम्ना प्रसिद्धस्य प्रभाकरमिश्रस्य बृहतीनामिकया शाबरभाष्यव्याख्यया शास्त्रस्यास्य विशेषो गुरु-सम्प्रदायः स्थाप्यते।

मीमांसायां तृतीयमतस्याप्यस्तित्वमस्ति, तस्मिन् विषये *मुरारेस्तृतीयः पन्था* इति उक्तिः प्रसिद्धा वर्तते। मुरारिमतस्थापकस्य मुरारिमिश्रस्य बहवो ग्रन्था न प्राप्ताः, किन्तु 'त्रिपादीनीतिनयनम्' 'एकादशाद्यधिकरणम्' चेति नामकौ ग्रन्थौ प्राप्तौ प्रकाशितौ च स्तः। मण्डनमिश्रस्य मीमांसानुक्रमणिका विधिविवेकश्च, शालिकनाथमिश्रस्य ऋजुविमला (बृहत्युपरि टीका) प्रकरणपञ्चिका च, पार्थसारथिमिश्रस्य शास्त्रदीपिका, न्यायरत्नमाला, न्यायरत्नाकरः (श्लोकवार्त्तिकटीका) तन्त्ररत्नः(टुप्टीकाव्याख्या) च, भवनाथ(भवदेव)मिश्रस्य नयविवेकः, भट्टसोमेश्वरस्य न्यायसुधा (तन्त्रवार्त्तिकस्य टीका), नन्दीश्वरस्य प्रभाकरविजयः, चिदानन्द-पण्डितस्य नीतितत्त्वाऽऽविर्भावः, माधवाचार्यस्य जैमिनीयन्यायमाला, नारायणभट्ट-नारायणपण्डितोभयस्य मानमेयोदयः, लौगाक्षिभास्करस्य अर्थसङ्ग्रहः, विश्वेश्वरभट्टस्य (गागाभट्टस्य) भाट्टचिन्तामणिः, आपदेवस्य मीमांसा-न्यायप्रकाशः, खण्डदेवस्य भाट्टकौस्तुभः भाट्टदीपिका भाट्टतन्त्ररहस्यं च, वासुदेवदीक्षितस्य अध्वरमीमांसा-कुतूहलवृत्तिः (जैमिनीयधर्ममीमांसासूत्रस्य वृत्तिः) इत्यादिभिर्ग्रन्थैर्मीमांसाशास्त्रस्य सिद्धान्तानां व्याख्या विहिता वर्तते।

मीमांसाशास्त्रे विशेषतो वैदिकयज्ञसम्बन्धिषु सन्दिग्धवेदवाक्येषु विचारो विद्यते। तथा च अल्पसन्देहग्रस्तानां वाक्यानां विशेषतात्त्विकार्थः कथं निश्चेतव्यः? इत्यत्र सिद्धान्ताः स्थापिताः सन्ति। एतादृशस्य सार्वभौमसिद्धान्तस्य सुव्यवस्थितं प्रतिपादनं सर्वप्रथमं मीमांसाशास्त्र एव कृतमिति विदुषां मतमुपलभ्यते। धर्मशास्त्रेषु निबन्धग्रन्थेषु स्मार्तपौराणिकधर्मे च मीमांसाशास्त्रस्यैतेषां सिद्धान्ताना न्यायानां चोपयोगित्वं दृश्यते। सन्देहग्रस्तवेदवाक्यनां निर्धारणाय विभिन्नानि सिद्धान्तानि मीमांसाशास्त्रे स्थापितानि सन्ति। प्रत्येकाधिकरणे एकः सिद्धान्तो विशदीकृतोऽस्ति। प्रत्येकाधिकरणे विषयवस्तु, सन्देहः, पूर्वपक्षस्य प्रस्तुतिः, तस्य निराकरणं च प्रदर्श्य सिद्धान्तपक्षस्य स्थापनं भवति। एतेन प्रकारेणाऽधिकरणस्य संरचनायां विषयवस्तुन एव विशेषतया विचारालोकनं मीमांसाशास्त्रे दृश्यते। एतान्यधिकरणानि मीमांसाशास्त्रस्य द्वादशाध्यायेषु नवशताधिकानि सन्ति। द्वादशाध्यायानन्तरस्य सङ्कर्षकाण्डस्य चतुर्ण्णामध्यायानामधिकरणस्य सङ्ख्याया योजने द्वादशशताधिकानि अधिकरणानि भवन्ति। मीमांसाशास्त्रस्य सिद्धान्ता वैदिक-सनातन-वर्णाश्रमधर्मस्याऽथवा हिन्दुधर्मस्य सिद्धान्तानां पुष्ट्यर्थं स्थापनाय चाऽऽवश्यकाः सन्ति। बहवः सिद्धान्ताः भाषाशास्त्रस्य दृष्ट्या महत्त्वपूर्णाः सन्ति। तथा च कतिपयसिद्धान्ताः कर्मकाण्डस्य दृष्ट्या चोपयोगिनः सन्ति। मीमांसासिद्धानां ज्ञानं वेद-धर्मशास्त्र-कर्मकाण्ड-ज्ञानकाण्ड-भाषाशास्त्रा-ऽऽधुनिकविधिशास्त्र(कानून)-संस्कृत्यादिकेष्वन्येष्वपि विविधविषयेष्वा-वश्यकमुपयोगि चाऽस्ति।

सनातनधर्मावलम्बिनो वैदिका धर्मे मोक्षे च प्रथमं प्रमाणं वेदं मन्यन्ते। वेदस्मृतिपुराणसदाचारात्मकेषु प्रमाणेषु वेद एव धर्मे मूलं प्रमाणमस्ति, यतो हि वेदेषु मानवस्य अज्ञानम्, अल्पज्ञानम्, कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम् इत्यादिदोषाणां कश्चिदपि प्रभावो नास्ति, सुदीर्घकालतः स्थापितो विश्वासश्चाऽत्राऽस्ति। मीमांसाशास्त्रे जैमिनिः, शबरस्वामी, कुमारिलभट्ट इत्यादिभिराचार्यैः श्रुतेः स्वतःप्रमाण्यविषये विस्तृतेन विवेचनं कृतमस्ति। अस्माकं नेत्राणि, कर्णा इत्यादिकानामिन्द्रियाणामनुमानादीनां च साधारणप्रमाणाद्, इदं प्रत्यक्षाऽनुमानप्रमाणद्वयं केवलं लघुकालिकस्य लघुदैशिकस्य च स्थूलविषयाणां ज्ञानं कर्तुं शक्नोति। वेदस्तु धर्मस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मोक्षस्य च सम्बन्धे इन्द्रियाणां गत्यभावाद् इन्द्रियातीतसूक्ष्मसन्देशानां ज्ञानेन धर्ममोक्षयोर्याथार्थ्यज्ञानाय साहाय्यं विदधाति (शबरः,२०३४, पृ.१०)। मीमांसाशास्त्रद्वारा वेदस्याऽपौरुषेयत्वं प्रमाणितं, धर्मे वेद एव मूलान्तिमं प्रमाणमिति च सिद्धान्तः स्थापितः। उक्तसिद्धान्तानुसारं वेदस्य विधिवाक्येन विहिता अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्य-निरूढपशुबन्धाग्निष्टोमादयो यज्ञा यथाधिकारं यथाशक्ति चानुष्ठेया इति सिद्ध्यति।

वेदस्य विधिः, अर्थवाद इत्यादिभागाः सन्ति। सर्वे स्व-स्वकर्माणि कुर्वन्त्येव। विधिनाऽज्ञातं किञ्चिदपि ज्ञाप्यते। विधेरपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिरित्यादयो भेदाः सन्ति। अर्थवादस्तु लक्षणाद्वारा विहितानां वस्तूनां प्रशंसनं निषिद्धानां च निन्दां विधाय विहितकर्म प्रति प्रवृत्तिं निषिद्धकर्म प्रति च निवृत्तिं जनयति। एतेषामर्थवादानां बहवः प्रकाराः सन्ति। तेषामर्थवादानां बहुकार्यकरणे वेदार्थस्य निर्धारणे च महत्त्वपूर्णा भूमिका वर्तत इति मीमांसाशास्त्रे विभिन्नाधिकरणेषु वर्णितमस्ति। वेदस्मृतिपुराणेषु विहितानां वस्तूनां स्तुतिर्निषिद्धानां वस्तूनां निन्दारूपेण पृथक् पृथक् प्रकारेण अर्थवादा आगतानि। अतोऽर्थवादस्य विषये मीमांसाशास्त्रस्य सिद्धान्तानां ज्ञानमावश्यकं वर्तते। विना मीमांसाज्ञानं वेदस्मृतिपुराणानां यथार्थस्य प्रबोधनं नैव जायते।

मीमांसाशास्त्रस्य प्रथमाऽध्यायस्य द्वितीयपण्ये वैदिककर्मणि प्रयुज्यमानानां मन्त्राणां सार्थकत्वं निरर्थकत्वं वेति प्रश्नमुपस्थाप्य समाधानमकार्षीत्। मन्त्रार्थं निर्दिश्येत्यतो विनियोगं कर्तुं न शक्यते, किन्तु ब्राह्मणग्रन्थ एतेन मन्त्रेणैतत् कुरुत इति विनियोगः प्रदर्शितः, तत्रैव मन्त्रस्यार्थो न विद्यते इत्यस्याऽपि निवारणं विहितम्। सिद्धान्तीनां वचोऽस्ति- लोके व्यवहाराद् यथा वाक्येन अर्थो बुध्यते, तथैव मन्त्रादपि अर्थोऽगम्यते। लोकस्य वेदस्य च वाक्यार्थयोः प्रक्रियायां पृथक्त्वं नास्ति। ब्राह्मणग्रन्थे किञ्चिदाधिक्येन कथितस्य वचनस्याऽर्थः पुनः स्पष्टीक्रियते। प्रैष इति निर्देशकस्य मन्त्रस्य पाठः संस्कारेण सहाऽस्ति। कतिपयमन्त्रार्थानामनवबोधनं प्रमादः, आलस्यम् इत्यादिकारणवशाद् भवति न त्वर्थस्यैवाऽभावात् । ब्राह्मणग्रन्थोऽपि मन्त्रस्य व्याख्या कर्तव्या, ज्ञातव्या चेति वदति, यत्रतत्र मन्त्रार्थं प्रदर्शयतीति स्पष्टमस्ति। एतेषां सर्वेषां वाक्यानां माध्यमेन मन्त्राणां सार्थकता सिध्यति। (शबरः, २०३४, पृ.१८१-२११)। अनेन प्रकारेण वैदिककर्मकाण्डे मूलतो मन्त्रस्याऽर्थेन सहैव उपयोगः कर्तव्यः। उपयोगकर्त्रा च मन्त्रार्थस्य ज्ञानेन भवितव्यम्- इति सिद्धान्तः स्पष्टरूपेणाऽस्ति। मन्त्रब्राह्मणयोर्विचारो यदि सम्यक् न दृश्यते, तदा मन्त्रानुसारमनुष्ठानं कर्तव्यमस्तीति मीमांसादर्शनस्य सिद्धान्तोऽस्ति (जैमिनीय-धर्ममीमांसासूत्रम् ५।१।१६, द्रष्टव्यम्- कात्यायनश्रौतसूत्रम् १।५।७)। वेदेषु उद्भिद्, चित्री, अग्निहोत्रम् इत्यादिशब्दा यागानां नाम वर्तते। तदर्थः प्रमाणाधिकारेण प्रमाणित इति निर्णयमेतद् मीमांसादर्शनस्य प्रथमाऽध्यायस्य चतुर्थपण्ये कृतम्। मीमांसादर्शनस्य प्रथमाऽध्याये वेदस्य प्रामाण्यं विचार्य, द्वितीयाध्यायात् क्रमशः कर्मभेदस्य, शेषशेषित्वस्य, प्रयुक्तिः, क्रमः, अधिकारः, सामान्याऽतिदेशः, विशेषाऽतिदेशः, ऊहः, बाधः, तन्त्रः च प्रसंहत्य आयुष्मद्-यज्ञस्य विविधदृष्ट्या प्रतिपादनं विहितमस्ति।

कर्मस्वरूपस्य विश्लेषणम्

वेदविहितकर्मविषये विचारयित्वा कर्मणां च फलस्य सम्बन्धेऽपि विचार आवश्यकोऽस्ति। अतो मीमांसादर्शनस्य द्वितीयाऽध्यायस्य प्रथमपादस्य द्वितीयाऽधिकरणेऽपूर्वविषये विचारितमस्ति। वेदेषु विविधानां कर्मणामनुष्ठानं कर्तव्यमिति निर्देशोऽस्ति। वेदेषु *दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत* (तैत्तिरीयसंहिता २।२।५) इति यः स्वर्गस्य कामनां करोति, तस्य कृते दर्शपूर्णमासस्याऽनुष्ठानं विधीयते। अत्र 'दर्शपूर्णमासाभ्याम्' इत्यस्मिन् तृतीया विभक्तिर्दर्शपूर्णमासयागः (यज्ञः) स्वर्गस्य साधनम् इति प्रदर्शयति। एष सम्बन्धः यः फलं प्रापयति तस्मिन् यज्ञे स्थितोऽस्ति समाप्ते वा यज्ञे स जन्यते, तद्द्वारा च फलमुपलभ्यत इति मन्तुमावश्यकमस्ति। एषां मध्ये प्रथमः पक्षो न युक्तः, यतो हि यज्ञस्य क्षणिकत्वात्, विषयोऽयं स्पष्ट एवाऽस्ति। द्वितीयः पक्षोऽपि न मन्यते, नष्टेन यथाऽनेन यज्ञेन किञ्चिदन्यज्जायत इति दृष्टं नास्ति। अतो यागस्य प्रयोजनमेव सर्वत्राऽपूर्वात् कर्मफलप्राप्तिरिति मन्यते। अपूर्वस्य फलापूर्वः, समुदायापूर्वः, उत्पत्त्यपूर्वः, अङ्गापूर्व इत्यादिभेदोऽस्ति (माधवाचार्यः, सन् १८८३,

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जैमिनीयन्यायमाला, २।१।२, ७-८ श्लोकाः, पृ.७६-७८)। गुरुमतेन प्राप्तव्यस्य काम्यफलस्य साधनमपूर्वो वैदिक-लिङ्-लोटित्यादिशब्दानां वाच्य इति स्वीक्रिते (मिश्रः, २०१८, पृ.४४८)। तथैव मीमांसाशास्त्रं कर्माऽपूर्वद्वारा फलं ददातीति सिद्धान्तं स्थापयद् वैदिककर्ममार्गस्य व्याख्यां करोति।

वैदिककर्माणि विविधप्रकारकाणि सन्ति। तेषु मुख्यानि- नित्य-नैमित्तिक-काम्यानि। वेदविहितकर्मसु नित्यकर्माणि प्रमुखानीति स्वीक्रियन्ते। वेदेषु अग्निहोत्रम्, दर्शपूर्णमास इत्यादीनि कर्माण्यधिकृतजनैरेव कर्तव्यानि नित्यकर्माणि मन्यन्ते। विषयेऽस्मिन् जैमिनिमुनिः *ब्राह्मणो जन्यताम् ऋषिऋणं देवऋणं पितृऋणं गृह्यते* इति वेदवाक्यस्य (तैत्तिरीयसंहिता ६।३।१०।५, मा. शतपथब्राह्मणम् १।७।२।१-५) आधारत एषां वैदिकयागस्य नित्यताम् प्रमाणयति (ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात्- जैमिनीय धर्ममीमांसासूत्रम् ६।२।३३)। यानि कर्माणि गृहदाहादिनिमित्तमागच्छन्ति तानि कर्माणि नैमित्तिककर्माणि सन्ति। काम्यकर्माणि विविधफलप्रार्थनायै कार्याणि। वेदेन निषेधितानि कर्माणि निषिद्धानि कर्माणि मन्यन्ते। निषिद्धकर्मणां कार्यादनिष्टफलं प्राप्यत इत्यस्मिन् विषये मीमांसादर्शनस्याऽन्येषां चाऽऽस्तिकदर्शनानां सिद्धान्तोऽस्ति।

नित्यकर्म सर्वाङ्गपूर्णं कर्तुमपि न शक्यते, यथा शक्यते तथा केवलं कर्तव्यम्, तथा च काम्यकर्मणां विधानेन सर्वाङ्गस्याऽनुष्ठानं कर्त्तव्यमिति मीमांसाशास्त्रस्य सिद्धान्तोऽस्ति (जैमिनीयधर्ममीमांसासूत्रम् ६।३।१-१०)। नित्यकर्मणि किञ्चिद् वैगुण्यमपि प्राप्तं फलसिद्धिरिति सिद्धान्तः कात्यायनश्रौतसूत्रेऽपि दृष्टोऽस्ति (विगुणे फलनिर्वृत्तिरप्रधानभेदात्- कात्यायनश्रौतसूत्र १।२।१८)। अतो यन्नित्यं कर्म पूर्णविधिना कर्तुं न शक्यते, तन्नानुष्ठेयमिति, अनुष्ठितेऽपि फलं नास्तीति वेति कथनं युक्तियुक्तं नास्ति। एतस्मिन् मीमांसादर्शने नित्यकर्म नैमित्तिककर्म च यथाशक्ति (यथा शक्यते) कर्तव्यमिति वैदिकसिद्धान्तस्य विचारविमर्शेन प्रमाणितमस्ति।

शास्त्रीयाऽधिकारयुक्तेन वेदाध्ययनं करणीयं, शास्त्रविहिताचाराणां पालनं च गृहस्थेन पर्याप्तधनयुक्तेन गृह्याग्नेराधानं कृत्वा तत्र कर्त्तव्यानि कर्माणि गृह्यसूत्रानुसारं पूर्णानि स्युरिति नियमोऽस्ति। तेषां गृह्यकर्मणां सायम्प्रातः अग्निपरिचरणं, दर्शस्थालीपाकः, व्रीहिप्रवपणकर्म, यवप्रवपणकर्म, सीतायज्ञः, श्रवणकर्म, इन्द्रयज्ञः, आश्वयुजीकर्म, आग्रहायणीकर्म, स्रस्तरारोहणकर्म, अष्टका, अन्वष्टका, शूलगवः, गोयज्ञः, वृषोत्सर्गः, पायसश्रपणयज्ञ इत्यादीनि कर्माणि प्राप्यन्ते। एषां यज्ञानां विधानं पारस्करादिगृह्यसूत्रे व्यवस्थितमस्ति। एते स्मार्तयज्ञा अपि वेदमूलकाः सन्ततीति मीमांसाशास्त्रस्य प्रथमाऽध्यायस्य तृतीयपादे स्पष्टतया उपदिष्टं विद्यते। तदुपर्यधिकधनस्य जनबलस्य चाऽवस्थायां शालीनगृहस्थब्राह्मणो गृह्यकर्माणि सुयुक्तं सम्पाद्य श्रौताग्नेराधानं कुर्वीत। श्रौतकर्माण्यपि कर्त्तव्यानीति नियमोऽस्ति। श्रौतकर्मसु मध्ये न्यूनतमं कर्म प्रतिदिनं प्रातरग्निहोत्रं पिण्डपितृयज्ञो दर्शपूर्णमासयाग आग्रयणकर्म च सन्ति। तदनन्तरमधिकधनात् प्रतिवर्षं चातुर्मास्ययागश्च कर्त्तव्यः। एष यागो वैश्वदेवः, वरुणप्रघासः, शाकमेध,ः शुनासीरिय इत्यादिभिश्चतुर्भिः पर्वभिर्युक्तोऽस्ति। एष यज्ञ वर्षैकं केवलं कृत्वा त्यक्तुं शक्यते। यद्यपि ततोऽपि अयनाऽयनात्मकक्रमेण प्रतिवर्षं वा निरूढपशुबन्धयाग इति विधिरवश्यं भवति। एष यागः प्रारभ्य प्रतिवर्षं कर्तव्य इति मन्यते। एकवर्षस्योत्पादनेन त्रयाणां वर्षाणां सम्पूर्णो व्ययः प्रचलति तर्हि तादृशेन समर्थेन प्रतिवर्षं सोमयागश्च कर्तव्य इति विधानमस्ति। जैमिनीयधर्ममीमांसासूत्रे वैदिकनित्यकर्मे सोमयागस्योल्लेखो दृश्यते (६।२।३१)। धनबलं, जनबलम् इत्यादिभिर्युक्तस्य जनस्य वैदिकयज्ञे क्रमशः प्रवृत्तिनियमोऽस्ति। अस्माद् वैदिक-नित्ययज्ञानामार्थिकः सामाजिकश्च पक्षोऽपि ज्ञातुं शक्यते।

वैदिकयज्ञेषु आध्यात्मिकः पक्षः गूढोऽस्ति। वैदिकयज्ञानामनुष्ठानं कर्तुं प्रथमं तावद् अग्नेराधानं करणीयम्। गृह्यकर्मणामनुष्ठानकरणात् पूर्वं गृह्याग्नेराधानं कर्तव्यम्, श्रौतयज्ञानां करणात् पूर्वं श्रौताग्नेराधानमावश्यकम्। विधिपूर्वकमग्नेराधानं कृत्वाऽग्नेर्निर्वापणमकृत्वैव धारणं कर्तव्यम्। वैदिकाग्निरात्मेव गृहीत इति ऋग्वेदस्य मन्त्रेषु सङ्केतितमस्ति (२।१।३,४; ५।१४।३)। अग्नेराधानं विराट्पुरुषस्याऽनुस्मरणमात्मज्योतिः प्रतिष्ठायामात्मज्ञानपरकमस्ति (मा. शतपथब्राह्मणम् १२।४।१।२-३)। श्रौताग्निमाधृतेन जनेन सविधि प्रातः सायङ्काले च हवनं अग्निहोत्रं कर्तव्यमस्ति। अग्निहोत्रस्य प्रयोजनं रहस्यञ्च ब्राह्मणग्रन्थेषु विविधप्रकारेण दर्शितं प्रपञ्चितं चाऽस्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाणीरूपस्याग्निहोत्रस्य अग्निहोत्री गौः, मनस्तु वत्सः, मनश्च वाणी च समानेऽपि पृथक् स्तः, अतः वत्सं मातरं चैकेन दाम्ना बध्नन्ति। श्रद्धा तेजः सत्यं आज्यमित्यादि रीत्या शतपथब्राह्मणे अग्निहोत्रस्य आध्यात्मिकः पक्षो व्याख्यातोऽस्ति (मा. शतपथब्राह्मणम् ११।३।१।१)। कठोपनिषदि ऋत्विजा यज्ञे सम्यग् धारितोऽग्निः विराट्रूपं ब्रह्म इत्युच्यते (कठोपनिषद् २।१।८)। अग्निष्टोमादिसोमयागेषु सोमस्य सवनात्मक-(विधिपूर्वकं सोमलतां प्रकुट्य, तद्रसो निष्कास्योपांशु, अन्तर्याम इत्यादिनाम्नि ग्रहपात्रे स्थापयित्वा हवनस्य)विधानमस्ति। सोमस्य विषयेऽपि ऋग्वेदस्य सामवेदस्य चर्चासु वर्णनमस्ति। एकऋचायां सर्वा ओषधीः, जलं, पशूंश्च विस्तारयतो व्यापकमिदमन्तरिक्षं विस्तृतिं कुर्वतोऽन्धकारं च स्वज्योतिषा नाशयतः सोमस्य वर्णनम् अस्ति (ऋग्वेदसंहिता १।९१।२२)। इतरायां ऋचायां सोमो बुद्धिः, द्युलोकः, पृथिवी इत्यादिकस्य जनितृत्वेन स्तूयते (ऋग्वेद संहिता ९।९६।५)। ऋग्वेदे सोमाभिषवे यजमानायेन्द्रो ज्योतिर्ददातीति वर्णितमपि दृश्यते–

स सुन्वते मघवा जीरदानवे अविन्दज् ज्योतिर्मनवे हविष्मते।– (ऋग्वेदसंहिता १०।४३।८)

यज्ञानां सप्त पाकयज्ञसंस्थाः, सप्त हविर्यज्ञसंस्थाः सप्त सोमसंस्थाश्च इति भेदो गौतमधर्मसूत्रे प्रस्तुतोऽस्ति। अष्टका (हेमन्त-शिशिरर्तुकृतकृष्णपक्षाणामष्टमी तिथयो, गृह्यसूत्रोक्तश्राद्धविशेषः), पार्वण(पार्वणस्थालीपाक)श्राद्धम् (प्रतिवर्षं प्रत्येकाऽमावस्यायां च क्रियमाणैकोदिष्टं दर्शश्राद्धञ्च) श्रावणी, आग्रहायणी, चैत्रीकर्म (शूलगवः), आश्वयुजीकर्मेत्येते सप्त पाकयज्ञसंस्थाः (गृह्ययज्ञसंस्थाः) सन्ति। श्रौत-अग्न्याधानं, अग्निहोत्रं, दर्शपूर्णमासः, आग्रयणः, चातुर्मास्यं, निरूढपशुबन्धः, सौत्रामणीष्टिः इत्येते सप्त श्रौतहविर्यज्ञसंस्थाः सन्ति। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्याम इत्येते सप्त श्रौतसोमसंस्थाः सन्ति। उपर्युक्तस्मार्तयज्ञास्तथा श्रौतयज्ञाश्च मानवस्य चत्वारिंशत्-संस्कारवर्गे पठ्यन्ते, यत्र दया, क्षमा, अनसूया, शौचम्, अनायासः, सदाचारः, अकृपणता, अस्पृहेत्यादय आत्मगुणा विकासायाद्भूता इति धर्मसूत्रे उपदिष्टं वर्तते (गौतमधर्मसूत्रम्, १।८।२२-२६)। अतो वैदिकयज्ञेषु विविधरूपेणाऽऽध्यात्मिकः पक्षोऽस्ति तथा यज्ञस्याऽनुष्ठानस्य च विविधेषूद्देश्येष्वाध्यात्मिकोद्देश्यं प्रमुखोद्देश्यमिति स्पष्टं भवति।

मोक्षस्वरूपविश्लेषणम्

मोक्षविषये विभिन्नैर्दर्शनैश्चिन्तिम् विद्यते। मीमांसादर्शनसूत्रेषु मोक्षस्य विषयो नैव प्राप्यते, किन्तु वार्त्तिकग्रन्थे विषयेऽस्मिन् विचारो विमर्शश्च कृतः। वार्त्तिककारः कुमारिलभट्टः श्लोकवार्त्तिके सम्बन्धाऽऽक्षेपपरिहारवादप्रकरणे मोक्षविषयं विशेषतया प्रतिपादितवान्। मीमांसादर्शने जीवात्मा शरीरं इन्द्रियमन्तस्करणं च प्रपञ्चसङ्क्रमणात् विलयिताऽऽत्मस्वरूपे स्थितो जनो मोक्षं लभत इति मन्यते। आत्मत्त्वज्ञानेन तस्य पूर्वसञ्चितकर्मणां भोगो नश्यति आगामिनीकर्मणां सञ्चयो न भविष्यति। अनेन शरीरान्तरोत्पत्तिस्थितिर्न भविष्यति। स्थितिरियं तदैव लभ्यते यदा काम्यकर्मसु प्रवृर्त्तिन भवेत् तथा च पापकर्मणां निवारणं जायेत तथा नित्यकर्मणामग्निहोत्रदर्शपूर्णमासादीनामनुष्ठानं प्रत्यवायं निवारयेत्। कर्माऽऽत्मतत्त्वज्ञानं चोपनिषद्वाक्यं श्लोकवार्त्तिक एव उक्तम्–

तत्र ज्ञातात्मत्त्वानां भोगात् पूर्वक्रियाक्षये।
उत्तरप्रचयाऽसत्वाद् देहो नोत्पद्यते पुनः॥ -१०८ श्लो.।

कर्मजन्योपभोगार्थं शरीरं न प्रवर्तते।
तदभावे न कश्चिदधि हेतुस्तत्राऽवतिष्ठते॥ -१०९ श्लो.।

तस्मात् कर्मक्षयादेव हेत्वाभावे न मुच्यते। -१०६ श्लो.।
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।

नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया॥ -११० श्लो.।

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रार्थ्यमानं फलं ज्ञातं न चानिच्छोर्भविष्यति।
आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते॥ –१११ श्लो.।

एवं मीमांसाकः कुमारिलभट्टो वैदिकयज्ञस्याऽधिकारवान्नित्यनैमित्तिककर्मणामनुष्ठातैव तस्य मोक्षस्य सम्यग्ज्ञातेति मन्यते यदि योऽसन्दिग्धश्चेत्। ननु नित्यकर्मणामपि फलं लभ्यते, तन्निमित्तः कथं मोक्षः सम्भवति? इति चेन्न, निष्कामस्य कर्मणः फलं मोक्षो भवितुमर्हति। पार्थसारथिमिश्रो भगवद्गीतायाः *अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स सन्यासी च योगी च न निरग्निर्न चाऽक्रियः* (६।१) इति वचनाधारं गृह्णन् वार्तिककारोक्तं प्रामाण्यं प्रमाणितवान् (पार्थसारथिमिश्रः, श्लोकवार्तिकस्य न्यायरत्नाकरव्याख्या, पृ.४७६)।

निष्कामेन ज्ञानपूर्वकं कर्मणां कर्तव्यविषये वैदिकसिद्धान्तस्योल्लेखो मनुस्मृतावपि लभ्यते। मनुस्मृतौ सुखाऽभ्युदयं ददतां मोक्षं च प्रददतां वैदिककर्मणां क्रमशः प्रवृत्तनिवृत्तकर्मत्वेन सम्मिलितं वर्णनं दृश्यते। फलेच्छासहितं कृतं कर्म काम्यमस्ति, निष्कामं च कर्म निवृत्तमित्युच्यते।

सुखाभ्युदयिकं च नैःश्रेयसिकमेव च।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्॥

इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते॥ – मनुस्मृति १२।८८।

वेदेऽपि कर्म कुर्वन्नेव कोऽपि जनोऽस्मिल्ँलोके शतं वर्षाणि जीवितुमिच्छेत्। एवं कृते सति पुरुषः कर्मलिप्तो न स्यादिति वचनं लभ्यते (मा. शुक्लयजुर्वेदसंहिता ४०।२)। एवं भगवद्गीतायामपि एतद् वचनं प्राप्यते, तत्र *यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः* इत्यनेन यज्ञार्थं कृतं कर्म न बन्धनकारकं प्रतिपादितम्। शतपथब्राह्मणे आत्मयाजी देवयाजी इत्यनयोर्विषये प्रतिपादितं लभ्यते। यो देवताया निमित्तं यागं करोति स देवयाजी, यः स्वस्य कृते चाऽस्य संस्कारस्योपधानं मन्यते स आत्मयाजी, तयोरात्मयाज्येव श्रेयानिति मन्यते (मा. शतपथब्राह्मणम् ११।२।६।१३–१४)।

प्रभाकरमतस्यानुयायी शालिकनाथमिश्रः सांसारिकदुःखाद् उद्विग्नो दुःखमिश्रितेन सुखेन च निर्विण्णो मनुष्यो मोक्षाय प्रयत्नं करोति। निषिद्धं काम्यं च कर्म परित्यज्य शम–दम–ब्रह्मचर्यादीनां गुणनिर्माणेना–ऽऽत्मज्ञानद्वारा निःश्रेयसं प्रप्यते। यथा चोक्तम्- *यः खलु सांसारिकेभ्यो दुःखेभ्य उद्विग्नस्तदनुषशबलेभ्यश्च सुखेभ्योऽपि विगतस्पृहो मोक्षायोत्तिष्ठते, स तावद् बन्धहेतुभूतेभ्यो निषिद्धेभ्यः प्रत्यवायहेतुभूतेभ्यो काम्येभ्यो-ऽभ्युदयसाधनेभ्यश्च निवर्तमानः सन्नुत्पन्नपूर्वौ धर्माधर्मौ भोगेन क्षयं नयन्, शम–दम–ब्रह्मचर्यादिकोपबृंहितेना-ऽऽत्मज्ञानेन "न स पुनरावर्तते" इत्यपुनरावृत्तये चोदितेन निश्शेषकर्माशयं नाशयन् मुच्यते* (प्रकरणपञ्चिका, तत्त्वालोकप्रकरण, पृ.३१२)।

एवं शालिकनाथोऽपि मोक्षार्थी निषिद्धं काम्यं च कर्माऽकुर्वाणो नित्यं नैमित्तिकं च कर्म करोतीति मन्यते। मानमेयोदयस्योत्तरार्धे नारायणपण्डितो निषिद्धं काम्यं च कर्म त्यक्त्वा, नित्य–नैमित्तिक–प्रायश्चित्त–कर्मणानमनुष्ठानं पापनाशस्य करणं, प्रारब्धकर्मभोगेन क्षयीकर्तव्यं, ब्रह्मचर्यं शमो दम इत्यादिगुणैर्युक्तः सदा आत्मविचारं कुर्वन् आत्मज्ञानं प्रप्नोतीति (नारायणद्वयी, सन् १९७८, मानमेयोदय, पृ.२०२)।

निष्कर्षः

मीमांसादर्शनेन वेदस्य प्रामाण्यं प्रतिपाद्य वेदविहितकर्मणा सह तत्सम्बन्धिनां विभिन्नसिद्धान्तानां विश्लेषणं कृतम्। मोक्षार्थिभिर्ज्ञानिभिश्च यथाशक्ति कर्माणि कर्तव्यानीत्येवं सिद्धान्तः स्थापितः। मीमांसादर्शनं कर्मप्रधानं दर्शनमस्ति। अस्य प्रमुखमुद्देश्यं वैदिककर्मणां स्वरूपं तेषां प्रमाणत्वं तेषामनुष्ठानस्य महत्त्वप्रतिपादनमस्ति। यत्र च मोक्षाय न, किन्तु धर्मपालनाय कर्मणोऽनुष्ठानं सर्वोपरीति प्रतिपाद्यते। जैमिनिप्रणीतमीमांसादर्शने वेदः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परमप्रमाणम् वर्तते। कर्म नित्यं कर्तव्यं तस्याऽवश्यं फलप्राप्तिर्भवतीति। यज्ञादिकर्मणोऽदृश्यं फलजनकमपूर्वनामकं तत्त्वमस्ति। कर्मैव जीवनस्य परमं स्वरूपमस्ति। अतो यो मीमांसादर्शनमनुसरति स कर्ममार्गेण स्वकर्माणि परिपूर्णीकृत्य जीवने सन्तोषं सुखं च लभते।

एष वैदिककर्मसिद्धान्तमनुसरता श्रीकृष्णेनाऽपि भगवद्गीतायाम् *न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नाऽनवाप्तमवाप्तव्यं वर्त एव च कर्मणि (३।२२), सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस् तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्* (३।२५) इत्याद्युक्तम् ।

सन्दर्भसामग्री

....*ऋग्वेदसंहिता,* (सन् १९८९), पञ्चम संस्करणः, पारडी : स्वाध्याय मण्डलः।

...*कठोपनिषद्,* आनन्दगिरिव्याख्यायुक्तशाङ्करवृत्तिसहितम्, पुणे : आनन्दाश्रमः। (सन् १९५९) *तैत्तिरीयसंहिता,* सायणभाष्यसहिताः, पुणे : आनन्दाश्रमः।

कात्यायनः (१९८७), *कात्यायनश्रौतसूत्रम्,* सरलावृत्तिसहितम्, वाराणसी : अच्युत-ग्रन्थमाला-कार्यालयम्।

कुमारिलभट्ट (सन् १९७८), *श्लोकवार्त्तिकम्,* पार्थसारथिमिश्रकृतं न्यायरत्नाकरव्याख्यासहितम्, वाराणसी : तारा पब्लिकेशन्स्।

कौण्डिन्न्यायनः, प्रमोदवर्धनः (२०७०), *मिमिरि,* वर्ष : ४२, अङ्क : ४, कार्त्तिक -मङ्सिर, नेपाल राष्ट्र बैङ्क।

गौतमः (२०६९), *गौतमधर्मसूत्रम्,* भावमीमांसा नेपाली व्याख्यायुतम्, काठमाडौँ : विद्यार्थी पुस्तक भण्डारः।

जैमिनिः (सन् १९३२-७२), *मीमांसादर्शनम्,* शाबरभाष्य तन्त्रवार्त्तिक- टुप्टीकासहितम्, पुणे : आनन्दाश्रमः।

नारायणद्वयी (सन् १९७८), *मानमेयोदयः,* व्याख्याकरः योगीन्द्रानन्दः, वाराणसी : षड्दर्शनीप्रकाशनप्रतिष्ठानम्।

पार्थसारथिमिश्रः (२०३९), *न्यायरत्नमाला,* रामानुजाचार्यकृतः नायकरत्न-व्याख्या-सहितम्, वाराणसीः सम्पूर्णानन्द-संस्कृत विश्वविद्यालयः।

बादरायणः (सन् १९८५), *ब्रह्मसूत्रम्, शाङ्करभाष्यसहितम्,* दिल्ली : मोतीलाल बनारसीदासः।

बादरायणः (सन् २००२), ब्रह्ममीमांसासूत्रम्, कौण्डिन्न्यायनवृत्तिसहितम्, वाराणसी : चौखम्बा विद्याभवनम्।

मनुः (सन् २००७), *मनुस्मृतिः,* मन्वर्थमुक्तावलीसहितम्, वाराणसी : चौखम्बाविद्याभवनम्।

माधवाचार्यः (सन् १९२४) *सर्वदर्शनसंग्रहः,* दर्शनाङ्कुर-व्याख्या सह, व्याख्याकरः वासुदेवशास्त्री अभ्यङ्करः, पुणेः प्राच्यविद्या- संशोधन-मन्दिरम्।

मा. शतपथब्राह्मणम् (सन् १९८९), पुनर्मुद्रिता, दिल्ली : भारतीय विद्याप्रकाशनम्।

मा.शुक्लयजुर्वेदसंहिता (सन् १९७१), उव्वट-महीधरभाष्ययुता, पुनर्मुद्रिता, दिल्ली : मोतीलाल बनारसीदासः।

लौगाक्षिः (२०१३), *लौगाक्षिस्मृतिः,* स्मृतिसन्दर्भः, षष्ठभागः, कलकत्ता : मनसुख राय मोरः।

वेदव्यासः (सन् १९८१), *भगवद्गीता,* दिल्ली : मोतीलाल बनारसीदासः।

शबरस्वामी (२०३४), *मीमांसाशाबरभाष्यम्,* सम्पादक तथा व्याख्याकरः युधिष्ठिरमीमांसकः, हरयाणा : रामलाल कपूर ट्रष्टः।

शालिकनाथमिश्रः (२०१८), *प्रकरणपञ्चिका,* सुब्रह्मण्यशास्त्रिसम्पादितः, वाराणसी : काशी हिन्दु-विश्वविद्यालयः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मसूत्रकारस्य वेदव्यासस्य परिचयः

नारायणप्रसादकोइराला
सर्वदर्शनाचार्यः, वाल्मीकिविद्यापीठम्

१. लेखसारः

सर्वेषां वेदानां सर्वासामुपनिषदां च सारं सारं समुद्धृत्य महर्षिव्यासेन श्रीमद्भागवतमहापुराणं विरचितम्। श्रीमद्भागवतं साक्षाद् भगवत एव स्वरूपमस्ति। यस्य रचनापश्चादेव महर्षिणा व्यासेन शान्तिरधिगता। मानवानां हिताय भगवतोऽवतारभूतः श्रुतिस्मृति-न्यायप्रस्थानानां वेदपुराणस्मृतीतिहास-ब्रह्मसूत्राणां मूर्तग्रन्थस्वरूपप्रदानेन साधकानां समुद्धर्ता द्वापरयुगीनोऽपि अष्टचिरञ्जीविनाम् अन्यतमत्वेन सृष्टेः कस्मिंश्चित्कोणे साम्प्रतिकमपि कृष्णद्वैपायनशरीरावच्छिन्नत्वेनैवाऽनुमेयोऽसाधारणप्रतिभासम्पन्नो महामुनिर्वर्तते वेदव्यास इति।

२. शब्दकुञ्जी : वेदव्यासः, ब्रह्मसूत्रम्, अद्वैतः, वेदान्तः, दर्शनम्।

३. विषयपरिचयः

वेदव्यासो लोककल्याणायैवेह धरायां गृहीताऽवतारो वर्तते। स वेदस्य चतुर्धा विभजनेन, ब्रह्मविचाराऽऽख्यं ब्रह्मसूत्रम्, अष्टादशपुराणानि च विरचय्य मुमुक्षूणां कृते साधनोपायान् वर्णितवान्। व्यासविरचितं श्रीमद्भागवत-पुराणमितरेभ्यः पुराणेभ्यो नितरां भिन्नं शुद्धं सुसन्देशपरिलसितं, सभ्यभाषाप्रयुक्तम्, सुबोध्याऽऽख्यायिकासमन्वितं च वर्तते। गद्यपद्यमयमिदं चम्पूकाव्यं तत्त्वसाक्षात्काराय सुगमसाधनं वर्तते। तथैव वेदव्यासो वेदान्तसूत्रस्य कर्ताऽपि। वेदान्तदर्शनस्य केन्द्रीभूतोऽयम् अद्वैत-सिद्धान्तोऽद्वैतदर्शनं गीतोपनिषद्ब्रह्मसूत्राऽऽख्यप्रस्थानत्रय्याः प्रामाण्यमुररीकृत्य जगज्जीवयोर्व्याख्याने-ऽग्रेसरतां प्रदर्शयति। लेखेऽस्मिन् महर्षिवेदव्यासस्य देशकालजीवनवृत्तगतं परिचयः प्रस्तूयते।

४. समस्या, उद्देश्यञ्च

वेदस्य विभाजकस्य ब्रह्मसूत्र-अष्टादशपुराणादिग्रन्थानां कर्तुर्वेदव्यासस्य जन्मसमय कः? कश्च जन्मदेशः? किञ्च जीवनवृत्तम्? इति जिज्ञासा समस्यारूपेण समुद्भवन्ति। अतश्च तासामेव समस्यानां समाधानान्वेषणं लेखस्याऽस्य मुख्यमुद्देश्यमस्ति।

५. शोधविधिः

शोधसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगकृतो वर्तते। तेषु प्रामुख्येन पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः। सन्दर्भसूचौ च एपीए इति नाम्नि पद्धतिरवलम्बितमस्ति। यथावश्यकमागमन-निगमनविधिद्वयस्याऽपि प्रयोगः कृतो विद्यते।

६. सीमा, क्षेत्रं, औचित्यञ्च

अस्याऽऽलेखस्य सीमा केवलं वेदव्यासस्य परिचयप्रदानमेवाऽस्ति। अतश्चाऽस्य क्षेत्रमपि व्यासस्य देशकालादिगतजीवनवृत्तस्य प्रकाशनमेव। अतश्च लेखोऽयं व्यासस्य विषये जिज्ञासूनां कृते औचित्यपूर्णं भवितेति।

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७. महर्षिवेदव्यासः

वेदव्यासोऽयम् अलौकिकशक्तिसम्पन्नो महापुरुषोऽवर्तत। वैदिकवाङ्मयस्य नैकविधया विस्तारकर्त्रा समुद्धर्त्रा चाऽनेन मनीषिणा पूर्वीयदर्शनधर्मसंस्कृतीनाम् समुन्नत्या अनुपमेयं योगदानं कृतमस्ति। मानवसभ्यतायाः पूर्वीयसंस्कृतेश्च पथप्रदर्शकोऽयं जगद्गुरुर्हिन्दूसमाजे आषाढशुक्लपूर्णिमायां साम्प्रतमपि प्रतिवर्षं पूज्यते। गुरुपरम्परायां षष्ठस्थानाऽऽपन्नोऽयमिति पद्येनाऽनेन ज्ञायते–

नारायणं पद्मभवं वशिष्ठं शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं ...वार्तिककारमन्यानस्मद्गुरुं सन्ततमानतोऽस्ति॥

वेदव्यासोऽयं द्वापराऽन्ते पराशराद्वसुकन्यायां सत्यवत्यां जातो भगवतो नारायणस्यैव सप्तदशः कलाऽवताऽरो वर्तत इति –

ततः सप्तदशे जातः सत्यवत्यां पराशरात्।
द्वापरे समनुप्राप्ते वासव्यां कलया हरेः॥

अखण्डसंहितात्मकस्य वेदस्य चतुर्धा विभागकर्तृत्वेन वेदव्यासनाम्नि श्यामलवर्णशरीरेण द्वीपे लब्धजनित्वात् कृष्णद्वैपायन इत्यपरनाम्नि च सार्थकता अभिलक्ष्यते। तथैव बदरीवननिवासित्वेनैतस्या-ऽपरमप्येकं नाम बादरायण इति मन्यते। नेपालदेशस्यैव तनहूँमण्डलान्तर्गतं दमौलीक्षेत्रमेतस्य जनिस्थलमितीतिहासविदो-ऽभिप्रयन्ति।

बादरायणो मुनिरिति गुरुपरम्पराप्राप्तरूपेण स्वीक्रियते। यथा च– *तदुपर्यपि बादरायणः सम्भवात्* (१/३/२६) इत्यादिकेषु सूत्रेषु ब्रह्ममीमांसासूत्रग्रन्थेऽर्थशास्त्रे च बादरायणस्योल्लेखो वर्तत एव। तथैव कौटलीयेऽर्थशास्त्रे, सङ्क्षेपकशारीरककारेण सर्वज्ञात्ममुनिना, खण्डनखण्डखाद्यकारेण श्रीहर्षेण च *भगवत्पादेन वा वादरायणीयेषु सूत्रेषु भाष्यं नाऽभाषि* इति वदता ब्रह्मीमांसासूत्रग्रन्थस्य बादरायणकृतत्व-मित्युपस्थापितमेव। एष बादरायणो ब्रह्ममानसपुत्रस्य पराशरस्य पुत्रः सत्यवतीसुतो वेदव्यासो द्वैपायनो मुनिः कृष्ण एवास्तीति भारतवर्षीय-पौराणिकविद्वत्परम्परायां प्रसिद्धिः प्राप्यते। बादरायण एव पुराणसंहिता-सम्पादको महाभारतकृच्चेति विद्वांसो मन्यन्ते। सत्यवतीसुतस्य पाराशर्यस्य व्यासस्य बहुशः प्रयुज्यमानं प्रसिद्धतरं विशिष्टं नाम तु मुख्यनामौपाधिकनामद्वयोल्लेखयुतं 'कृष्णद्वैपायनः' इति अस्ति। पुराणेष्वपि पुराणसंहिताकारस्य कृष्णद्वैपायन इति नाम स्थले स्थले प्रयुक्तं दृश्यते। महाभारतकारस्य

'कृष्णद्वैपायनं व्यासं विद्धि नारायणं भुवि।
कोऽह्यन्यः पुरुषव्याघ्र महाभारतकृद् भवेत्॥ (महा. शा. ३४६।१२) इति महाभारत एव प्राप्यते।

तथैव 'द्वैपायन' इति नाम्नः प्रयोगोऽपि महाभारते बहुष्वेव स्थलेषु (आदि १।५५, ५६ र ८०, १००, १०४ इत्यादि स्थलेषु) प्राप्यत एव। तथा च विष्णुपुराणे (३। ४। ५) पद्मपुराणे सृष्टिखण्डे (१। ४३ – ४४) इत्यादि स्थलेष्वपि प्राप्यते।

कृष्णद्वैपायनस्य मातुर्नामानि च सत्यवती, वासवी, दाशेयी, योजनगन्धा, गन्धकालिका, काली, कृष्णा, मत्स्या, मत्स्यगन्धा, शालङ्कायनजेत्यादीनि प्राप्यन्ते। प्रायेणैतानि सर्वाणि नामानि शिवराजाऽऽचार्य-कौण्डिन्न्यायन-महाभागस्य वेदभाषानिघण्टौ (कौण्डिन्न्यायनकोषे) भूर्लोककाण्डे ब्रह्मवर्गे– **मत्स्यगन्धा सत्यवती शालङ्कायनजा तथा। दाशेयी वासवी योजनगन्धा गन्धकालिका॥** इत्यादिभिः सङ्कलितो विद्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृष्णद्वैपायन एतस्य वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे दिवसे श्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतिम्यां चतुर्युग्यां द्वापरयुगस्याऽन्तिमे समये कलिद्वापरयोः सन्धौ जात इत्युच्यते; इदानीं च यदुकुलजकृष्णस्वर्गाऽऽरोहणतो गणनीयानां कलियुगाऽब्दानां षट्षष्ट्यधिकपञ्चसहस्रतमोऽब्दः (५०६६) प्रवर्तत इति भारतीयपरम्परानुसारम् इतः पूर्वमीषदधिकपञ्चसहस्रमिते काले कृष्णो द्वैपायनो जात इत्युच्यते विद्वद्भिः। एवं च कृष्णद्वैपायन–बादरायणपदयोः समानपुरुषविषयत्वमवधारयति शिवराजा–ऽऽचार्यकौण्डिन्न्यायनमहाभागोऽपि वेदभाषानिघण्टौ (कौण्डिन्न्यायनकोषे) भूर्लोककाण्डे ब्रह्मवर्गे।

त्रिकालदर्शीच्छागतिश्चायं महामुनिर्येन केनाऽप्यभिव्यक्तं मनोविषयं ज्ञात्वा त्वरितमिष्टस्थले प्राप्तुं शक्नोति स्म। द्रौपद्याः पञ्चभिरेव पाण्डवैः सह परिणयार्थं तस्याः पूर्वजन्मवृत्तान्तस्मरणेन एतेनैव भूमिका निर्वोढा। वनवासिनः पाण्डवान् प्रति कौरवाणां गुप्ताऽऽक्रमणयोजनाऽपि स्वदिव्यदृष्ट्या परिज्ञायैतेना–ऽवरोधिताऽऽसीत्। महाभारतसङ्ग्रामस्याऽवश्यम्भावित्वविषयेऽपि राजसूयसमाप्तिसमये इन्द्रप्रस्थे त्रयोदशवत्सरपूर्वमेव महर्षिणा युधिष्ठिरः सूचित आसीत्। पाण्डवानां वनवाससमये एतेन युधिष्ठिर–माध्यमेनाऽर्जुनाय देवदर्शनयोग्यतासम्पादिका प्रतिस्मृतिविद्या समुपदिष्टा आसीत्। तथा च धृतराष्ट्रस्य कृते युद्धवर्णनार्थमेतेन सञ्जायाय सङ्ग्रामवृत्तान्तबोधिका दिव्यदृष्टिश्च प्रदत्ता आसीत्, यया दृष्ट्या न केवलं सङ्ग्रामविषयो ज्ञायते स्म, अपितु भगवत्प्रदत्तदिव्यचक्षुषा–ऽर्जुनेनैव दर्शनशक्यं भगवतः दुर्लभतमं विश्वरूपं द्रष्टुं गीतोपदेशं साक्षाच् श्रोतुं च शक्यते स्म। वानप्रस्थव्रतिनो धृतराष्ट्रस्येच्छानुसारमेतेन महाभारतसङ्ग्रामे प्राप्तवीरगतिभिर्बन्धुभिः सह धृतराष्ट्रयुधिष्ठिरादीनां मेलनं, जनमेजयेच्छया तत्पिता परीक्षिता सह तन्मेलनञ्च विहितमासीत्। एतादृशैः कार्यैरेतस्याऽऽश्चर्यपूर्णसामर्थ्यस्य प्रकाशनं विलोक्यते। अयं व्यासोऽष्टचिरञ्जीविनाम् अन्यतमत्वेन परिगणितोऽस्ति–

मार्कण्डेयो बलिर्व्यासो हनुमांश्च विभीषणः।
कृपः द्रौणिः परशुरामश्चाऽष्टैते चिरजीविनः॥ (कर्मकाण्डः, कक्षा ७, पृ.७३)

कल्पान्तजीवी व्यासः प्रस्थानत्रय्या भाष्यकारेण शङ्करेण दृष्टो मिलितश्चासीदिति श्रूयते। आगामिनि मन्वन्तरे सप्तर्षिषु मध्ये समावेक्ष्यमाणोऽयं व्यासः साम्प्रतमपि क्वचिदस्तीत्यनुमीयते। जन्मप्राप्तिसमयान्तरं हि तपश्चर्यार्थं प्रस्थितोऽयं कृष्णद्वैपायनो हिमालयकुक्षौ भगवन्नारायणस्य तपोभूमिप्रदेशभूते बदरीवन आश्रमं निर्माय सर्वप्रथमं यज्ञकर्मानुष्ठायिनाम् अध्वर्युहोत्रुद्गातृब्रह्मरूपाणाम् ऋत्विजां कृते प्रयोगसौकर्याय यज्ञविस्तारार्थं वा ऋग्यजुःसामाऽथर्वाख्येषु चतुर्षु भागेषु वेदं व्यभजत्। यथोक्तम्–

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम्।
व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम्॥ (श्रीमद्भागवतम्, १। ३। १९)।

तथैव विष्णुपुराणादावपि श्रूयते–

द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिः।
वेदमेकं सुबहुधा कुरुते जगतो हितम्॥ (विष्णुपुराणम् ३। ३। ५)

ततो वेदे स्त्रीशुद्रद्विजबन्धूनाम् अनधिकारं विचार्य तदर्थं परमकारुणिकेन तेन महाभारतग्रन्थो निरमायि। उक्तञ्च–

स्त्रीशुद्रद्विजबन्धूनां त्रयी न श्रुतिगोचराः।
इति भारतमाख्यानं कृपया मुनिना कृतम्॥ (महाभारतम्)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यत्र पुरुषार्थचतुष्टयेऽलभ्यविषयोऽन्यतोऽपि लब्धुं न पार्यते चेद्यदन्यतश्च बोध्यते तत्सर्वमपि तत्रैव समाविष्टमधिगम्यते। पुनश्चोक्तम्–

धर्मे चाऽर्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहाऽस्ति न तत् क्वचित्॥ (महाभारतम्)

एतेन वाणोच्छिष्टं जगत्सर्वम् इतिवत् समग्रमपि ज्ञानं व्यासज्ञानेनैव प्रकाशितमनुमीयते । अत एतत्कल्पनाऽतिरिक्तान् न कांश्चिदपि पदार्थान् कल्पयितुं शक्यते। तथापि 'जय' इति नाम्ना बोध्यस्य महाभारतस्येतिहासत्वेन, इतिहासस्य च केवलं भूतकालिकघटनानां विवरणात्मकप्रस्तुतेः, महर्षिणा त्रैकालिक-विषयान् समन्वीय सन्देशात्मकव्याख्यानपरकं पौराणिकं सत्साहित्यञ्च व्यरचि। अतः पुराणम् इतिहास एव नाऽपि तु सत्साहित्यस्यैतादृशं निदर्शनं यत् सर्वतोभावेन सांसारिकीं समुन्नतिं सन्दिशति। जागतिकव्यवस्थायाः सुदृढीकरणाय पुराणम् ईदृशं कारकतत्त्वं यद्– यत्रैतिहासिक-धार्मिका-ऽऽर्थिक-नैतिक-सांस्कृतिक-सामाजिक-भौगोलिक-विषयाणां सारल्येन सुबोधशैल्या च प्रकाशनमनुभूयते। सत्पथाऽनुगामिनां सद्गतिं पथ-भ्रष्टानाञ्च दुर्गतिं प्रदर्श्य पुराणेषु रामादिवद्वर्तितव्यं न क्वचिद्रावणादिवद् इत्यादिरीत्या समाजः सन्दिष्टो वर्तते।

महर्षिणा वेदव्यासेन श्रुतिषु बीजरूपेण सूत्रितो लौकिकपारलौकिकादिज्ञानविषय एवाऽऽख्यानोपा-ख्यानमाध्यमेन पुराणेषु सुगमशैल्या विशदरूपेण वर्णितो वर्तते। एवं वेदव्यासेन श्रुतीनाम् समग्राऽर्थानामपि प्रतिष्ठा पुराणेष्वेव विहिता। यथा–

वेदाः प्रतिष्ठताः सर्वे पुराणेष्वेव सर्वदा।

तथाहि *स्तेनानां पतये नमो नमः* (शु.यजुर्वेदः १६।२०), श्रुतिवाक्यस्याऽस्य सरसं प्रतिपादनं भगवतः श्रीकृष्णस्य चारित्र्येण ब्रह्मवैवर्त-पद्म-विष्णु-श्रीमद्भागवतादिपुराणेषु प्राप्यते चेत् *सत्यं वद धर्मं चर* (तै. उपनिषद् १।११।१) इत्यादिश्रुत्युपदेशस्य पूर्णतः परिपालनाय बलिरामयुधिष्ठिरहरिश्चन्द्रादयस्तत्र तत्र सुस्पष्टमुदाहृताः सन्ति। एवञ्च *अतिथिदेवो भव* (पूर्ववत्, १। ११। २) इति श्रुतिश्च महर्षिमुद्गलमहाराज-शिवि-रन्तिदेवादिभिः पात्रैश्चरितार्था दृश्यते। तथैव *नमो नीलग्रीवाय* (शु.यजुर्वेदः १६। २८) इति श्रुतिः समुद्रमन्थनगतपौराणिकप्रसङ्गेनैव गतार्था वर्तते। एतावदेव न, अपि तु विष्णुधर्मोत्तरपुराणे वेदव्यासेन सर्वोपवेदानां साङ्गोपाङ्गचर्चा समुत्थापिता-ऽस्ति चेद् अग्निगरुडनारदपुराणेषु षष्णामपि वेदाङ्गानां वर्णनं वैशद्येन कृतमवाप्यते। औपनिषदविषयस्य सम्यग् व्याख्यानाय विष्णुपुराणस्य षष्ठांशः श्रीमद्भागवतस्य एकादशस्कन्धः, गरुडपुराणास्य पूर्वभागश्च पर्याप्तो वर्तते। किं बहुना? श्रीमद्भागवतमेव महर्षिणा औपनिषदोत्तरमीमांसासीयसूत्रात् प्रारब्धमस्ति यथा–

जन्माद्यस्य यतोऽन्वयादितरतः (श्रीमद्भागवत १। १। १)

जन्माद्यस्य यतः (ब्रह्मसूत्रम्, १। १। १। २)

वस्तुतः पुराणेष्वेतेन परिचर्चितं राजवंशादीनां चरितमपि विशेषतो ज्ञानवैराग्यादिसमाश्रयणे लोकार्थं सन्देशमूलिकाऽभिव्यक्तिरेव। यथोक्तं भागवते–

कथा इमास्ते कथिता महीयसाम्, विताय लोकेषु यशः परायुषाम्।
विज्ञानवैराग्यविवक्षया विभोर्वचोविभूतिर्न तु पारमार्थ्यम्॥ (भागवत १२। ३। १४)

एवं प्रकारेणाऽऽख्यायिकचमत्कृतिना सुन्दरव्यावहारिकजीवनदर्शनस्य प्रदर्शनपुरस्सरं पारमार्थिकस्य गभीरवैदिकरहस्यस्य सुगमया प्राञ्जलभाषायां सामान्यमानवहृदयपर्यन्तं प्रसारणाय महर्षिणा व्यासेन पुराणानि प्रणीतानीति ज्ञायते। अतः सूत्रभूतानां वेदानां कृते पुराणानि भाष्यात्मकतां निर्वहन्तीति निश्चप्रचम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि महर्षिणा मुमुक्षूणां समुद्धाराय तत्त्वज्ञानस्य सुव्यवस्थितिसम्पादकं शारीरकमीमांसाऽपरपर्यायभूतं ब्रह्मसूत्रं लिखितमासीदिति शङ्करभगवत्पादस्य ब्रह्मसूत्रस्य भाष्ये मङ्गलाचरणश्लोकेन ज्ञायते। प्राच्यदर्शन-शास्त्रस्येतिहास उत्तरमीमांसाऽपरपर्यायस्य वेदान्तदर्शनस्य प्रवर्तकत्वेन प्रथियोऽयं व्यासः पञ्चपञ्चाशदधिक-पञ्चशतसूत्रैराबद्धे ब्रह्मविचाराख्यशास्त्रे ब्रह्मसूत्रे दर्शनेतराणामविरोधप्रदर्शनेन सह श्रुतिवाक्यानां परब्रह्मण्येव तात्पर्यनिश्चायकत्वेन समन्वयं संसाधितवान् अस्ति। एतस्याऽमुस्मिन् ग्रन्थे एतदपरवर्तिभिराचार्यैः स्वस्वमतालम्बि भाष्यं निर्माय वेदान्तदर्शनेऽनेकवादानाम् आविष्करणाद् दर्शनस्याऽऽधारग्रन्थत्वेन ग्रन्थोऽयं वेदान्तदर्शनशब्देनापि व्यवह्रियते। परन्तु लिखितेऽपि एवं प्रकारके तत्त्वप्रतिपादके ब्रह्मसूत्रग्रन्थे ब्रह्मणः कल्पसूत्रनिरुक्तादिप्रक्रियया नैकविधशाखोपशाखासु विभाजिते च वेदे लोकोपकाराय पुनश्च पूर्णसाफल्याऽनवभासाद् महर्षिणा व्यासेन इतिहासपुराणानि विरचय्य विश्वसमाजस्य प्रतिकोणं प्रापणप्रयासोऽनुष्ठितः।

वस्तुतो महर्षिणा इतिहासपुराणाभ्यामपि श्रुतेरेव उपबृंहणं विहितम्। यथा–

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् (ब्रह्माण्डपुराणम् १।१७०)।

अर्थाच् श्रुतौ सूक्ष्मरूपेण विद्यमानविषयवस्तूनां स्फीताऽऽलोकमध्यवर्तिघटवत् स्थौल्यभावेन सुस्पष्टतया ज्ञानगम्यत्वसम्पादनं कृतम्। कथाप्रकथनचमत्कृतिना वेदस्यैव सुदृढीकरणं वेदार्थस्य स्पष्टीकरणं वा इतिहासपुराणेषु साधितमस्ति। यथा–

इतिहासपुराणाभ्यां वेदोऽयं सुदृढः कृतः।
ताभ्यां हि वेदविज्ञानं चारित्र्येणोपदर्शितम्॥ (पुराणोत्पत्तिप्रसङ्गः)

एतेन निरुक्तादिषडङ्गानाम् –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ उच्यते।
ज्योतिषमयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्॥ (पाणिनीयशिक्षा, ४१ – ४२)

ब्राह्मणग्रन्थश्रौतसूत्रादीनां तात्पर्यनिर्णायकोपक्रमादिलिङ्गानाम्–

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

च साहाय्येन भगीरथप्रयत्नेन बोधशक्याऽपि श्रुतिरितिहासपुराणैः शास्त्रान्तरनिरपेक्षतया सुबोध्या जाता। पुराणेषु यस्मिन् यस्या देवतायाः प्रसङ्गः समायाति, तस्मिन् पुराणे तस्याः खलु सर्वातिशायिमहत्त्वं सर्वोपरिस्थानं वा प्रतिपादयतो व्यासस्य तत्तद्देवतायां पूर्वाग्रहः प्रतीयत अथवा वस्तुतः कस्याः सर्वश्रेष्ठत्वमिति निर्णयाऽभावेन विरुद्धत्वाद् अविश्वासोदयहेतुत्वञ्च लक्ष्यते परन्तु पुराणप्रणयितरि व्यासेऽदूरदर्शित्वपूर्वाग्रहयोरित्थम् आपत्तिरापाततो दर्शने एव, गभीरतया विचारिते सति एतादृशी समस्यैव नायाति। यतो हि भगवतो लीलाभिनय एव तादृश आश्चर्यमयो वर्तते यद् नानारुच्यधिकारसम्पन्नानां साधकानां कल्याणाय स विचित्रेषु लीलाव्यापारेषु प्राकट्यं जनयति। अतः पुराणेषु वर्णितानां सर्वविधानां देवतानां एकरूपत्वात् सर्वेषामपि श्रेष्ठतमत्वकथनं युक्तिसङ्गतमेव।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८. निष्कर्षः

वेदव्यासविषये निष्कर्षे प्रोच्यमाने, मानवानां हिताय भगवतोऽवतारभूतः श्रुतिस्मृतिन्यायप्रस्थानानां वेद-पुराण-स्मृतीतिहासब्रह्मसूत्राणां मूर्तग्रन्थस्वरूपप्रदानेन साधकानां समुद्धर्ता द्वापरयुगीनोऽप्यष्टचिरञ्जीविनाम् अन्यतमत्वेन सृष्टेः कस्मिंश्चित् कोणे साम्प्रतिकमपि कृष्णद्वैपायनशरीरावच्छिन्नत्वेनैव अनुमेयोऽयमसाधारण-प्रतिभासम्पन्नो महामुनिर्वर्तते। सर्वेषां वेदानां सर्वासामुपनिषदां च सारं सारं समुद्धृत्य महर्षिव्यासेन श्रीमद्भागवतमहापुराणं विरचितम्। श्रीमद्भागवतं साक्षाद् भगवत एव स्वरूपमस्ति। यस्य रचनापश्चादेव महर्षिणा व्यासेन शान्तिरधिगतेति निष्कर्षः।

सन्दर्भग्रन्थसूची

ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गोविन्द भवनकार्यालयः, वि.सं. २०६०।

कौण्डिन्न्यायनः, शिवराज आचार्यः (ई.सं.२००२), *ब्रह्ममीमांसासूत्रम्*, कौण्डिन्न्यायनवृत्तिसहितम्, वाराणसी : चौखम्बा विद्याभवन।

कौण्डिन्न्यायनः, शिवराज आचार्यः (२०५०), *वेदभाषानिघण्टुः*, देववर्ग-ब्रह्मवर्गात्मकः, काष्ठमण्डपः : स्वाध्यायशाला।

गोयन्दका हरिकृष्णदासः *श्रीमद्भगवद्गीता*, शाङ्करभाष्यार्थ, गोरखपुर : गोविन्दभवनकार्यालयः, वि.सं. १९८८।

छान्दोग्योपनिषद्, शाङ्करभाष्यार्थः गोरखपुर : गोविन्दभवनकार्यालयः, वि.सं. २०५८।

दीक्षितः, धर्मराजः, *वेदान्तपरिभाषा*, मुसलगाँवकर श्रीराम, वाराणसी : चौखम्बाविद्याभवनम्, सन् १९८३

महर्षिव्यासः, *श्रीमद्भागवतम्*, गोरखपुर : गीताप्रेस, वि.सं. २०५७।

शङ्कराचार्यः, *ब्रह्मसूत्रम्*, दिल्ली : मोतीलाल वनारसीदास पब्लिशर्स, सन् १९८५।

सायणाचार्यः, *ऋग्वेदसंहिताभाष्यम्*, वाराणसी : चौखम्बाविद्याभवनम्, सन् १९७०।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मशास्त्रदृष्ट्योपनयनसंस्कारविवेचनम्

विष्णुप्रसादः शर्मा

धर्मशास्त्राचार्यः

लेखसारः

उपनयनसंस्कारो हिन्दुधर्मस्य षोडशसंस्कारेष्वत्यन्तं महत्त्वपूर्णः संस्कारोऽस्ति। एष संस्कारो विशेषतया ब्राह्मणक्षत्रियवैश्यजातीयानां बालकानां विद्याऽध्ययनस्याऽऽरम्भे क्रियते। अस्य संस्कारस्य मुख्योद्देश्यं गुरुकुलं गत्वा वेदाध्ययनस्याऽऽरम्भस्तथा धार्मिकजीवनस्य प्रारम्भश्चाऽस्ति।

उपनयनसंस्कारस्य मुख्या बिन्दवः

अर्थः – 'उपनयनम्' इत्यस्याऽर्थः 'गुरोः समीपं नयनम्' अर्थाद् गुरुकुलशिक्षायाः प्रारम्भः।

यज्ञोपवीतधारणम् – अस्मिन् संस्कारे त्रिसूत्रयुक्तं यज्ञोपवीतं धार्यते। येन ब्रह्मचारिणोऽस्य कर्तव्यं बोधन्ति।

गायत्रीमन्त्रोपदेशः – बालकाय गायत्रीमन्त्रस्य उपदेशः क्रियते। यो वेदाध्ययनस्य आधारो भवति।

ब्रह्मचर्यव्रतग्रहणम् – बालकोऽस्मिन् समये ब्रह्मचर्यपालनाय प्रतिज्ञां करोति।

गुरुकुलगमनम् – अनेन संस्कारेण बालकऔपचारिकीं शिक्षां प्रारभते।

उपनयनसंस्कारस्य महत्त्वम्– एष संस्कारो धार्मिकं नैतिकंसामाजिकञ्चोत्तरदायित्वं शिक्षयति।

विद्यारम्भायाऽऽवश्यकः संस्कारोऽयमेव। आत्मानुशासनं, संयमं, तथा कर्तव्यपरायणञ्च अयमेव द्योतयति।

अयं संस्कारः सनातनधर्मस्य मूलभूतसंस्कारोऽस्ति, यो जीवनस्य प्रथमं आध्यात्मिकं सोपानं निर्दिशति।

शब्दकुञ्जी : *मौञ्जी, कौपीनम्, वेदाध्ययनम्ः, आचार्यः, कर्तव्यम्, अकर्तव्यम्, शिष्यत्वम्।*

१. विषयपरिचयः

धर्मस्य मूलं वेदो मन्यते। मानवानां कर्तव्याऽकर्तव्यादिधर्माऽधर्मनिरूपणार्थं महर्षिभिर्वेदस्य स्मरणादेव धर्मशास्त्राणां ग्रन्थानां रचना विहिता। तत्र ब्राह्मणादीनां चतुर्णां वर्णानां जन्मकालाद् आरभ्य अन्त्येष्टिकालपर्यन्तानां विविधानां धर्माणां विस्तृतं वर्णनमुपलभ्यते। धर्मशास्त्रस्य विशेषतः शिष्यचारादिज्ञानार्जनाय महत्त्वमधिकमस्ति। संस्कारस्य मूलं धर्मशास्त्रमेव।

हिन्दुधर्मस्य प्रमुखाः षोडशसंस्काराः सन्ति। तेषु मध्य उपनयनसंस्कारः प्रमुखोऽस्ति। अयं संस्कारो विशेषतया ब्राह्मणक्षत्रियवैश्यानां बालकानां विद्याध्ययनस्याऽऽरम्भे क्रियते। अस्य संस्कारस्य प्रमुखं लक्ष्यं बालकस्य विद्यारम्भो, गुरुकुलप्रवेशश्चाऽस्ति।

उपनयनसंस्कारस्य परिचयः

१. अर्थः– 'उपनयनम्'इति शब्दस्याऽर्थो निकटं नयनम्, अर्थाद् बालकस्य गुरुजनानां समीपं नयनम्। अनेन संस्कारेण स बालकोविधिपूर्वकाऽध्ययनाय योग्यो भवति।

२. महत्त्वम्ः– अयं संस्कारो बालकस्य द्विजत्वं (द्वितीयजन्म) सूचयति। अत्र बालकाय यज्ञोपवीतं (पवित्रसूत्रं) धार्यते। वेदाध्ययनस्याऽधिकारोऽप्यनेन संस्कारेण प्राप्तो भवति। बालको गायत्रीमन्त्रस्य उपदेशं प्राप्य धार्मिकजीवनस्य आरम्भं करोति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. कदा क्रियते? – ब्राह्मणबालकानामष्टमे वर्षे क्षत्रियबालकानामेकादशवर्षे वैश्यबालकानां च द्वादशवर्षे उपनयनसंस्कारो विधीयते।

४. विधिः– विशेषतया पञ्चदिवसात्मकस्त्रिदिनात्मको वा विधिर्भवति। स्नानं, सङ्कल्पो, मुण्डनम्, आचार्यस्य समीपे गुरु–दीक्षा, यज्ञोपवीत–धारणं, गायत्रीमन्त्र–दीक्षा, भिक्षाटनम् इत्यादयो मुख्या विधयो भवन्ति। एष संस्कारः केवलं धार्मिक एव नाऽपि तु सांस्कृतिकः शिक्षात्मकश्चास्ति। अनेन बालक उत्तरदायित्वयुक्तं जीवनं प्रारभते।

अतः *सत्यं वद। धर्मं चर। धर्मान्न प्रमदितव्यम्।* इत्यादयो वेदस्योद्घोषा वर्तन्ते। सनातनवैदिकधर्मे मानवानां संरक्षणार्थं, आचारशीलप्रवर्धनाय,सर्वजनहिताय,सर्वजनसुखाय च वैदिकवाङ्मय प्रतिपादितं सर्वाधिकं महत्त्वाधायकं रहस्यं धर्ममेव मन्यते। धर्मस्य मूलं वेद एव। स च वेदः सर्वासां विद्यानां मूलभूतः। वेदवृक्षमाश्रित्यैव सर्वाणि शास्त्राणि प्रभवन्ति। तस्यैव वेदस्य षडङ्गानि सन्ति। तानि यथा शिक्षा, कल्पो, व्याकरणं, छन्दो,निरुक्तं, ज्योतिषञ्चेति। एतेषु वेदाङ्गेषु कल्पभाग एव धर्मशास्त्रस्याऽन्तर्भावः। अतः कल्पभागादेव धर्मशास्त्रस्योद्भवः समभूत्। कल्पभागो वेदपुरुषस्य हस्ततुल्यो भवति। प्राचीनशास्त्रवत् कल्पभागोऽपि सूत्रमय आसीत्। कल्पसूत्रं चतुर्विधं भवति।श्रौतसूत्रं, शुल्वसूत्रं, धर्मसूत्रं, गृह्यसूत्रं चेति। तत्र श्रौतसूत्रेषु यागानुष्ठानविधयः, शुल्वसूत्रेषु यागवेदि–यागपात्रकुण्डादीनां निर्माणविधयो, धर्मसूत्रेषु धर्मशास्त्रीयविषयाणां विचाराः, गृह्यसूत्रेषु च कर्मकाण्डीयविषयाणां संस्कारादीनामनुष्ठानविधयः प्रतिपादिताः सन्ति।

मानवविकासस्य प्रारम्भे मानवा अपि पशुवद् व्यवहारं कुर्वन्ति स्म। मनस्सौन्दर्यज्ञानस्य प्रादुर्भावेन ते प्राणिषु पृथक् वैशिष्ट्ययुताः सञ्जाताः। अस्य मूलकारणमेव धर्म इति प्रमाणीक्रियते।

२. समस्याकथनम्

धर्मशास्त्रदृष्ट्योपनयनसंस्कारविवेचनम् इति शीर्षकोपरि लिखितेऽस्मिन् लेखे विविधाः समस्याः सन्ति। तासु काश्चन मुख्याः समस्या निम्नलिखिताः सन्ति।

१. कथं तिथ्यादयो निर्णीयन्ते? यज्ञोपवीतनिर्णयो, मेखलाविचारो, दण्डवेद्यादिसम्पादनम्, ब्रह्मचारिधर्मा अस्य परिभाषा, तस्य स्वरूपञ्च कीदृशमस्ति?

२. धर्मशास्त्रदृष्ट्योपनयनसंस्कारस्य प्रयोजनं किम्?

३. आचार्यस्य चयनम्, पदार्थसम्पादनञ्चेत्येतेषां विषयाणां विधिर्नियमाश्च के सन्ति? इति।

३. उद्देश्यकथनम्

आपाततो मूलभूतसमस्या उपरिदर्शिताः, तासु समस्यासु केन्द्रीभूय तत्समाधानमेवाऽस्य लेखस्य मुख्यमुद्देश्यमस्ति।यथा :

१. तिथ्यादीनां निर्णयप्रदानम्, यज्ञोपवीत–मेखला–दण्ड–वेद्यादिसंपादन–ब्रह्मचारिधर्मादीनां निर्णयप्रदानम्।

२. धर्मशास्त्रदृष्ट्योपनयनसंस्कारस्य प्रयोजननिर्धारणम्।

३. आचार्यस्य चयनं, पदार्थसम्पादनम् इत्येतेषां विषयाणां विधिनियमानां च निर्धारणम्।

४. शोधविधिः

शोधसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते। तेषु प्रामुख्येन पुस्तकालयविधिरेवाऽत्र सामग्रीसङ्कलने प्रयुक्तः। तथा चाऽस्मिन् लेखे धर्मशास्त्रविषयप्रतिपादकाः

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतमूलाऽऽकरग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीताः सन्ति। व्याख्यानक्रमे च विशेषतो निगमनविधेस्तथा यथावश्यकमागमनविधेश्च प्रयोगो विहितो वर्तते। व्याख्यात्मक-विश्लेषणात्मकविधिद्वयस्यापि प्रयोगः कृतः।

५. शोधसीमाङ्कनम्

धर्मशास्त्रदृष्ट्या उपनयनसंस्कारविवेचनमस्य व्यवस्थाऽस्योत्पत्तिनिरूपणपूर्वकं तिथ्यादयःकथं निर्णीयन्ते? यज्ञोपवीतनिर्णयो, मेखलाविचारो, दण्डवेद्यादिसंपादनं, ब्रह्मचारिधर्माः,अस्य परिभाषा, तस्य स्वरूपं च कीदृशमस्ति? सैद्धान्तिकाधारश्च कीदृशः? धर्मशास्त्रदृष्ट्योपनयनसंस्कारस्य प्रयोजनं किम्?, आचार्यस्य चयनम्, पदार्थसम्पादनं च कथं विधीयते?इत्यादिविषये विशदी-व्याख्यायाः प्रदर्शनं चाऽस्याऽनुसन्धानकार्यस्य क्षेत्रमस्ति। शास्त्राऽनुसारेण विदुषां मतमनुसृत्य सङ्क्षेपेण धर्मशास्त्रदृष्ट्योपनयनसंस्कारस्य विवेचनम्, एवं धर्मशास्त्रदृष्ट्या तस्य कर्तव्याऽकर्तव्ययोर्व्याख्यानं तद्भ्रान्तिनिरूपणं चाऽस्य लेखस्य सीमा वर्तते।

६. सैद्धान्तिकाधारः

'उप'उपसर्गपूर्वकाद्'नी'धातोः ल्युट्प्रत्यये कृते सत्युपनयनशब्दो निष्पद्यते। यस्यार्थो भवति समीपेनयनम्। उपनयनं नामाऽऽचार्यसमीपनयनाङ्गको गायत्र्युपदेशप्रधानकः कर्मविशेषः। यथा-

गृह्योक्तकर्मणा येन समीपं नीयते गुरोः।
बालो वेदाय तद्योगाद् बालस्योपनयनं विदुः॥ धर्मसिन्धुसारः तृ.प.पू., पृ.३८५।

तत्राधिकारिणः-

पितैवोपनयनेत्पुत्रं तदभावे पितुः पिता।
तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ धर्मसिन्धुसारः तृ.प.पू., पृष्ठ.४२९।

तदभावे सगोत्रपिण्डः। तदभावे मातुलादयोऽसगोत्रसपिण्डः। तदभावेऽसपिण्डसगोत्रजः। एते च कुमारापेक्षया वयोज्येष्ठो विवक्षितः, कनिष्ठकर्तृकोपनयनस्य निषिद्धत्वात्। सर्वाऽभावे श्रोत्रियः।

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।
विद्वत्त्वाच्चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥
कृच्छ्रत्रयं चोपनेता त्रीन् कृच्छ्रांश्च वटुश्चरेत्॥ धर्मसिन्धुसारः तृ.प.पू., पृष्ठ.४२९।

गायत्र्या द्वादशाधिकसहस्रजपश्चोपनेत्राऽधिकारसिद्ध्यर्थं कार्यः। केचिद् द्वादशसाहस्रीं जपन्ति।

उपनेतृक्रममाह वृद्धगर्गः-

पिता पितामहो भ्राता ज्ञातितो गोत्रजाग्रजाः।
उपनयेऽधिकारी स्यात् पूर्वाभावे परः परः॥ संस्कारदीपकः, पृ.२२८।

अथोपनयनकालः-

गर्भतो जन्मतो वा पञ्चमेऽष्टमे वा वर्षे ब्राह्मणस्योपनयनम्। एकादशेद्वादशे वा क्षत्रियस्य। द्वादशे षोडशे वा वैश्यस्य। धर्मसिन्धुसारः तृ.प.पू. पृ.४३०।

मनुः-

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥ मनुस्मृति २.३६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपनयनमेवोपनायनम्, स्वार्थे णिच्। आषोडशाद् आद्वाविंशाद्, आचतुर्विंशाच्च वर्षाद् ब्राह्मणादेर्गौणकालः। गौणकालस्य निर्देशनं कृतवान् मनुः। यथा–

आषोडशाद् ब्राह्मणस्य सावित्री नाऽतिवर्तते।आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः॥ मनुस्मृतिः २.३८।

याज्ञवल्क्यः–

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्। राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ याज्ञ.स्मृ. १.१४।

सैके = एकेन सहिते एकादशे द्वादशे इत्यर्थः। एकादश इति सैके इत्युभयत्रापि गर्भग्रहणमनुवर्तनीयम्, उपदर्शितगोभिलादिसंवादात्। एके यथाकुलं कुलस्थित्या केचिदुपनयनमिच्छन्ति। मनुः–

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे॥ मनुस्मृतिः २.३७।

वेदाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्चसम्। हस्त्यश्वादिराज्यबलं बलशब्दार्थो, यद्यपि बालस्य कामना न सम्भवति, तथाप्युपनेतृगतफलकामना तस्मिन्नुपचर्यते। उपनयनमुपक्रम्य आपस्तम्बः– *सप्तमे ब्रह्मवर्चसकामं अष्टमे आयुःकामं नवमे तेजस्कामं दशमेऽन्नाद्यकामम् एकादशे इन्द्रियकामम् द्वादशे पशुकामम्।* इति कथयति।

विष्णुः–

षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे।
अष्टमे सर्वकामस्य नवमे कान्तिमिच्छतः॥ संस्कारदीपकः, पृष्ठ. २२६।

तत्र पारस्करः– 'अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा। प्रसवाऽनन्तरमष्टौ वर्षाणि यस्यासावष्टवर्षैः, तादृशं ब्राह्मणमुपनयेत्, गर्भाष्टमे वाऽथवा गर्भवर्षाऽपेक्षया योऽष्टमो वर्षस्तस्मिन्नुपनयेदित्यर्थः। ऐच्छिकोऽत्र विकल्पः। तथैकादशवर्षं राजन्यम्, तथा द्वादशवर्षं वैश्यम्। स्मृत्यर्थसारे– उपनयनं च विधिनाऽऽचार्यसमीपनयनम् अग्निसमीपनयनं वा सावित्रीवाचनं वा, अन्यदङ्गमिति।

उपनयनमुपक्रम्याऽऽपस्तम्बः *सप्तमे ब्रह्मवर्चसकामं अष्टमे आयुः कामं नवमे तेजस्कामं दशमेऽन्नाद्यकामम् एकादश इन्द्रियकामं द्वादशे पशुकामम्।*

पौलस्त्यः–

पञ्चमे षष्ठवर्षे तु सगर्भे सप्तमेऽपि वा। गुरुसूर्यशशाङ्कानां विशुद्ध्यारम्भयेद् व्रतम्॥

यथोक्तकालेषूपनयनाऽसम्भवे त्वाह पारस्करः– *आषोडशाद् वर्षाद् ब्राह्मणस्यानतीतः कालो भवति।* षोडशाद् वर्षादर्वाग् ब्राह्मणस्याऽनतीतोऽनतिक्रान्तः काल उपनयनसमयो भवतीत्यर्थ इति कर्कहरिहरगदाधरादयः। उत्तरसूत्रेऽत उर्ध्व इति तु नारायणभाष्यम्, विज्ञानेश्वरमुरारिमिश्रादयोऽप्येवम्। अनयोर्मतयोर्गर्भजन्मप्रभृति-गणनाभ्यामविरुद्धार्थता। तथा च माण्डव्यः–

व्रतबन्धे विवाहे च वत्सरपरिगणनमाहुराचार्याः। आधानपूर्वकमेके प्रसूतिपूर्वं सदान्ये तु॥

तथा– *आद्वाविंशाद् राजन्यस्य, तथाऽऽचतुर्विंशाद् वैश्यस्य, एते पूर्वसूत्रवद्व्याख्येये। तथा– अत उर्ध्वं पतितसावित्रीका भवन्ति।अतः पञ्चदशादेकविंशात् त्रयोविंशाच्च वर्षादूर्ध्वं यथाक्रममनुपनीता ब्राह्मणादयः पतितसावित्रीका अधिकाराभावात् पतिता स्खलिता सावित्री येभ्यस्तथाभूता भवन्ति सम्पद्यन्त इत्यर्थ इति कर्कादयः। अत उर्ध्वं षोडशादेर्वर्षादूर्ध्वमिति नारायणादयः।*

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्यः-

आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥ याज्ञ. स्मृ. आ.अ., ३७-३८।

नातःपरमुपनयनकालोऽस्तीत्यर्थः। सावित्रीपतिताः पतितसावित्रीकाः। अत्र व्रात्यस्तोमेकृते सत्युपनयनाधिकारो न तूपनयनस्थान एव व्रात्यस्तोमविधिः, तस्य प्रायश्चित्तरूपस्य संस्कारत्वे मानाभावात्। उक्तं च कात्यायनेन-

लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते। प्रायश्चित्ते कृते पश्चात् तत्तत्कर्म समाचरेत्॥ मनुस्मृतिः २.३८.।

अत्रायं सङ्क्षेपः- गर्भाष्टमोऽष्टमो वा वर्षो ब्राह्मणस्य, गर्भैकादशः क्षत्रियस्य, गर्भद्वादशो वैश्यस्योपनयने मुख्यः कालः। तत ऊर्ध्वं गर्भषोडशगर्भद्वाविंशगर्भचतुर्विंशपर्यन्तो यथाक्रमं गौणः। अत ऊर्ध्वं यथाशास्त्रं प्रायश्चित्तं कृत्वोपनयनाधिकारिणो भवन्ति। पञ्चमवत्सरादौ तूपनयनं काम्यमिति।

अत्र गर्भादिः संख्या। तथा च जन्मतः पञ्चदशवर्षपर्यन्तं विप्रस्य न विशेषतः प्रायश्चित्तम्। षोडशे वर्षे सशिखवपनमेकविंशतिरात्रं यावकाशनव्रतमन्ते सप्तब्राह्मणभोजनमिति प्रायश्चित्तम्। सप्तदशादिवर्षे कृच्छ्रत्रयादिप्रायश्चित्तपूर्वकमुपनयनं बोध्यम्। विप्रक्षत्रिययोरुत्तरायणे मौञ्जीबन्धः। वैश्यस्य दक्षिणायनेऽपि। वसन्ते ब्राह्मणमुपनयीत। ग्रीष्मे राजन्यं शरदि वैश्यम्। माघादिशुक्रान्ताः पञ्चमासाः साधारणा वा सकलद्विजानाम् इति गर्भोक्तेर्वसन्ताऽलाभे शिशिरग्रीष्मावपि ग्राह्यौ। वसन्तविधिनोत्तरायणादिविधेः सङ्कोचाऽयोगात्। एवं च माघादिमासपञ्चकनियमात् पौषाषाऽऽढयोः सत्यप्युत्तरायणे उपनयनं न कार्यम्। तत्रापि मीनार्कमारभ्य यावन्मिथुनप्रवेशं प्रशस्तः कालः। मीनमेषयोस्तु प्रशस्ततरः।

मकरकुम्भस्थेऽर्के मध्यमं मीनमेषस्थ उत्तमम्। वृषभमिथुनस्थेऽधममुपनयनम् इत्यभिधानात्॥ ध.सि.तृ.प.

अथ तिथ्यादयो निर्णीयन्ते-

द्वितीयातृतीयापञ्चमीषष्ठीदशम्येकादशीद्वादश्यः प्रशस्ताः। क्वचित् सप्तमीत्रयोदशीकृष्णप्रतिपद्भिधिः पुनरुपनयनमूकाद्युपनयनविषयः।

तिथौ सोपपदाख्यायामनध्याये गलग्रहे। अपराह्णे चोपनीतः पुनः संस्कारमर्हति॥

सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता । चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः॥

अनध्यायाः पौर्णमासी चतुर्दश्यष्टमी अमा। प्रतिपत्सूर्यसंक्रान्तिर्मन्वाद्याश्च युगादयः॥

कृष्णपक्षे द्वितीयाश्च कार्तिकाषाढफाल्गुने। धर्मसिन्धुसारः तृ.प. पृष्ठ.४३२।

विषुवायनसंक्रान्त्योः पक्षिण्यनध्याय इति पूर्वपरिच्छेद उक्तम्। सोपपदानामनध्यायतिथीनां च दिनद्वये सूर्योदयोत्तरं सूर्याऽस्तात्पूर्वं च त्रिमुहूर्तसत्त्वे दिनद्वयमनध्यायः। शिष्टास्तु प्रतिपच्छेषघटिकादिमात्रेऽपि व्रतबन्धेऽनध्यायं वदन्ति।(धर्मसिन्धुसारः तृ.प.पृ.४३२)

उपनयनेवारग्रहस्थित्यादिविषयकोविचारः

इत्थं तिथिं तत्प्रसङ्गप्राप्तमनध्यायादिकं च विचार्य वारादि चिन्त्यते। गुरुशुक्रबुधवाराः श्रेष्ठाः भवन्ति। सूर्यवारो मध्यमः भवति। भौममन्दवारौ निषिद्धौ। सामवेदिनां क्षत्रियाणां च भौमवारः प्रशस्तः। शास्त्रे चन्द्रवारोऽधमो निर्दिशति। सामवेदिनां क्षत्रियाणां च भौमवारः प्रशस्त इति शास्त्र उक्तम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शाखाधिपतिवारश्च शाखाधिपबलं तथा। शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते॥
गुरुशुक्रौ भौमबुधावृग्वेदाद्यधिपाः स्मृताः। पती सितेज्यौ विप्राणां नृपाणां कुजभास्करौ॥
वैश्यानां शशभूत्सौम्याविति वर्णाधिपाः स्मृताः। पितुः सूर्यबलं श्रेष्ठं शाखावर्णेशयोर्वयेः।
पितुर्वटयेश्च सर्वेषां बलं वाक्पतिचन्द्रयोः॥

बटुतत्पित्रोरुभयोर्गुरुचन्द्रबलाऽलाभे बटोरुभयबलमावश्यकम्। तत्र चन्द्रबलं गर्भाधानप्रसङ्ग उक्तम्। द्विपञ्चसप्तनवैकादशस्थो गुरुः शुभफलप्रदः। जन्मतृतीयषष्ठदशमस्थानेषु पूजाहोमात्मकशान्त्या शुभः। चतुर्थाष्टमद्वादशस्थानेषु दुष्टफलप्रदः। कर्कधनुर्मीनराशिषु चतुर्थादिस्थानेष्वपि न दोषः। अतिसङ्कटे चतुर्थद्वादशस्थो द्विगुणपूजाहोमादिना शुभः। अष्टमस्तु त्रिगुणपूजादिना शुभः। केचिदनिष्टो वामवेधेन शुभइत्याहुस्तन्नेति राजमार्तण्डः। अष्टमवर्षादिमुख्यकाले गुरुबलाऽभावेऽपि मीनगतरवियुतचैत्रे वा शान्त्या वा व्रतबन्धः कार्यो न तु मुख्यकालाऽतिक्रमः नित्यकालस्य बलीयस्त्वात्।(धर्मसिन्धुसारः तृ. प. पृष्ठ. ४३६)

यथा नारदः-

सर्वेषां जीवशुक्रज्ञवाराः प्रोक्ता व्रते शुभाः।चन्द्रार्कौ मध्यमौ ज्ञेयौ सामबाहुजयोः कुजः॥ ध.सि.तृ.प.।

अथ नक्षत्राणि- पूर्वात्रयहस्तचित्रास्वातीमूलाऽश्लेषार्द्राश्रवणेषु ऋग्वेदीनां मौञ्जकार्यं प्रशस्तम् भवति। रोहिणीमृगपुष्य-पुनर्वसुत्र्युत्तराहस्ताऽनुराधाचित्रारेवतीषु याजुषाणाम् प्रशस्तं। अश्विनीपुष्योत्तरात्रयाऽऽर्द्रा-हस्त-धनिष्ठा-श्रवणेषु सामगानाम्। अश्विनीमृगानुराधाहस्तधनिष्ठापुनर्वसुरेवतीषु चाऽथर्ववेदीनाम्। एतेषां नक्षत्राणामसम्भवे भरणीकृत्तिकामघाविशाखाज्येष्ठाशततारका वर्जयित्वा सर्वाणि सर्वेषां ग्राह्याणि। राजमार्तण्डे पुनर्वसुनिषेधो निर्मूलञ्च इति बहवः विद्वांशः वदन्ति। केचिद् ऋक्सामवेदिनः पुनर्वसुनिषेध इत्याहुः। व्यतीपातवैधृतिपरिघार्धेषु, विष्कुम्भादीनां निषिद्धनाडीषु, भद्रायां, ग्रहणे च मौञ्जी वर्ज्या। उपर्युक्त विचारः ज्योतिर्निबन्धग्रन्थाद् अपि स्पष्टं भवति, यथा पूर्वाहस्तत्रये सार्पश्रुतिमूलेषु बह्वृचाम्। यजुषां पौष्णमैत्रार्कादित्यपुष्यमृदुध्रुवैः। सामगानां हरीशार्कवसुपुष्योत्तराश्विभैः। धनिष्ठादितिमैत्रार्केष्विन्दुपोष्णेष्वथर्वणाम्॥ ध.सि.तृ.प.।

ग्रहमखविचारः

विवाहोपनयनादिष्वभ्युदयकर्मस्वादौ ग्रहयज्ञंकुर्यात्।श्राद्धाऽतिरिक्तेष्वनाभ्युदयिकेष्वपि शान्त्यादिकर्मसु ग्रहानुकूल्यकामो ग्रहयज्ञं कुर्यात्। अरिष्टनिरासार्थमुत्पातेषु शान्तिस्थानेष्वप्रधानोऽपि ग्रहमख उक्तः। प्रमुखकर्मसु पूर्वमव्यवहिते व्यवहिते वा काले कुर्यात्। व्यवहितपक्षे सप्तदिनाऽधिकव्यवधानं न कार्यमृइति धर्मसिन्धुकारो वदति। प्रतिग्रहं दशाऽवरप्रधानाऽऽहुतिसङ्ख्यायामेकस्य एव ऋत्विजः आवश्यकः। यदि दशाधिकपञ्चाशत्पर्यन्तसङ्ख्याया आहुतिनां चत्वारऋत्विजः इति धर्मसिन्धुकारस्य वचनम्। तत ऊर्ध्वं शताऽवरहोमे तु अष्ट संख्यका ऋत्विजो भवन्ति। नवतमआचार्यःइति स्मर्यते।

तत्राऽऽचार्य आचार्यकर्म कृत्वाऽऽदित्याय जुहुयात्। अष्टभ्यः सोमादिभ्योऽष्टावृत्विजो जुहुयुः। ऋत्विक्चतुष्टयपक्षे द्वाभ्यां ग्रहाभ्यामेकैको जुहुयात्। आचार्योऽर्काय। ताम्रादिमयीषु प्रतिमासु सर्वासु सौवर्णीषु वा फलेष्वक्षतपुञ्जेषु वाऽऽदित्यादिपूजनम्।(धर्मसिन्धुसारः तृ. प. पृ.४४६)

अथ पदार्थसम्पादनम्- कौपीनं प्रावारं च कार्पासजमहतं सम्पाद्येषद्धौतं नवं श्वेतं सदशं वस्त्रमहतं संज्ञं प्रावारार्थमजिनं वा। तच्च त्र्यङ्गुलं चतुरङ्गुलं वा बहिर्लोमाखण्डं त्रिखण्डं वाऽष्टचत्वारिंशदङ्गुलं धार्यम्। त्रिखण्डपक्षे चतुर्विंशत्यङ्गुलाऽष्टाङ्गुलषोडशाऽङ्गुलाः क्रमेण त्रयः खण्डाः।

स्मृत्यर्थसारे-

कौपीनं कटिसूत्रं च यतेः स्याद् ब्रह्मचारिणः। ग्राह्यं नैव गृहस्थस्य श्रौते स्मार्ते च कर्मणि॥

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गौतमेनाऽपि–

'कार्पासं वाऽविकृतम्' इति। गौ.ध.सू.त्र., १.१.१८.।

मनुः–

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥ म. स्मृ., २.४१।

अथ यज्ञोपवीतनिर्णयः

कार्पासं यज्ञोपवीतम्। तन्निर्माणप्रकारः– ब्राह्मणेन ब्राह्मणस्त्रीभिर्विधवादिभिश्च निर्मितं सूत्रं ग्राह्यम्। संहतचतुरङ्गुलिमूलेषु षण्णवत्या सूत्रमावेष्ट्य तत् त्रिगुणीकृत्योर्ध्ववृत्तं वलितं कृत्वा पुनरधोवृत्तरीत्या त्रिगुणीकृतं तत्सूत्रं नवतन्तुकं सम्पद्यते। तत् त्रिरावेष्ट्य दृढग्रन्थिं कुर्यात्।**स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्कथञ्चन। विच्छिन्नं वाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत्॥ ध. सि.तृ.प.।**

मनुः– **कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥ म.स्मृ. २.४४।**

कात्यायनः– **पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम्॥ कात्यायनस्मृतिः, १.३.।**

देवलः– **शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके। आवृत्य षण्णवत्या तत् त्रिगुणीकृत्ययत्नतः॥ ध.सि.तृ.प.।***सिद्धे मन्त्राः प्रयोक्तव्याः* इति न्यायेन सिद्धं यज्ञोपवीतं त्रिगुणीकरणादिमन्त्रैरभिमन्त्र्य *यज्ञोपवीतं परम*मिति मन्त्रेण धारयेत्। तद्यथा– गायत्र्या त्रिगुणीकृत्याऽऽपोहिष्ठेति तिसृभिः प्रक्षाल्य पुनर्गायत्र्या त्रिगुणीकृत्य ग्रन्थौ विष्णुब्रह्मरुद्रान्नमेत्। केचिन्नवतन्तुषु नवदेवतान्यासमाहुः। ततो गायत्र्या दशवारमभिमन्त्रिताभिरद्भिर्यज्ञोपवीतं प्रक्षाल्य*उदुत्यमि*ति त्यृचेन सूर्याय प्रदर्श्य*यज्ञोपवीत*मिति मन्त्रेण प्रथमं दक्षिणबाहुमुद्धृत्य पश्चात्कण्ठे धारयेदिति।

उपवीतं ब्रह्मसूत्रं प्रोद्धृते दक्षिणे करे।प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ॥धर्मसिन्धुसारः तृ.प.पृ.४४०

चितिकाष्ठचितिधूमचण्डालरजस्वलाशवसूतिकास्पर्शे स्नात्वा यज्ञोपवीतत्यागः। कण्ठलम्बितत्वाद्यकृत्वा मलमूत्रोत्सर्गे च तत्त्यागः। मासचतुष्टयोत्तरं च यज्ञोपवीतत्यागः। केचिज्जननशावाऽऽशौचयोरन्तेऽपि तत्त्यागमाहुः।

अथ मेखलाविचारः

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला। त्रिवृत्ता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव च॥

मुञ्जाभावे तु कर्तव्या कुशाश्मन्तकबल्वजैः॥ धर्मसिन्धुसारः तृ.प.पृ.४४३।

अथ दण्डवेद्यादिसम्पादनम्

ब्राह्मणस्य भवेद् दण्डः पालाशः केशसम्मितः।
सर्वेषां यज्ञियो वा स्यादूर्ध्वं नासाग्रसम्मितः॥ धर्मसिन्धुसारः तृ.प.पृ.४४३।

बटुहस्तेन चतुर्हस्ता हस्तोच्छ्रिता चतुरस्रा सोपानाङ्किता प्रागुदक्प्रवणा कदलीस्तम्भाद्यलङ्कृता वेदिः सम्पाद्या। अथोपनयनान्तर्गतपदार्थेषु विशेष उच्यते– वासःपरिधानोत्तरं लौकिकमाचमनम्। यज्ञोपवीतधारणोत्तरं तु यथाविधि आचमनविधिर्वक्ष्यते। एवमाज्यपात्रादुत्तरभागे बटुमाचमनं कारयित्वा प्रणीतापश्चिम–देशरूपतीर्थेन प्रवेश्याऽऽचार्याऽग्न्योर्मध्येन नीत्वाऽऽचार्यदक्षिणत उपवेशयेत्। ततो बर्हिरास्तरणादिस्रुवसम्मार्गान्ते यज्ञोपवीत–दानाद्याचमनान्तम्। ततः शिष्याञ्जलौ जलाऽवक्षारणादि–समिदाधानान्तं गायत्र्युपदेशाङ्गं बटोः शुचित्वसिद्धये–

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऽग्नये समिधमिति मन्त्र एकश्रुत्या प्रयोक्तव्यः। ततः परिदानाऽभिवादनान्त आचारप्राप्तं गायत्रीपूजनं कृत्वाग्नेरुत्तर-देशे गायत्र्युपदेशः कार्यः। अवक्षारणमप्युत्तरदेशे उक्तम्। प्राङ्मुख आचार्यः प्रत्यङ्मुखायोपविष्टाय बटवे गायत्रीमुपदिशेत्।

अथ ब्रह्मचारिधर्माः

तत्र सन्ध्यात्रयमग्निपरिचरणं भैक्षं च नित्यम्। तत्राऽग्निकार्यं प्रातः सायं च। सायमेव सकृद्वा। तत्र पलाशखदिराऽश्वत्थशमीसमिधः श्रेष्ठास्तदलाभेऽर्कवेतसानां,भवच्छब्दपूर्विका भिक्षा विप्राणाम्। सा च विप्रगृहेष्वेव। आपदि शूद्रगृहेष्वामान्नं गृह्णीयात्। हव्ये श्राद्धभिन्नकव्ये चाऽभ्यर्थितो भुञ्जीत। अस्य ब्रह्मयज्ञोऽपि नित्यः। स चोपाकरणात्पूर्वं गायत्र्या कार्यः। गुरूच्छिष्टं मध्वादिकं निषिद्धमपि तदन्यापहार्यरोगनिवृत्यर्थं भक्षणीयम्।

याज्ञवल्क्यः- **मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्। भास्करालोकनाश्लीलपरिवादादि वर्जयेत्॥ याज्ञ. स्मृ.आ.अ. ३३.।**

मनुः- **अभ्यङ्गमञ्जनं चाक्ष्णोरूपानच्छत्रधारणम्। कामं क्रोधं च लोभं च नर्तनं गीतवादनम्॥ म. स्मृ. २/१९८.।**

मेखलोपवीतादौ त्रुटिते जले प्रास्यान्यद्धारयेत्।

यथा मनुः- **मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । अप्सु प्रास्य विनष्यनि गृह्णीतान्यानि मन्त्रवत्॥ म. स्मृ. २/६४.।**

कलिकालेऽस्मिंस्तावदनध्यायपालनस्य दुर्मेधसामशक्यत्वात्। तथा च हेमाद्रौ स्मृतिः- **चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेवसर्वदा। दुर्मेधसामनध्यायास्त्वन्तरागमनेषु च॥** अतः कलौ प्रतिपद्वयमष्टमीद्वयं चतुर्दशीद्वयं पूर्णिमा दर्शोऽयनसंक्रान्तिरित्येतावत एवानध्यायां-स्त्यक्त्वा वेदशास्त्रादिकमध्येतव्यम्।

पुंसां प्रायोपप्रज्ञत्वात्। शिष्टाचारोऽप्येवमेव। पूर्वदिने सायं परत्र प्रातश्च त्रिमुहूर्ताऽनध्यायतिथि-सत्त्वउदयेऽस्तमये वाऽपीत्यनेन दिनद्वयेऽनध्यायप्राप्तौ वचनान्तरं केचिदाहुः।

यमः-

अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी। हन्ति पञ्चदशी मेधां तस्मात्सर्वाणि वर्जयेत्॥ ध.सि.तृ.प.।

वाल्मीकि रामायणेऽपि : **सा स्वभावेन तन्वङ्गी त्वद्वियोगाच्च कर्शिता। प्रतिपत्पाठशीलस्य विद्येव तनुतां गता॥** वाल्मीकिरामायणम्।

हेमाद्रिः-

अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी। अमावास्योभयं हन्ति प्रतिपत्पाठनाशिनी॥ ध.सि.तृ.प.।

गुरुलक्षणमाह-

निषेकादीनि कर्माणि यः करोति यथाविधि। सम्भावयति चान्नेन स विप्रो गुरुरुच्यते॥ म. स्मृ. २/१४२।

निषेको गर्भाधानम्, तेन पितुरयं गुरुत्वोपदेशः। गर्भाधानादीनि संस्कारकर्माणि पितुरुपदिष्टानि यथाशास्त्रं यः करोति, अन्नेन च संवर्धयति स विप्रो गुरुरुच्यते।

व्यासोऽपि-

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्याच् श्रुतो यः क्रियते तथा॥ व्याससमृतिः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्योऽपि–

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति॥ याज्ञ. स्मृ.आ.अ. ३४.।

अर्थाद् योऽसौ गर्भाधानाद्या उपनयनपर्यन्ताः क्रिया यथाविधि कृत्वा वेदमस्मै ब्रह्मचारिणे प्रयच्छति स गुरुः।

उपनयनसंस्कारस्य प्रयोजनम्

मूलतः शिक्षा एवोपनयनसंस्कारस्य प्रयोजनम्। वेदस्य कस्या अपि शाखाया अध्ययनात् पूर्वम् उपनयनसंस्कारस्यानुष्ठानं कर्तव्यमासीत्, न केवलं वारमेकम् अध्ययनात् पूर्वम्। प्रमाणञ्चाऽत्र प्राप्यते–

यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत्।
तच्छाखाऽध्ययनं कार्यमेवं न पतितो भवेत्॥ वसिष्ठसंहिता, ३३७।

याज्ञवल्क्यानुसारेण उपनयनस्य सर्वोच्चप्रयोजनं वेदाध्ययनमेव। महाव्याहृत्या शिष्यस्योपनयनं कृत्वा गुरुणा तस्मै शिष्यायाऽऽचारस्य शौचस्य च शिक्षा प्रदातव्या। उक्तञ्च–

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥ याज्ञ. स्मृ. १.१५।

भारद्वाजस्तु विद्याप्राप्तिरेव उपनयनस्योद्देश्यम् इति स्वीकरोति। तद्यथा–

उपनयनं विद्यार्थस्य श्रुतितः संस्कार इति॥ आ.ध.सू., १.।

परञ्चाऽग्रे संस्कारस्य शिक्षात्मकं प्रयोजनं गौणं सञ्जातम्। अस्य मतस्य प्रथमः प्रतिपादको गौतम आसीत्। अष्टचत्वारिंशत्संस्कारैः संस्कृतव्यक्ति ऋषीणां सान्निध्यं प्राप्नोति। मनुस्मृत्यनुसारेणाऽपि संस्कारेण मानवस्यैहिकं पारलौकिकजीवनञ्च पवित्रं भवति। यदोपनयनसंस्कार एको विद्यासंस्कार आसीत् तदा आचार्यद्वारा प्रदत्तस्य व्रताऽऽदेशस्य स्थानं गौणमासीत्। परञ्च यदा दैहिकसंस्काररूपः प्राप्तोऽयं संस्कारस्तदा तु संस्कारस्य कर्मकाण्ड एव महत्त्वपूर्णः सञ्जातः। स्वस्याऽन्तिमे विकास उपनयन संस्कार एकः पुरुषार्थः सञ्जातो यस्मिन् विद्याप्राप्तेर्भावनाया गौणत्वं सञ्जातम्। विकलाङ्गमानवानां कृते संस्कारोऽयं वर्णित आसीत् पूर्वम्। परञ्च कालेऽस्मिन् तेषां कृतेऽपि संस्कारोऽयमावश्यकः। उक्तञ्च–

तस्माच्च षण्ढबधिरकुब्जवामनपङ्गुषु। जडगद्गदरोगार्तशुष्काङ्गविकलाङ्गिषु॥

मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्॥वी.मि.सं.पृ. ३९९।

आचार्यस्य चयनम्–

यथासम्भवं श्रेष्ठतम आचार्यः पितैव प्राचीनकाले भवति स्म। यतो हि ब्राह्मणपरिवारे पितैवपुत्रं पाठयति स्म। तद्यथा–

पितैवोपनयेत् पुत्रं तदभावे पितुः पिता ।तदभावे पितुर्भ्राता तदभावे तु सोदरः॥

परञ्च कालान्तरे परिवर्तनं सञ्जातम्। यतो हि स्वयमाचार्यो ज्ञानसम्पन्नश्चरित्रवान् च न भवेत् तर्हि छात्रः कथं ज्ञानवान् चरित्रवान् च स्यात्। अत आचार्यस्य चयनं निश्चितसिद्धान्ताऽनुसारेण भवति स्म। आचार्यः कीदृशो भवेदिति जिज्ञासायामुक्तं यमेन–

सत्यवाग् धृतिमान् दक्षः सर्वभूतदयापरः। आस्तिको वेदनिरतः शुचिराचार्य उच्यते ॥

वेदाध्ययनसम्पन्नो वृत्तिमान् विजितेन्द्रियः। दक्षोत्साही यथावृत्तजीवनेहस्तु वृत्तिमान्॥ वी.मि.सं., पृ.४०८।

शौनकोऽपि–

कुमारस्योपनयनं श्रुताभिजनवृत्तवान्। तपसा धूतनिःशेषपाप्मा कुर्याद् द्विजोत्तमः॥ वी. मि. सं., पृ.४०८।

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हारीतोऽपि-

न याजयेद् वृत्तिहीनं वृणुयाच्च न तं गुरुम् । न हि मज्न्या करौ दिग्धौ रुधिरेण विशुध्यतः ॥ वी. मि. सं., पृ. ४०९ ।

परम्परातः पितैव संस्करमिमं करोति स्म। कदा संस्कारोऽयं कर्तव्यः? कश्च विधिस्तस्मिन् विषये नियमा निर्धारिता आसन्। तद्यथा- संस्कारसम्पन्नार्थं शुभसमयो निर्धारित आसीत्। सामान्यतः सूर्यस्योत्तरायणे संस्कारोऽयं कर्तव्यः। उक्तञ्च- *उत्तरायणगे सूर्ये कर्तव्यं ह्योपनायनम्*। पा.गृ.सू., २२.।

परञ्च वैश्य- क्षत्रियाणां कृते दक्षिणायनेऽपि कर्तव्यम्। तद्यथा- *दक्षिणे तु विशां कुर्यात्*। वी.मि. सं., ३४५।

ब्राह्मणस्य वसन्ततौ क्षत्रियस्य ग्रीष्मे वैश्यस्य शरदृतौ रथकारस्य वर्षर्तावुपनयनं जायते स्म। तद्यथा- *वसन्ते ब्राह्मणमुपनयति ग्रीष्मे राजन्यं शरदि वैश्यं वर्षासु रथकारमिति*। बौ.गृ.सू., २.५६।

अपरत्र च- *वसन्ते ब्राह्मणमुपनीत, ग्रीष्मे राजन्यं शरदि वैश्यम्*। पा.गृ.सू., २.२।

मासानां विषये त्वित्थमुक्तं राजमार्तण्डेन-

माघे मासि महाधनो धनपतिः प्रज्ञायुतः फाल्गुने। मेधावी भवति व्रतोपनयने चैत्रे च वेदान्वितः॥

वैशाखे निखिलोपभोगसहितो ज्येष्ठे वरिष्ठो बुधः। त्वाषाढे सुमहाविपक्षविजयी ख्यातो महान् पण्डितः॥

वी.मि.सं., पृ.५४।

अपरञ्च पारस्करगृह्यसूत्रे- *माघादिषु च मासेषु मौञ्जी मञ्चसु शस्यते*। पा. गृ.सू., २.२।

शिष्यस्योपनयात् पूर्वं कृत्यम्- संस्कारात् दिनत्रयपूर्वं व्रतं कर्तव्यम्। व्रतेऽस्मिन् ब्राह्मणबालको दुग्धं पीत्वैव व्रतं कुर्यात्, क्षत्रियबालको यवागूं वैश्यबालक आमिक्षाम्। तद्यथा- *पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्यः*। गो.गृ.सू., २.१०.७.।

संस्कारसम्पन्नार्थं मण्डलस्य निर्माणमपि कर्तव्यम्। तद्यथा- *पञ्चसु बहिः शालाया विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति*। पा.गृ.सू. १.४.२.।

संस्कारेऽस्मिन् शास्त्रसम्मताः परम्परासम्मताश्चानेके विधयः प्रचलिताः सन्ति। ब्रह्मभोजनं मण्डपाद्यर्चनं स्नानं वस्त्र-(कौपीन) धारणं, मेखलाधारणं, यज्ञोपवीतधारणं च । प्रतीकात्मककृत्यानि- हृदयस्पर्शः, शिष्यत्व-स्वीकरणं, सावित्रीमन्त्रधारणम्, अग्नेरावाहनं, भिक्षा, त्रिरात्रव्रतञ्च। अत उपनयनसंस्कारो जीवनस्य महत्त्वपूर्णः संस्कार इत्यनेन ज्ञायते।

निष्कर्षः

उपनयनसंस्कारो हिन्दुधर्मस्यैको महत्त्वपूर्णः संस्कारोऽस्ति। यस्योल्लेखो वैदिकसाहित्ये प्राप्यते। एष संस्कारो विशेषतो ब्राह्मणक्षत्रियवैश्यजातीनां बालकानां विद्यादानात् पूर्वं क्रियते। एतद् वैदिकाऽनुष्ठानमस्ति। यस्य मुख्यं लक्ष्यं बालकस्य गायत्रीमन्त्रोपदेशस्तथा वेदाध्ययनस्याऽधिकारप्रदानञ्च वर्तते। उपनयनसंस्कारस्य वैदिकी व्यवस्थाः

१. वेदेषु उल्लेखः -उपनयनसंस्कारस्योल्लेख ऋग्वेदे, यजुर्वेदे, सामवेदे चाऽस्ति। विशेषतो गृह्यसूत्रेषु (आपस्तम्बगृह्यसूत्रं, गौतमधर्मसूत्रम्, आश्वलायनगृह्यसूत्रम् इत्यादिषु) एष संस्कारो विस्तृतेन वर्णितोऽस्ति। आयुर्निर्धारणं :- ब्राह्मणस्य- अष्टमे (८) वा षोडशे (१६) वर्षे। क्षत्रियस्य- एकादशे (११) वा द्वाविंशति (२२) वर्षे। वैश्यस्य- द्वादशे (१२) वा चतुर्विंशति (२४) वर्ष उपनयनसंस्कारः कर्तव्यः। (मनुस्मृति -२.३६-३९ अनुसारेण)

 ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कारस्य प्रक्रिया- मुण्डनम् (केशवपनम्)। यज्ञोपवीतधारणम्। गायत्रीमन्त्रस्योपदेशः (गुरुणा शिष्यायोपदेशः)। समिदाधानम् (अग्निहोत्रे समिधासमर्पणम्)। भिक्षाऽटनम् (गुरुकुलेऽध्ययनार्थं प्रवेशः)

महत्त्वम्- एष संस्कारो बालकस्य द्विजत्वप्रापकः (द्वितीयजन्म) अस्ति। बालको ब्रह्मचर्यव्रते स्थित्वा विद्याऽध्ययनं करोति। धर्मशास्त्रेषु चेत एव आध्यात्मिकजीवनस्याऽऽरम्भो भवति।

उपनयनस्य वैदिकस्वरूपम्- उपनयनं केवलं धार्मिकः संस्कारो न, अपि त्वेष वैदिकशिक्षाया मूलम्। एतस्याः शिक्षाया माध्यमेन बालको वेदाध्ययनं, धर्मज्ञानं, सदाचारं च गृह्णाति। अत एष संस्कारो वैदिकसम्प्रदायस्य एकं प्रमुखमङ्गमस्ति।

कृतज्ञताज्ञापनम्

अस्मिन् आलेखे धर्मशास्त्रदृष्ट्योपनयनसंस्कारविवेचनम् इत्यस्मिन् विषये विश्लेषणक्रमे, सैद्धान्तिक-विषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि॥

सन्दर्भग्रन्थसूची-

आस्तम्बधर्मसूत्रम् (१९६९), हरदत्तकृतोज्ज्वलायुतम्, वाराणसी : चौखम्बा-अमरभारती-प्रकाशनम्।

कात्यायनस्मृतिः (१९९०), अष्टादश स्मृति, दिल्ली : नाग प्रकाशक।

गोभिलगृह्यसूत्रम् (१९८२), दिल्ली : भट्टनारायणभाष्ययुतम्।

गौतमधर्मसूत्र (वि सं २०६९), व्या. प्रमोधवर्धन कौडिन्न्यायनः, भावमीमांसा नेपाली व्याख्या, भोटहिटी काठमाडौँ : विद्यार्थी पुस्तक भण्डार।

धर्मसिन्धुः (१९०४), काशीनाथोपाध्यायकृतः, मुम्बयी :निर्णयसागरमुद्रणालयः।

धर्मसिन्धुसारः (वि.स.२०८० तृ.सं), काशीनाथोपाध्यायविरचितः, सुबोधिनी नेपाली टीकासहितः, टीकाकारः हेमराज शर्मा पौडेल, भोटाहिटी काठमाण्डौँ : विद्यार्थी पुस्तक भण्डार।

पारस्करगृह्यसूत्रम् (संवत् १९५२), कर्क, जयराम, हरिहर, गदाधरभाष्ययुक्त, वाराणसी।

बौधायनगृह्यसूत्रम् (१९८२), (बोधायनगृह्यपरिभाषासूत्रबोधायनगृयह्शेषसूत्रसहितम्), दिल्ली।

मनुस्मृतिः (सन् २००७), अनु. शिवराज आचार्यः कौण्डिन्न्यायनः, वाराणसी : चौखम्बा विद्याभवनम्।

याज्ञवल्क्यस्मृतिः (सन् २०६५), (मिताक्षरा), वाराणसी : चौखम्बा संस्कृत संस्थानम्।

योगरहस्यम् (सन् १९८४), परमहंस परिव्राजकाचार्य श्रीमद् वासुदेवानंद सरस्वती स्वामी महाराजकृत, प्राकृत अनुवाद, श्रीगुरुकृपा श्रीसंत मामासाहेब देशपांडे पथ, आनंदनगर, हिंगणे खुर्द, पुणे : विवरण विनायक गोविंद देसाई श्रीवामनराज प्रकाशनम्।

वशिष्ठसंहिता (२००६), गिरिजाशंकरशास्त्री, वाराणसी : चौखम्वा संस्कृतसिरीज अफिसः।

वाल्मीकिरामायणम् (१९९१), तिलक शिरोमणि भूषणव्याख्यात्रययुक्त (७ भाग), दिल्ली।

वीरमित्रोदयः (१९०६, १९३७), (१२ प्रकाश), मित्रमिश्रकृत, वाराणसी।

व्यासस्मृतिः (२००१) अनु. लोकनायक मुरलीधर, वाराणसी : चौखम्बा संस्कृत संस्थानम्।

संस्कारदीपकः (२०१५ वै.), (२ भाग), नित्यानन्दपर्वतीयकृत, वाराणसी।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालको अर्थव्यवस्थाका विशेषताहरू

सहप्रा. चन्द्रप्रसाद पौडेल

वाल्मीकि विद्यापीठ

लेखसार

नेपाल दुई छिमेकी देशहरू भारत र चीनको बिचमा रहेको भूपरिवेष्टित मुलुक हो । नेपालको पूर्व, पश्चिम र दक्षिणमा भारत र उत्तरमा चीनको स्वशासित क्षेत्र तिब्बत रहेको छ । नेपालको कुल क्षेत्रफल १४७१८१ वर्ग की.मी. छ । यो मुलुकका जनता आज पनि गरिबी, अशिक्षा, बेरोजगारीजस्ता समस्याहरूले घेरिरएका छन् । नेपालको आर्थिक विकासको दर न्यून छ । राजनैतिक अस्थिरता कायम रहनु, लगानीको अभाव हुनु, प्रतिबद्धता नहुनु, सिपयुक्त जनशक्तिको अभाव हुनु, प्राकृतिक सम्पदाको उचित प्रयोग नहुनु, योजना कार्यान्वियनमा फितलोपन व्याप्त रहनु तथा भ्रष्टाचार आदिका कारणले यहाँको अर्थव्यवस्था सङ्कटउन्मुख रहेको छ । नेपालको अर्थव्यवस्था मूलतः गरिबी, पछौटेपन, पुँजीको अभाव, आयातीत प्रविधि, कृषिमाथिको निर्भरता, उच्च जनसङ्ख्या वृद्धिदर, धार्मिक तथा साँस्कृतिक विविधता रहेको छ । प्रस्तुत आलेखमा यिनै सेरोफेरोमा रहेर नेपालको अर्थव्यवस्थाको विश्लेषण गरिएको छ ।

शब्दकुञ्जीः– *फितलोपन, पछौटेपन, सेरोफेरो, भूपरिवेष्टित, अग्रगति, उपभोग, आयात, निर्यात।*

१. विषय प्रवेश

नेपाल हजारौँ नदीनाला, सयौँ ताल, कुण्ड, छहरा, हरियाली वन, खनिज, स्रोत आदिले भरिपूर्ण मुलुक हो। भौगोलिक विविधताले सजिएको एक भूपरिवेष्टित देश हो। अनेकौँ आर्थिक विशेषताले चुलिएको यो मुलुक साच्चै लोभ लाग्दो छ। मनमोहक र आकर्षक यस मुलुकका कयौँ आर्थिक विशेषताका बारेमा यो लेख छ। अर्थव्यवस्थाका विशेषताका विषयमा खोज गरी यहाँ तिनका बारेमा उल्लेख गरिएको छ। विश्वमै प्राकृतिक स्रोत र साधनले नेपाल सम्पन्न छ। मुलुकको आर्थिक उन्नतिका लागि यस्ता प्राकृतिक सम्पदाको भूमिका महत्त्वपूर्ण हुन्छ, जसले अर्थ व्यवस्था सुदृढ गर्न ठुलो सहयोग पुऱ्याउँदछ।

२. उद्देश्य

हरेक मुलुकका आ–आफ्ना अर्थव्यवस्थाका विशेषता हुन्छन्। यसैगरी हाम्रो नेपालको पनि आ–आफ्नै किसिमका विशेषता छन्। ती विशेषताहरू के के हुन् र मुलुकलाई समृद्ध बनाउन तिनीहरूको समुचित प्रयोग कसरी गर्न सकिन्छ? यस लेखमा यी विषयमा चर्चा परिचर्चा गरी एक ठोस निर्णयमा पुगिने प्रयास गरिएको छ। अर्थव्यवस्थाको विशेषतामा केन्द्रित भई यहाँ सूक्ष्म अध्ययन गरिएको छ। विकासोन्मख राष्ट्रका यी विशेषताका सदुपयोगले मुलुकलाई समृद्ध बनाउन सकिन्छ भन्ने नै यस लघु लेखको उद्देश्य हो। नेपालको अर्थ व्यवस्थाका विविध विशेषताका बारेमा यहाँ व्याख्या गरिएको छ ।

३. शोधविधि

प्रस्तुत लेखका निम्ति प्राथमिक सामग्रीका रूपमा नेपालको अर्थ व्यवस्थासम्बन्धित विभिन्न पुस्तकहरू लिइएका छन्। त्यस्तै द्वितीयक सामग्रीस्वरूप विभिन्न पत्र–पत्रिका एवम् राष्ट्र बैँकाद्वारा प्रकाशित बुलेटिनहरू स्वीकृत छन्। यहाँ अध्ययनका क्रममा आवश्यकताका अनुसार आगमनात्मक विधिको प्रयोग गरी व्याख्यानात्कम तथा विश्लेषणात्मक विधिको पनि यथोचित उपयोग गरिएको छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. नेपालका अर्थव्यवस्थाका विशेषताहरू

नेपाल अविकसित विकासोन्मुख, न्यून आय भएको मुलुक हो। जहाँ पुँजीको अभाव, गरिबी, सिपयुक्त जनशक्तिको अभाव, उच्च जन्मदर, प्राविधिक पछौटेपन, अनुसन्धानको अभाव, राजनैतिक अस्थिरता, पूर्वाधारको कमी, भौगोलिक अवरोध आदिका कारण अर्थतन्त्रको गति मन्द छ। यिनै र यस्तै कारणले गर्दा आज हाम्रो अर्थतन्त्र कमजोर छ। मुख्यतया आर्थिक विशेषता, जनसाङ्ख्यिक विशेषता, प्राविधिक विशेषता, सामाजिक विशेषता र राजनैतिक विशेषता नेपालको अर्थतन्त्रको प्रमुख विशेषताका रूपमा रही आएका छन्। यी विशेषतामा आधारित भई यिनीहरूका चर्चा यहाँ क्रमशः गरिन्छ।

४.१ आर्थिक विशेषताहरू

मुलुकको आर्थिक विकासमा आर्थिक विशेषताहरूको भूमिका सर्वोपरि छ। मुलुकलाई अग्रगतिमा लैजान आर्थिक विशेषताहरूको ठुलो योगदान रहेको हुन्छ। तर तिनै विशेषताहरू कमजोर र प्रतिकूल भएका अवस्थामा मुलुक विकासोन्मुख राष्ट्रकै रूपमा परिगणित भइरहन्छ।

नेपालीमा एउटा उखान छ– *हाम्रो बाबा गरिब किन भएको? पैसा नभएर* भनेजस्तै यो मुलुक पनि पैसाको अभावले गरिबीको चक्रबाट बाहिर निस्कन सकेको अवस्था छैन। आज पनि नेपालमा करिब २०% मानिस गरिबीको रेखामुनि छन्। यस्तो अवस्थामा मानिसहरू आफ्ना आधारभूत आवश्यकता पूर्ति गर्न सकिरहेका हुँदैनन्। उनीहरू जीविकाका लागि तड्पिरहेका हुन्छन्। अल्पविकसित मुलुकहरूमा यस पीडाले सताइरहेको हुन्छ। यही अवस्थाबाट नेपाल पनि गुज्रिरहेको छ।

नेपालको आर्थिक अवस्था कमजोर छ। जो विकासोन्मुख राष्ट्रले भोग्दै आएको कुरा हो। यस्ता मुलुकका मानिसहरूका हातमा पैसाको कमी हुन्छ। सीमित मानिसहरू धनी पनि हुन सक्छन्। तथापि यस्ता मुलुकका जनताको प्रतिव्यक्ति आय न्यून हुन्छ। नेपालमा पनि २०८०/०८१ मा प्रतिव्यक्ति कुल आय करिब १४०० अमेरिकी डलर रहेको छ। सरसर्ती हेरिएमा यो आय विकसित राष्ट्रको तुलनामा निकै कम हो। यसैका कारण भन्न सकिन्छ कि अल्पविकसित राष्ट्रको प्रतिव्यक्ति कुल आय न्यून हुन्छ।

कृषि पेसामा अधिकांश मानिसहरू निर्भर रहनु नेपालको अर्थव्यवस्थाको एउटा विशेषता हो। जुन देशमा धेरै मानिसहरू कृषि पेशामा संलग्न हुन्छन् त्यो देश अल्पविकसित देशमै रहिरहन्छ। आज विश्वका धेरै विकसित राष्ट्रहरूमा १० प्रतिशत भन्दा कम मानिसहरू कृषि पेशामा संलग्न छन्। नेपालका सन्दर्भमा भने ६० प्रतिशतभन्दा बढी मानिस कृषि पेशामा संलग्न छन्। नेपालको निर्यात व्यापार कृषि क्षेत्रको हिस्सा सबैभन्दा बढी छ। अधिकांश मानिस कृषि पेसामा निर्भर छन्। राष्ट्रको आयको ठुलो हिस्सा कृषिले ओगटेको छ। यसैले नेपाललाई कृषि प्रधान मुलुक भनिन्छ।

हाम्रो देश प्राकृतिक स्रोत र साधनले सम्पन्न छ। तर तिनीहरूको उपयोग अत्यन्तै न्यून छ। प्राकृतिक स्रोत र साधनको उचित प्रयोग गर्न नसक्दा हामी विदेशबाट सामान ल्याउन बाध्य छौँ। जलस्रोतको धनी देश भए तापनि विदेशबाट वेला वेलामा बिजुली किन्छौँ। *हरियो वन नेपालको धन* भन्ने भनाइ त छ तर फर्निचरहरू विदेशबाट आउँछन्। विभिन्न ठाउँमा ग्यासको खानी, सिमेन्टका ढुङ्गाहरू, कोइला, फलाम, तामा, सिसा, सुन आदि छन्। हामी स्रोत र साधनले सम्पन्न भए तापनि सबै सामान विदेशबाट ल्याउन बाध्य छौँ। प्राकृतिक साधनको उपयोग अत्यन्तै न्यून छ।

नेपालमा द्वैध अर्थव्यवस्था छ। एउटा सहरी अर्थव्यवस्था र अर्को ग्रामीण अर्थव्यवस्था। सहरी अर्थव्यवस्था त्यो हो जहाँ सहरी सुख सुविधा व्याप्त छ; विकसित राष्ट्रको जस्तो दैनन्दिन खानपिन छ; व्यापार, उद्योग धन्दा, बस, कारखाना एवम् पुँजीबजार विकसित भएको छ। अर्कातर्फ गाउँमा कृषि पेसामा निर्भर उच्च जनसङ्ख्या, बेरोजगार जनशक्ति र यातायात आदिको न्यून सुविधा रहेको पाइन्छ।

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालमा पूर्ण बेरोजगार, मौसमी बेरोजगार र अदृश्य बेरोजगार गरी तीन प्रकारका बेरोजगार रहेको पाइन्छ। प्राकृतिक स्रोत र साधनको उचित प्रयोग नहुनु, औद्योगीकरण हुन नसक्नु नै बेरोजगारी समस्याको प्रमुख कारक हो। नेपालमा कयौँ मानिसहरू पूर्ण रूपमा बेरोजगार छन्। गाउँघरमा दिनभरि नै तास खेल्ने, गफ गरेर समय बिताउने मानिसहरूको ताँती छ। सहरमा पनि कम छैन। नेपाल कृषिप्रधान देश भएकाले बाली लगाउने र भित्र्याउने वेलामा मात्र काम हुने, बाँकी समय फुर्सद हुने मानिसहरू पनि प्रशस्तै छन्। यस प्रकारका बेरोजगारलाई मौसमी बेरोजगार भनिन्छ। एउटा परिवारमा ८ जना सदस्यहरू हुन्छन्। यी सबै सदस्यले केही न केही काम गरिरहेकै देखिन्छ तर यदि चार जना मानिस कुनै कारणले १ वर्ष बहिर गए पनि त्यस घरको सबै काम बाँकी चार जनाले गरेका हुन्छन् तर पनि उत्पादनमा कुनै कमी आउँदैन। यस्तो अवस्थामा उक्त परिवारमा नदेखिने बेरोजगार रहेको हुन्छ ,जसलाई अदृश्य बेरोजगार भनिन्छ।

नेपालमा पुँजी निर्माणको दर पनि न्यून छ। पुँजी निर्माण बचतमा भर पर्दछ। बचत आम्दानीमा भर पर्दछ साथै पुँजी निर्माण उपभोग प्रवृत्तिमा भर पर्दछ। आम्दानी बढी छ तर सीमान्त उपभोग प्रवृत्ति चाहिँ न्यून छ भने बचतमा वृद्धि हुन्छ। सामान्यतया यो प्रवृत्ति विकसित राष्ट्रमा पाइन्छ। हाम्रो मुलुकमा कुल गार्हस्थ्य उत्पादनको करिब ६% मात्र बचत हुन्छ भने ९४% उपभोग खर्च छ। तर विकसित राष्ट्रमा बचत दर २५ प्रतिशतभन्दा माथि छ।

नेपालजस्तो मुलुकमा पनि आयको असमान वितरण भएको पाइन्छ। यस देशमा थोरै मानिससँग आयको धेरै हिस्सा छ भने धेरै मानिससँग आयको थोरै हिस्सा छ, जसलाई आयको असमान वितरण भनिन्छ। साथै यहाँ सहरी र ग्रामीण गरी दुई क्षेत्र हुने हुँदा एकातिर वित्तीय संस्थाहरूको सर्वसुलभ सुविधा छ भने अर्कातिर ती संस्थाहरूको न्यून उपस्थिति छ। जसका कारण विभिन्न असुविधामा ग्रामीण क्षेत्र डुबेको हुन्छ।

नेपालमा आर्थिक विकास नहुनुमा अर्को कारण औद्योगीकरणको कमी पनि हो। जबसम्म मुलुकमा औद्योगीकरण हुँदैन तबसम्म देश विकसित हुन सक्तैन। औद्योगीकरण नहुँदा मुलुकको बेरोजगारीमा वृद्धि हुन्छ। बेरोजगारीमा वृद्धि भए आम्दानीमा कमी हुन्छ। जसका कारण बचतमा कमी हुन जान्छ, फलस्वरूप लगानीका लागि पैसा वा पुँजी निर्माणमा कमी हुन्छ। यिनै कारणले गर्दा देश अल्पविकसित रहिरहन्छ।

नेपाल सम्भवतः धेरै विषयमा परनिर्भर छ। कृषिप्रधान देशमा अन्न, फलफूल आदि आयात गरिन्छन्। अर्थात् दुईतिहाइ जनता कृषि पेसामा आश्रित रहेको क्षेत्रमै हामी अन्न, फलफूल आदिमा आत्मनिर्भर छैनौँ। यसै कारण हाम्रो वैदेशिक व्यापार घाटामा छ। महङ्गा वैदेशिक सर–सामान, यन्त्र, उपकरण आदि आयात गरिन्छन् भने निर्यात नगन्य मात्रामा हुने गरेको छ। यस कारण नेपालको वैदेशिक व्यापार सधैँ घाटामा रहेको छ।

नेपालको चारै सिमाना जमिनले जोडिएको छ। अर्थात् कुनै पनि सिमानासँग समुद्री सतह जोडिएको छैन। समुद्री सतहसँग कुनै पनि सिमाना नजोडिएको देशलाई भूपरिवेष्टित मुलुक भनिन्छ। यस्ता राष्ट्रहरूले तेस्रो मुलुकसँग व्यापार गर्दा अर्को देशको स्थलमार्ग भएर गर्नुपर्दछ। अन्तर्राष्ट्रिय व्यापारका लागि भूपरिवेष्टित मुलुकले वेला वेलामा समस्या भोग्नुपर्दछ। आफ्नो देश समुद्री सतहसँग नजोडिँदा अन्तर्राष्ट्रिय व्यापारमा सरलता एवम् सुगमता हुँदैन। यसले गर्दा भुपरिवेष्टित मुलुक हुनु पनि आर्थिक विकासको बाधाका रूपमा लिन सकिन्छ।

४.२ जनसाङ्ख्यिकीय विशेषताहरू:

कुनै पनि मुलुकको जनसङ्ख्या पनि एउटा विशेषता हो। भनिन्छ जनसङ्ख्या वरदान हो। तर यही जनसङ्ख्या सही रूपमा प्रयोग गर्न नसके अभिशाप पनि बन्दछ। मानिसले जन्म लिँदा केवल खाने मुख लिएर मात्र जन्मेको हुँदैन। उसले संसार चलाउने दिमाग र पौरख गर्ने हात–खुट्टा लिएर आएको हुन्छ। तर त्यो मस्तिष्क र पौरख गर्ने हात–खट्टाको प्रयोग भएन भने मुलुक उन्नतितर्फ नगई अवनति तिर गएका उदाहरण प्रशस्तै छन्। नेपालको जनसङ्ख्या सम्बन्धी विशेषतालाई यसरी पनि विश्लेषण गर्न सकिन्छ।

 ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालको जनसङ्ख्याको जन्मदर उच्च छ। जबकि बढ्दो जनसङ्ख्याका लागि रोजगारीका अवसरहरू भने घट्दै छन्। जनसङ्ख्या वृद्धिदर उच्च हुनु राष्ट्र विकासका लागि घातक हो। विश्वका विकसित राष्ट्रहरूको जन्मदर हेरियो भने कतै नकारात्मक छ भने धेरै देशहरूमा एक प्रतिशतभन्दा कम छ। नेपालमा विगत ५० वर्षको इतिहासलाई हेर्ने हो भने कहिलेकाहीँ २% भन्दा बढी र कहिलेकाहीँ १% भन्दा बढी छ।

नेपालको जनसङ्ख्या सम्बन्धी अर्को विशेषता उच्च मृत्युदर हो। नेपलमा बाल–बालिका तथा वृद्ध–वृद्धाको मृत्यृदर उच्च छ। जसका प्रमुख कारण कुपोषण, प्रदूषित खानेपानी, अव्यवस्थित कलकारखाना, सहरीकरण, हैजा, टी.भी., अस्पतालको कमी, अशिक्षा, प्रसव पद्धति, शिशुपालन, अनिकाल, खडेरी आदि हुन्। जब मुलुकमा यस्ता समस्याहरू हुन्छन् तब स्वाभाविक रूपमा मृत्युदर उच्च हुन्छ। यसरी मृत्युदर उच्च हुँदा मुलुकको आर्थिक विकासमा नकारात्मक प्रभाव पर्छ।

नेपालको अर्थ व्यवस्थाका धेरै विशेषताहरू छन्। त्यसमा पनि जनसङ्ख्या सम्बन्धी विशेषताले पनि मुलुकको विकासमा अवरोध पुगेको देख्न सकिन्छ। नेपालमा बसाइँसराइ पनि उच्च छ। आज पनि हिमाल र पहाडबाट तराई झर्नेको लर्को नै लागिरहेको छ। त्यसैगरी हिमाल, पहाड र तराईबाट सहरतिरको बसाइँसराइ पनि तीव्र गतिले बढेको छ। अझ आजभोलि बौद्धिकपलायन अर्थात् पढेलेखेका युवाहरू विदेश जाने क्रम तीव्र छ। जुन कुरा राष्ट्रका लागि एउटा गम्भीर विषय हो। यसलाई समयमै सम्बोधन गरी रोक्न नसके राष्ट्रले भविष्यमा ठुलो क्षति व्यहोर्नुपर्ने छ।

नेपालमा जनसङ्ख्याको वितरण पनि असमान छ। एउटा मानिस स्वस्थ बन्नका लागि सबै अङ्गहरू समान रूपले वृद्धि हुन आवश्यक छ। शिर मात्र ठुलो हुनु या हात मात्र ठुलो हुनु स्वस्थ मान्न सकिँदैन। यो त रोग हो। ठिक यसै प्रकार विकसित नेपाल बन्नका लागि सम्पूर्ण स्थान वा राष्ट्रका आधारभूत अङ्गहरू समानान्तर रूपले विकसित हुन जरुरी छ। नेपालको सबैभन्दा बढी क्षेत्रफल पहाडी र हिमाली भेगमा छ। तर जनसङ्ख्या तराईमा बढी छ। अझ आजभोलि यो जनसङ्ख्या सहरकेन्द्रित हुन थालेको छ। गाउँघरका जग्गा–जमिन बाझिँदै छन्। उब्जनशील तराईका खेतहरू प्लटिङ गरी घडेरी बनाइँदै छन्। यही क्रम रहिरहने हो भने भोलि मुलुकले एउटा डरलाग्दो समस्याको सामना गर्नुपर्ने छ। यस विषयमा पनि नेपाल सरकारले समयमै सोच्न जरुरी छ।

नेपालको जनघनत्व पनि एउटा विशेषता हो। नेपालमा कहीँ प्रतिवर्ग किलोमिटर चार हजारभन्दा बढी जनसङ्ख्या छ भने कहीँ प्रतिवर्ग किलोमिटर तीन जना मात्र छन्। यस्तो किसिमको जनघनत्वले मुलुकको आर्थिक विकासमा नकारात्मक प्रभाव पार्दछ। देशका हरेक स्थानमा आधारभूत आवश्यकताको पूर्ति गरिदिने हो भने यस प्रकारको जनघनत्व वा बसाइँसराई हुने थिएन। मानिसका आधारभूत आवश्यकताहरू शिक्षा, स्वास्थ्य, खानेपानी, बिजुली, यातायात, सञ्चार र रोजगारीका अवसरहरू यथोचित रूपमा भइदिए जनघनत्वको फेरबदल र बसाइँसराईको क्रम रोकिने थियो।

जनसङ्ख्याको विशेषतालाई उमेरका आधारमा पनि हेर्न सकिन्छ। नेपालको वि.सं. २०७८ सालको जनगणनाअनुसार ०–१४ वर्षका २८.४१%, १५–६४ ६५.६९%, ६५ र त्यसमाथिका ५.९०% छन्। वि.सं. २०७८ सालकै जनगणनाअनुसार नेपालको सहरी क्षेत्रमा ६६.१७% र गाउँमा ३३.८३% मानिसहरू बस्दछन्। वि.सं. २०७८ सालको जनगणनाअनुसार नेपालको जनसङ्ख्या हेर्दा सक्रिय काम गर्न सक्ने जनसङ्ख्या १५–६४ वर्षका ६५.६९% छन्। बालबालिकाको सङ्ख्या ०–१४ वर्षका २८.४१% छन्। ६५ र सोमाथिका मानिसहरू ५.९०% छन्। यसभन्दा पहिले वि.सं. २०६८ सालमा गरिएको जनगणनामा बालबालिका र वृद्ध–वृद्धाको जनसङ्ख्या अझ बढी थियो। अर्थात् काम गर्ने सक्रिय जनसङ्ख्याको अनुपात कम थियो। तर २०७८ सालको जनगणनामा सक्रिय काम गर्ने जनशक्तिको सङ्ख्या बढेको देखिन्छ। जनसङ्ख्या मुलुकको एउटा सक्रिय साधन हो। यसलाई निस्क्रिय रहन दिनुहुँदैन। किनकि श्रम नाशवान् छ। यस सक्रिय साधनलाई पूर्ण उपयोग गरी मुलुकको आर्थिक विकासमा लगाउन सक्नुपर्छ। तब मात्र देशले नवगति लिने छ। विकासको पथमा लम्किने छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४.३ प्राविधिक विशेषता

आज संसार प्रविधिमय छ। आज प्रविधिका माध्यमले कल्पना गरिएका कुराहरू हाम्रा अगाडि छन्। कल्पना नगरिएका कतिपय सामग्रीसमेत हामीले उपभोग गर्न पाएका छौँ। यस्तो प्रविधिमय वर्तमान युगमा नेपालको कुनै आफ्नो स्वनिर्मित प्रविधि भने छैन। आज जति पनि प्रविधिहरू छन् ती सबै विदेशबाट आयात गरिएका हुन्। यो नेपालका लागि एउटा समस्या हो। आज प्रत्येक क्षणमा नयाँ प्रविधिहरू जन्मेका छन्। तर नेपालले भने आफ्नै बलबुतामा प्रविधिहरू जन्माउन सकेको छैन। यो हाम्रा लागि चुनौतीको विषय हो। यहाँ नेपालको अर्थव्यवस्थामा प्रविधिको भूमिकाका बारेमा चर्चा परिचर्चा गरिने छ। कुनै पनि अर्थव्यवस्थामा प्रविधिको महत्त्वपूर्ण स्थान छ। यसै कारण उक्त व्यवस्थामा प्रविधिको भूमिकालाई यहाँ स्पष्ट पार्ने जमर्को गरिन्छ।

अधिकांश मानिस कृषिमा निर्भर रहेको कृषिप्रधान मुलुक नेपालमा कृषि उत्पादन परम्परागत र पिछडिएको छ। आधुनिक प्रविधि पूर्ण रूपमा प्रयोग भइसकेको छैन। अहिले पनि काठमाडौँमा जोत्न हुँदैन भन्ने प्रचलन छ। मुलुकका विभिन्न ठाउँमा ब्रह्मणले जोत्न हुँदैन भन्ने परम्परा पनि रहेको छ। कृषिबजारको अभाव, भण्डारणको अभाव, बेमौसमी खेतीको कमी, सिँचाइ सुविधाको कमी, आधुनिक मल, बिउ, कीटनाशक औषधी आदिको कमी कृषि क्षेत्रमा व्याप्त रहेको पाइन्छ। यसै कारण नेपलाको कृषि पद्धतिमा आधुनिकीकरण हुन सकेको छैन।

समय परिवर्तनशील छ। आजको युग औद्योगिक युग हो। उद्योगको विकासविना मुलुकविकासको कल्पना गर्न सकिँदैन। आज संसारका सबै देशहरू औद्योगीकरणबाटै अगाडि बढेका हुन् तर नेपालमा आज पनि औद्योगीकरण हुन सकेको छैन। सञ्चालनमा भएका उद्योगहरूको प्रविधि पनि कमजोर छ। जसले विदेशी वस्तुसँग प्रतिस्पर्धा गर्न सक्दैन। उत्पादित वस्तुको प्रतिएकाइ लागत बढी पर्ने र गुणस्तर पनि कमजोर हुँदा विदेशी सामानसँग प्रतिस्पर्धा गर्न सक्दैनन्। यसै कारण नेपालमा पनि ठुल्ठुला उद्योग र नयाँ नयाँ प्रविधिको प्रयोग गर्न अब ढिलो गर्नुहुँदैन।

नेपालमा उच्च प्राविधिक ज्ञानको कमी छ। नेपालको शिक्षा वैज्ञानिक, व्यावहारिक, व्यावसायिक, सिपमूलक र सर्वसुलभ छैन। फलस्वरूप सम्बद्ध विषयमा उच्च शिक्षा प्राप्त गरे तापनि त्यसको उपयोगिता कमजोर छ। नेपालका लागि नेपालमा रहेका प्राकृतिक स्रोतहरू- कृषि, वन, खनिज, जलस्रोत, पर्यटनका लागि चाहिने दक्ष जनशक्ति आदि उत्पादन गर्न जरुरी छ। लक्षित क्षेत्रतर्फ धरै चासो रहेको देखिँदैन। नेपालमा कयौं ठुला आयोजना वा उद्योगधन्धा गर्ने र त्यसका लागि चाहिने स्वचालित यन्त्र बनाउने त कुरै छाडौँ ती यन्त्र बिग्रिए भने पनि मर्मतका लागि विदेशी प्राविधिक ल्याउनुपर्ने परिस्थिति कायमै छ।

आज जति पनि प्राविधिक विकास भएका छन् ती सबै अनुसन्धानबाटै भएका हुन्। तर नेपालमा अनुसन्धान प्रविधि कमजोर छ। त्रिभुवन विश्वविद्यालयमा चारओटा अनुसन्धान केन्द्रहरू स्थापना भएका छन्। ती अनुसन्धान केन्द्र नाममा मात्र सीमित छन्। कति कार्यालय खोली बसेका छन्। केही विदेशी सहयोग कुरी बसेका छन्। अनुसन्धान नभई नयाँ नयाँ प्रविधि जन्मदैन। नयाँ नयाँ प्रविधि नभई देशको विकास हुन सक्दैन।

४.५ सामाजिक र साँस्कृतिक विशेषताहरू:

नेपालमा विभिन्न जाति, धर्म, सँस्कृति, परम्परा, रीतिरिवाज, मूल्य, मान्यता र चालचलन मान्ने मानिसहरूको बसोबास छ। यहाँ हिन्दु, बौद्ध, किरात, इस्लाम आदि धर्म मान्ने मानिसहरू बसोबास गर्छन्। जहाँ नेपाली, मैथिली, भोजपुरी, थारू, तामाङ, नेवार आदि भाषाहरू विद्यमान छन्।

ISSN : 2795-1960
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जातका आधारमा पनि नेपालमा कामको विभाजन गर्ने प्रचलन छ। जस्तैः कामीले फलामको काम, सार्कीले छालाको काम र दमाईले कपडाको काम आदि। महिलाहरूलाई घरभित्र र खेतीबारीको काममा लगाउने र घर तथा सामाजिक निर्णयमा पनि कम सहभागी बनाइन्छ। यसरी महिलामाथि भेदभाव गरिन्छ। तीन पुस्ता एउटै परिवारमा बस्ने संयुक्त परिवार प्रणाली पनि छ।

महिला, बालबालिका र वृद्धहरूको सङ्ख्या धेरै हुने तथा आयआर्जन नहुँदा परनिर्भरताको सङ्ख्या उच्च छ। संयुक्त परिवार प्रणालीमा कोही कमाउने र कोही रमाउने हुँदा बचत न्यून हुन्छ। अदृश्य शक्तिमा विश्वास गर्ने हुँदा आफ्नो काम योग्यता, सिप र परिश्रमभन्दा बढी ईश्वरमा विश्वास छ। कुनै कामको सफलता र असफलतालाई भाग्यमा जोड्ने भाग्यवादको प्रचलन छ। यस्तै प्रकारका सामाजिक र साँस्कृतिक विशेषताहरू नेपालमा रही आएका छन्, जसका कारण नेपालको आर्थिक व्यवस्था पनि प्रभावित नभई रहन सकेको छैन।

४.६ राजनैतिक विशेषता

नेपालमा बाइसे चौबिसे राज्यको राजा पृथ्वी नारायण शाहले वि.सं. १७९९ बाट एकीकरण प्रारम्भ गरे। वि.सं. १९०२ सम्म शाह वंशीय राजाहरूबाट शासन सञ्चालन भयो। वि.सं १९०३ देखि वि.सं. २००७ सालसम्म राणाशासनको व्यवस्था चल्यो। वि.सं. २००७ सालमा स्थापना भएको प्रजातन्त्र वि.सं. २०१७ सालमा निर्दलीय पञ्चायती व्यवस्थाको प्रारम्भ भयो। वि.सं. २०४६ सालमा पुनः प्रजातन्त्रको स्थापना भयो। वि.सं. २०६२/०६३ सालको जनआन्दोलनपछि नेपालमा गणतन्त्रको स्थापना भयो।

विभिन्न आन्दोलनबाट प्राप्त राजनीतिक परिवर्तनपछि पनि आम जनताको स्थिति परिवर्तन नभएकाले जनतामा निराशा छाएको छ। जसको प्रमुख कारण राजनैतिक अस्थिरता, राजनैतिक दलहरूको सत्तामोह, अनावश्यक नारा जुलुस र हडताल हुनु, योग्यता, क्षमता, इमान्दारिताके कदर नहुनु, पैसा, आफ्ना परिवार र नातागोतालाई प्राथमिकतामा राख्नु आदि हुन्। यी कारणहरूले गर्दा राजनैतिक दलप्रति आम जनताको वितृष्णा बढेको छ। यस प्रकारका राजनैतिक अस्थिरताका कारण पनि नेपालको अर्थव्यवस्थामा ठुलो प्रभाव परेको छ।

निष्कर्ष

प्राकृतिक सुन्दरताले भरिएको संसारकै मनमोहक, आकर्षक, लोभलाग्दो देश नेपाल हो। विश्वकै सर्वोच्च शिखर सगरमाथा नेपालमा छ। चाँदीझैँ टल्किएका हिमशिखरहरू देख्न र चुम्न कसलाई मन नहोला र? हजारौँ नदीनाला, कुण्ड र छहराले सजिएको मुलुक नेपाल हो। जहाँ हरियाली वनले प्रकृतिको सुन्दरतालाई शोभायमान बनाएको छ। खनिज तथा अन्य प्राकृतिक स्रोतसाधनहरू हामीकहाँ प्रचुर मात्रामा छन्। विभिन्न धर्म, सँस्कृति, जाति र भाषा भए पनि सबै एक आपसमा मिलेर बस्ने हाम्रो सँस्कृति, सँस्कार र सभ्यता बनेको छ। नेपाललाई एउटा सबल, सक्षम र इमान्दार राजनैतिक नेतृत्वकोको आवश्यकता छ, जसले मुलुकको प्राकृतिक साधनहरूको प्रयोग राष्ट्रका हितमा गरी उन्नतिको मार्गमा लैजान सकोस्।

Referance

Dahal, M.k. (2001). *Future of Nepalese economy*, Kathmandu. NEFA-FES.

Nepal Rastra Bank (2015 an 2022). Kathmandu. Various publication.

Rastogi, A.k. (2002). *Rural Development-Stragegy*, Jaipur: Wido Vision.

Sharma, N.K. (2069). *Nepalko Arthasastra* (4"ed.) Kathmandu, pairabi prakasan.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाकयज्ञ विमर्श

सहप्रा. तेजप्रकाश पौडेल
वेदविभाग, वाल्मीकि विद्यापीठ

लेखसार :

मनुष्यका लागि शास्त्रमा दुई किसिमका यज्ञ विहित छन् : श्रौतयज्ञ र स्मार्तयज्ञ। यी यज्ञको आधान वैतानिक र वैवाहिक अग्निमा हुन्छ। "स्मार्तं वैवाहिके वह्नौ श्रौतं वैतानिकाग्निषु।" (व्यासस्मृति २। १६)। श्रुति विहित अर्थात् वेद विहित यज्ञ श्रौतयज्ञहुन्। यिनको सम्पादन वैतानाग्निमा हुन्छ। वैतानाग्नि भनेको दाजुभाइको अंश विभाजनको समयमा स्थपना गरिने अग्नि हो। यसमा हविर्यज्ञ र सोमयज्ञ संस्थाका यज्ञहरू गरिन्छ। यसलाई त्रेताग्नि पनि भनिन्छ। त्रेताग्नि भनेको दक्षिणाग्नि, गार्हपत्याग्नि र आहवनीयाग्निको समूह हो। यी अग्निको विस्तृत विधानको व्याख्या श्रौतसूत्रहरूमा गरिएको हुन्छ। स्मार्तयज्ञ भनेको स्मृतिशास्त्र वा स्मृति ग्रन्थहरूमा बताइएको विधान र व्यवस्थालाई आधार मानेर गरिने गृह्ययज्ञ हुन्। यी यज्ञ गृहिणी(पत्नी)का साथमा गृह(घर)मा बसेर गरिन्छ। गृह्य शब्दको अर्थ पत्नी र शाला(घर) दुवै हुन्छ। 'सगृहो गृहमागतः' यस भनाइमा पहिलो गृहको अर्थ 'पत्नी' र दोस्रो गृहको अर्थ 'घर' हो। यही घरसँग सम्बन्धित अग्निलाई गृह्याग्नि, औपासनाग्नि, शालाग्नि वा आवसथ्याग्नि भनिन्छ। गृह्याग्नि भनेको विवाहको समयमा वर वधूले लाजाहोम वा अन्तिम समिधा आधान गरेको अग्नि हो। यो अग्निलाई विवाहित व्यक्तिले पत्नीका साथसाथै घरमा ल्याएर आजीवन घरमा गरिने नित्य र नैमित्यिक कर्महरू सम्पन्न गर्नुपर्छ। गृहस्थीले यस अग्निमा पकाएको अन्नलाई स्थालीपाक भनिन्छ। स्थालीमा पकाइने भएकाले यसलाई स्थालीपाक भनिएको हो। यही स्थालीपाकबाट गृह्याग्निले औपासनहोम, वैश्वदेवपर्व, पार्वणश्राद्धम्, अष्टकाश्राद्धम्, मासिश्राद्धम्, श्रवणाकर्म र शूलगव आदि सप्तपाक- यज्ञहरूको सम्पादन गर्छ भन्ने विषय नै यस आलेखको लेखसार रहेको छ।

शब्दकुञ्जी : *वैश्वदेवपर्व, स्मातयर्ज्ञ, स्थालीपाक, आवसथ्य, गृह्याग्नि, गृहस्थी, हव्यपदार्थ, अष्टकाश्राद्धम्।*

शोधको समस्या र उद्देश्य :

आवसथ्याग्निले गर्ने वैदिक यज्ञ अन्तर्गतका एक्काइस श्रौत र स्मार्त यज्ञहरुमध्ये सात पाकयज्ञहरुको अध्ययन र विश्लेषण के कसरी गर्न सकिन्छ? भन्ने विषय प्रस्तुत शोध आलेखको समस्या हो। यो समस्याको विस्तृत अध्ययन, विश्लेषण र विमर्शगरी निष्कर्ष प्रस्तुत गर्नु यस आलेखको मुख्य उद्देश्य रहेको छ।

अध्ययनको क्षेत्र, सीमा र विधि :

वैदिक ब्राह्मणले आफ्नो धर्म रक्षाका लागि गर्नुपर्ने प्रमुखकर्म श्रुतिस्मृतिले प्रतिपादन गरेका श्रौतस्मार्त यज्ञहरूको रक्षा र उल्लेखित व्यवस्थाको निष्ठापूर्वक पालनागर्नु र गराउनु हो। मूलतः यही विषयवस्तुको परिधिभित्र रहेर विमर्श प्रस्तुत गर्नु यस आलेखको अध्ययन क्षेत्र हो। साथै ती शास्त्रोक्त व्यवस्थाको समीक्षापूर्वक अध्ययन र विश्लेषण गरी निष्कर्षमा पुग्नु प्रस्तुत आलेखको सीमारेखा हो। अतः यो क्षेत्र र सीमारेखा प्राप्त गर्नका लागि प्रस्तुत लेखमा निगमनविधि तथा पुस्तकालय अध्ययनपद्धतिको प्रयोग गरिएको छ।

विषय प्रवेश :

'यज देवपूजासंगतिकरणदानेषु' अर्थात् देवपूजा, संगतिकरण एवं दान अर्थमा पढिने 'यज्' धातुमा नङ् प्रत्यय लागेर यज्ञ शब्दको निर्माण हुन्छ। "यज्ञयाचयतविच्छप्रच्छरक्षो नङ्।" (अष्टाध्यायी ३।३।९०)। यसको अर्थ

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दान, धर्म, लोकोपकार आदि उद्देश्यले गरिने शुभकर्म वा देवताहरूको प्रसन्नताका लागि वैदिक विधिपूर्वक गरिने हवन, पूजा, जप, पाठ आदि धार्मिक कार्य भन्ने हुन्छ। यज्ञ वेदको मुख्य प्रतिपाद्य विषय हो। प्रसिद्ध वैदिककोश निघण्टुमा यज्ञका पन्ध्र पर्यायवाची शब्दको उल्लेख गरिएको छ। "यज्ञः, वेनः, अध्वरः, मेघः, विद्यः, नार्यः, सवनम्, होत्रा, देवताता, इष्टि, मखः, इन्दुः, प्रजापति, घर्मः, इति पञ्चदश यज्ञ नमानि।" (निघण्टु)। शतपथब्राह्मणमा यज्ञलाई देवताहरूको अन्न र यज्ञमा समर्पण गरिएको त्यो अन्न अग्निको माध्यमबाट देवता- हरूले प्राप्त गर्ने भएकाले अग्निलाई देवताहरूको मुख भनिएको छ। "यज्ञोहि देवतानामन्नम्।" "अग्निर्हि देवतानां मुखम्।"(शतपथब्राह्मणम् ३।७।२।६)। त्यसैले मनुष्यले सबै किसिमको कल्याणका लागि यज्ञ गर्नुपर्छ। यज्ञबाट मनुष्यले जन्ममरण चक्रको बन्धनबाट मुक्ति पाँउछ। यज्ञ र मनुष्यको परस्पर सम्बन्ध सृष्टिको सुरु कालदेखि नै रहेको कुरा श्रीमद्भागवतगीतामा उल्लेख गरिएको छ। "सहयज्ञाः प्रजा सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक्॥ देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥" (गीता ३।१०-११)।

पद्मपुराणको सृष्टिखण्डमा पनि ब्रह्माले यज्ञकर्मका लागि मानव जातिको सृष्टि गरेको उल्लेख गरिएको छ- "यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार ह।चातुर्वर्ण्य महाभाग यज्ञसाधनमुत्तमम्॥" (पद्मपुराणम् ३।१२३)। तैत्तिरीय संहितामा पनि मनुष्य जन्मदेखि तीन किसिमका ऋणयुक्त हुने भएकाले यस ऋणबाट मुक्ति पाउनका लागि यज्ञ गर्नुपर्छ भनिएको छ। साथै ब्रह्मचर्यबाट ऋषिऋण, यज्ञबाट देवऋण र सन्ततिबाट पितृऋण तिरेर मुक्त हुन सकिने कुरा पनि यसरी उल्लेख गरिएको छ। "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः।" (तैत्तिरीयसंहिता ३।१०।५)। यही कुरा श्रीमद्भागवतमहापुराणमा पनि उल्लेख गरिएको छ। "ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो।यज्ञाध्ययनपुत्रैस्तान्य निस्तीर्य त्यजन् पतेत्॥" (श्रीमद्भागवत- महापुराणम् १०।८४।३९)। मनुले पनि विधिपूर्वक वेद पढेर विवाहादि संस्कारद्वारा पुत्रजन्माएपछि ज्योतिष्टोमादि यज्ञद्वारा ऋणतिरेर मात्र मनलाई मोक्ष मार्गमा लगाउनुपर्छ भनेका छन्। "ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥ अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो-मोक्षे निवेशयेत्॥" (मनुस्मृति ६।३५-३६)।

शतपथब्राह्मणमा पनि प्रजापति ब्रह्माले आफ्नै प्रतिच्छाया स्वरूप यज्ञको उत्पत्ति गरेकाले यज्ञलाई भगवानको साक्षात् स्वरूप मानिएको छ- "अथैनमात्मनः प्रतिमामसृजत यद् यज्ञम्, तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येनं प्रतिमामसृजत।" (शतपथब्राह्मणम् ११।१।८।३)। पद्मपुराणको सृष्टिखण्डमा यज्ञबाट देवताहरूको आप्यायन (पोषण) सहित जलवृष्टिद्वारा संसारको पनि पालन पोषण हुने भएकाले यज्ञलाई मानव कल्याण हेतुको कारक भनिएको छ- "यज्ञेनाप्यायिता देवा वृष्ट्युत्सर्गेण मानवाः। आप्यायनं वै कुर्वन्ति यज्ञाः कल्याणहेतवः।" (पद्मपुराणम् ३।१२४)। मत्स्यपुराणमा पनि देवता, हवनीयद्रव्य, वेदमन्त्र, ऋत्विक् र दक्षिणाको संयोगलाई यज्ञ भनिएको छ- "देवानां द्रव्यहविषां ऋक्सामयजुषां तथा। ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते॥" (मत्स्यपुराणम्)। यसरी श्रुति, स्मृति तथा उपनिषद् आदि ग्रन्थहरूमा यज्ञलाई मनुष्यले गर्ने प्रमुख कर्म भनिएको छ। प्रत्येक व्यक्तिले यज्ञ गर्नुपर्छ। यज्ञ नगर्ने व्यक्तिले आत्मपवित्रताको अभावमा आफू जीवितलोक र परलोकमा समेत सुखप्राप्त गर्न सक्दैन। वृक्षबाट झरेको पत्र झैं नष्ट हुन्छ भनिएको छ- "नास्त्ययज्ञस्य लोको वै नायज्ञो विन्दते शुभम्। अयज्ञो न च पूतात्मा नश्यति छिन्नपर्णवत्।"

कात्यायनले "यज्ञं व्याख्यास्यामः। द्रव्यं देवता त्यागः।" (कात्यायनश्रौतसूत्रम् १।२।१-२) भनेर द्रव्यात्मक, देवतात्मक र त्यागक्रियात्मक गरी तीन किसिमका यज्ञको लक्षण गरेका छन्। द्रव्यात्मकमा सोमरस, पुरोडाश, घृत, दधि, यवागू, हविष्, ओदन, तण्डुल, फल, जल यी दश पदार्थको गणना छ। देवतात्मकमा इन्द्र, अग्नि, वरुण आदि वेद मन्त्रोक्त देवताहरूको प्रधानता छ। क्रियात्मकमा सम्पूर्ण यज्ञको अनुष्ठान प्रक्रिया छ। जसमा ऋत्विग्वरण, मण्डपाच्छादन, वेदीकरण, स्रुवादि यज्ञपात्रहरूको सम्मार्जन, दीक्षाग्रहण, अग्निस्थापना, प्रतिष्ठा र

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समिधादान, आज्यभागाहुति, प्रधानयाग, स्विष्टकृद्हवन, बर्हिहोम, प्रणीताविमोक, पूर्णाहुतिहोम तथा तर्पण, मार्जन आदि क्रियाहरू सम्मिलित छन्। अतः समग्रमा आध्यात्मिक, आधिदैविक र आधिभौतिक विपत्तिबाट टाढारहेर देवताहरुलाई खुसी बनाउँदै सम्पूर्ण संसारको कल्याणसहित आफ्नो स्वर्ग प्राप्तिको बाटो सुलभ गर्ने अनुष्ठान नै यज्ञ हो भन्न सकिन्छ।

यज्ञको उत्पत्ति र विभाजन :

'यज्ञ' सकाम वा निष्काम रूपले गरिने परमेश्वर वा देवता आदिको आराधना हो। यसको उत्पत्ति वेद सँगसँगै भएको हो। यसको पुष्टि ऋग्वेदका यी मन्त्रले गरेका छन्– "अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥" (ऋग्वेद, १।१।१–२)। देवता पूज्य र आराध्य हुने भएकाले वेदमा देवतालाई यज्ञको नामबाट बोलाइएको छ– "यज्ञेन यज्ञमयजन्त देवाः।" (शुक्लयजुर्वेद, ३१।१६)। यज्ञको विस्तार सर्वप्रथम अथर्वा ऋषिले गरेका हुन्– "यज्ञैरथर्वा प्रथम प्रथस्तते।" (अथर्ववेद, २०।२५।५)। अङ्गिरस् ऋषिहरूले त यज्ञको उपयोगिता सम्बन्धमा चिन्तन मनन गरेर यज्ञको फलस्वरूप अन्नादि रसमात्र प्राप्त गरेका हुन्– "अङ्गिरसः यज्ञस्य धाम प्रथमं मनन्त।" (अथर्ववेद, २०।९१।२)।

श्रीमद्भागवतमहापुराणमा स्वायंभुव मनुकी पत्नी शतरूपाको गर्भबाट आकूतिको जन्म भयो। यिनको विवाह रुचि प्रजापतिसँग भयो। यी दुवैको संयोगबाट सातौं अवतारका रूपमा यज्ञपुरुष भगवान् नारायणको जन्मपछि यज्ञको प्रचार–प्रसार सुरु भएको मानिएको छ। (श्रीमद्भागवत ४।१–४)। कालिकापुराणमा त भगवान् वराहका शरीरको अङ्ग–अङ्गबाट विभिन्न यज्ञहरूको उत्पत्ति भएको उल्लेख गरिएको छ– "तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक्पृथक्। यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च।" (कालिकापुराणम् ३२।१२–२७)। श्रुतिमा पाँचओटा यज्ञहरूको उल्लेख गरिएको छ– "स एष यज्ञः पञ्चविधः, अग्निहोत्रं, दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः।" (ऐतरेयब्राह्मणम् २।३)। तर स्मृतिमा यज्ञहरूको विभाजन यस्तो छ– "औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिश्राद्धम्, श्रवणा, शूलगव इति सप्त पाकयज्ञसंस्थाः। अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञादयो बहिर्होमा इति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमसंस्थाः।" (गौतमधर्मसूत्राणि ८।१८)।

यसरी श्रुति र स्मृतिका आधारमा यज्ञहरूको संख्या एक्काइस हुन्छ। यी एक्काइस यज्ञहरूलाई पनि श्रौतयज्ञ र स्मार्तयज्ञ गरी दुई भागमा विभाजन गरिएको छ। स्मार्तमा स्मृति प्रतिपादित सप्तपाकयज्ञ र श्रौतमा श्रुति प्रतिपादित चौध यज्ञहरू पर्दछन्। यसमा पनि हवनीय द्रव्यका आधारमा हविर्यज्ञ (दुध, घिउ र पुरोडास हव्यपदार्थ हुने) र सोमयज्ञ (सोमलताको रस हव्यपदार्थ हुने) गरी पुनः दुई भागमा विभाजन गरिएको छ। अतः समग्रमा श्रौत र स्मार्त यज्ञलाई यज्ञ प्रकृतिका आधारमा पाकयज्ञ, हविर्यज्ञ र सोमयज्ञ गरी तीन संस्थामा विभाजन गरिएको छ। यी तीन संस्थामध्ये प्रस्तुत आलेखमा सप्तपाकयज्ञहरूको बारेमा अध्ययन गरिएको छ।

सप्तपाकयज्ञ :

गृहस्थीले गृह्याग्निमा पकाएको अन्नद्वारा सायंप्रातः कालमा मन्त्रपूर्वक गरिने हवनात्मककर्म पाकयज्ञ हो। यसमा हव्यपदार्थ हरेक दिन पकाइने भएकाले 'पाक' र त्यहि पाकेको हव्यपदार्थबाट 'यज्ञ' हुने भएकाले पाकयज्ञ भनिएको हो। डुपचष् (पाके) शब्दमा 'घञ्' प्रत्यय लागेर 'पाक' शब्द निर्माण हुन्छ। (अष्टाध्यायी, ३।३।१८)। यसको अर्थ 'पक्वान्न' भन्ने हुन्छ। त्यस्तै 'यज्' धातुमा 'नङ्' प्रत्यय लागेर 'यज्ञ' शब्दको निर्माण हुन्छ। "यजयाचयतविच्छप्रच्छरक्षो नङ्।" (अष्टाध्यायी, ३।३।९०)। यसको अर्थ वैदिक विधिपूर्वक गरिने हवन, पूजन,

ISSN : 2795-1960

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जप, पाठ भन्ने हुन्छ। यी दुई शब्दको संयोजनबाट 'पाकयज्ञ' शब्द निर्माण भएको छ। यस शब्दको प्रयोग गृह्यसूत्रहरूमा लौकिक जीवनसँग सम्बद्ध औपासन, वैश्वदेवादि यज्ञहरूलाई बुझाउन गरिएको छ।

पाकयज्ञका विषयमा गृह्यसूत्रकारहरूका बिचमा मतैक्य देखिदैन। पारस्करले हुत, अहुत, प्रहुत र प्राशित भनेर चारओटा पाकयज्ञको उल्लेख आफ्नो गृह्यसूत्रमा गरेका छन्– "चत्वारःपाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति।" (पारस्करगृह्यसूत्रम्, १।४।१) आश्वलायनले हुत, प्रहुत र ब्रह्मणिहुत भनेर तीनओटा पाकयज्ञको उल्लेख गरेका छन्– "त्रयः पाकयज्ञाः। हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणिहुताः।" (आश्वलायन–गृह्यसूत्रम्, १।१।२–३)। शाङ्खायनले पारस्करले जस्तै हुत, अहुत, प्रहुत र प्राशित गरी चारओटा पाकयज्ञको उल्लेख गरेका छन्– "चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति।" (शाङ्खायनगृह्यसूत्रम्, १।५।१)। आपस्तम्बले लोकमा प्रसिद्ध औपासनहोमादिलाई नै पाकयज्ञ भनेका छन्– "लौकिकानां पाकयज्ञ शब्दः।" (आपस्तम्बगृह्यसूत्रम्, १। २९)। गौतमधर्मसूत्रमा सप्तपाकयज्ञको उल्लेख गरिएको छ– "औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिश्राद्धम्, श्रवणा, शूलगव इति सप्त पाकयज्ञ संस्थाः।" (गौतमधर्मसूत्राणि, ८।१८)

गोभिलगृह्यसूत्रमा विवाहमा लाजाहोम अथवा अन्तिम समिधा हवन गरेको अग्निको यत्नपूर्वक सुरक्षा गर्नुपर्छ किनभने यो व्यक्तिका लागि यही अग्नि गृह्याग्नि हुन्छ, भनिएको छ– "स यदेवान्त्यां समिधमादधाति, जायाया वा पाणिञ्जिघृक्षञ्जुहोति, तमभिसय्यँच्छेत्। स एवास्य गृह्योग्निर्भवति।" (गोभिलगृह्यसूत्रम् १।१।२०–२१)। गृह्याग्निलाई पारस्करले आवसत्थ्याग्नि र यसको आधान विवाह कालमा हुन्छ भनेका छन्– "आवसत्थ्याधानं दारकाले।" (पारस्करगृह्यसूत्रम्, १।२।१)। अग्निहोत्री ब्राह्मणले ईशान कोणमा स्थापना गर्ने अग्नि पनि यही हो। यसै अग्निमा विवाहको लाजाहोम र विवाहपछि खाना पकाउने काम गरिन्छ। पारस्करकाअनुसार पाणिग्रहणसँगै स्मार्ताग्निलाई परिग्रह (अधिकार) प्राप्त हुन्छ। त्यसपछि यसै अग्निमा प्रतिदिन सायंप्रातः औपासनहोम, मध्याह्नमा वैश्वदेव र प्रत्येक प्रतिपदामा स्थलीपाकादि कृत्य गरिन्छ। पाकयज्ञसंस्थामा तण्डुलादि हव्यपदार्थद्वारा हवन गरिने औपासनहोम, वैश्वदेवपर्व, पार्वणश्राद्धम्, अष्टकाश्राद्धम्, मासिश्राद्धम्, श्रवणाकर्म र शूलगव यी सात यज्ञहरू पर्दछन्। यस आलेखमा यिनै गृह्य(स्मार्त)यज्ञहरूको बारेमा विचा र विमर्श गरिएको छ–

औपासनहोम :

